UNIVERSITY OF DELHI



ARTS LIBRARY
DELHI UNIVERSITY LIBRARY SYSTEMS

संस्कृत-साहित्य-परिषद्-ग्रन्थमालायां २०श-संख्या ।

नव्यन्याये

# भाषारत्नम्

( नव्यन्याय-पदार्थप्रतिपादकम् )

## श्रीकणाद-तर्कवागीश-प्रणीतम्

—:o:—

कलिकाता-राजकीयसंस्कृतमहाविद्यालय-न्यायशास्त्राध्यापक-

श्रीकालीपदतर्काचार्य्येण

स्वकृतटीकाभूमिकादिभिः समलङ्कृत्य सम्पादितम् ।




कलिकातास्थ-संस्कृत-साहित्य-परिषद्भवनात्

प्रकाशितम् ।

मूल्यम् { साधारणानाम्—३॥० / परिषत्सदस्यानाम्—३ }

# निवेदनम्

यदन्यत्रान्यथाभूतं त्रुटितं वा प्रमादतः ।
संशोध्य पठनीयं तत् कृपया शुद्धबुद्धिभिः ॥

Sanskrit Sahitya Parishat Series No. 20.

# BHĀṢĀRATNAM

OF

## Kanāda Tarkavāgīsa.

—:o:—

*Edited with*
A New Commentary and Introduction, etc.

BY

**Pandit Kalipada Tarkacharyya,**
*Professor of Nyāya, Government Sanskrit College, Calcutta.*

*Published by*
**THE SANSKRIT SAHITYA PARISHAT,**
**Shyambazar, Calcutta.**

*Price* { *for members—Rs. 3/-*
*for others—Rs. 3-8as*

# भाषारत्नानुबन्धः

आसीत् समयो यदा भारते वर्षे विद्यासमृद्धिरत्युत्तमा देशान्तरा-
:स्य सुमहदेव वैशिष्ट्यमुद्दीपयामास। विद्यासमृद्धये तदानीन्तनाः
:वैं वैशसं सहमानाः स्वमात्मानमुन्नमयितुकामाः क्लेशेषु प्रावर्त्तन्त।
अध्ययनमध्यापनञ्च तपस्तया समवधारयन्तः स्वान्ते महान्तमानन्दं
जनयामासुः। तत्रापि सुमहान् अनितरसाधारणो वङ्गेषु प्रकर्षः।
तन्त्रान्तरापेक्षया च नैयायिकेषु वैशेषिकेषु च तन्त्रेषु वैशिष्ट्य-मासीद्
वङ्गीयानाम्। विद्याप्रतिष्ठाने नवद्वीपभूमौ भट्टपल्लां खानाकुल-
कृष्णनगरे विक्रमपुरे कोटालिपारे च तदा तादृशाः पण्डिताः समवर्त्तन्त,
येषां स्मृतिरप्यद्य पुनाति चित्तं विद्याप्रणयिनाम्, गौरवञ्च सुमहदेव
सम्पादयति वङ्गवसुन्धरायाः। तेषु वासुदेवसार्वभौम-कणादतर्कवागीश-
रघुनाथशिरोमणि--मथुरानाथ--जगदीश-गदाधर-भवानन्द--रघुनन्दन-
भुवनमोहन-हरचरण--चन्द्रनारायण-कालीशङ्कर-गोलोकनाथ-हरिनाथ-
हलधरचूडामणि-राखालदास-शिवचन्द्र-गङ्गाचरण--रामनाथ-जयनारा-
यणा-दयः सुतरां नामतः समुल्लेखमर्हन्ति। अस्ति तदा तदा तेषां
तेषां ग्रन्थनिर्माणे अध्यापनादौ वा सुमहानेव समुत्कर्षः इति विदितमेव
सामयिकानां विपश्चिताम्।

तेषु वासुदेवसार्वभौमः सर्वतो गरिष्ठः। एष वासुदेव
एव प्रथमतो वङ्गदेशान्मिथिलानगरीं गत्वा न्यायशास्त्रमध्यगीष्ट।
श्रूयते कणादतर्कवागीशो रघुनाथशिरोमणिश्चेति द्वावेव
तस्य सार्वभौमस्य शिष्याविति। वयसा कणादतर्कवागीशो
ज्यायान् रघुनाथशिरोमणिश्च कनीयान्। कणादतर्कवागीश एव
मिथिलागमने शिरोमणिं प्रवर्त्तयामास, शिरोमणिरपि तत्-

प्रवर्त्तनेन मिथिलां गत्वा प्रभूतां प्रतिष्ठां लेभे। प्रत्याहृत्य च वङ्गेषु न्यायशास्त्रस्य सम्प्रदायविशेषमभिनवं प्रवर्त्तितवान्। खानाकुलाख्यं नगरं कणादतर्कवागीशस्य जन्मभूमिः। स एव शिरोमणेः पूर्वतो नव्यन्यायशास्त्रमूलभूतस्य चिन्तामणिग्रन्थस्य टीकामेकां विरचयामास। तस्याः चिन्तामणिटीकायाः कियानप्यंशविशेषो वराहनगरसन्निहिते ब्राह्मणग्रामे हरप्रसादशास्त्रिणा लब्धः, यत्र टीकायां रचनाशैली गभीरा, मूलस्य वैशद्यसम्पादने सुतरामुपकारिणी इति तेनैव प्रस्तुतं स्वलिखिते खानाकुलकृष्णनगराख्ये वङ्गभाषामयनिबन्धे, यः किल पञ्चदशवङ्गीयसाहित्यसम्मेलने सभापतिपदमध्यासीनेन तेनैव वाचितः खानाकुलकृष्णनगरे।

आसीद् यथैव शिरोमणेः शास्त्रेषु प्रतिभा, तथैवानन्यसाधारणः समुद्यमोऽपि, स हि मिथिलायां जयदेवापराभिधानात् पक्षधरमिश्रात् न्यायशास्त्रमधीत्य ततो बहुमानकरमुपाधिमाससाद। परं तेनायमौ न विरराम। स्थानान्तरेषु तदानीं सुप्रसिद्धविद्वद्वरेभ्यः शास्त्रविज्ञानमासाद्य स्वीयां विद्यां परिपूरयामास। इत्थं शास्त्रप्रतिभया समुद्यमेन च गरिष्ठस्य शिरोमणेः प्रकर्षेण ज्यायसोऽपि कणादतर्कवागीशस्य प्रकर्षः परिम्लानतां गत इत्यत्र किमस्ति चित्रम्। तत् सूक्तं खलु कस्यापि,—

'पुराणमित्येव न साधु सर्वं,
न चापि काव्यं नवमित्यवद्यम्।
सन्तः परीक्ष्यान्यतरद् भजन्ते,
मूढः परप्रत्ययनेयबुद्धिः।' इति।

आसन्नादिमे काले सुतीक्ष्णप्रतिभाः समुद्यमिनश्च संख्यातीता एव विद्वांसः, परमस्य शिरोमणेः केवलं न प्रतिभया समुद्यमेन च सर्वतः प्रकर्षः। परं पथि प्रचरन् य एव पथिकः पथि स्थितं कण्टकचयं परिहृत्य नवीनं निरापदं पन्थानमाविष्कृत्य परेषामुप-

कुरुते, तस्यानुकरोति शिरोमणिरिति सुमहदस्य वैशिष्ट्यम्। आदौ तावत् शिरोमणिः सुरहस्यार्थं तत्त्वचिन्तामणिग्रन्थं निपुणनिपुणया दिशा व्याख्याय यत्र यत्र पदार्थतत्त्वविचारे नैव सन्तोषमासासाद, परेषाञ्च जिज्ञासाया अनिवृत्तिमुत्प्रेक्षाञ्चक्रे, तत्र तत्रैव नवीनया पद्धत्या पदार्थान् विनिवेद्य पदार्थतत्त्वनिरूपणं नाम ग्रन्थं निर्माय स्वाधीनचिन्तायां दत्तवान् विद्यार्थिनामवकाशम्। एवं रीत्या चिन्ता साम्प्रतिकेषु विलुप्तैव। न खल्वद्यतनाः प्राचीनप्रदर्शितं पन्थानमतिक्रम्य तन्वीमपि कल्पनामात्मना वरीतुमीहन्ते। स्वल्पविज्ञानतया च ततो भीता इव विनिवर्त्तन्त इति निःसंशयो वादः।

न चैतन्मन्तव्यं कणादतर्कवागीशोऽप्यल्पीयान् पुरुष इति। स हि स्वातन्त्र्येण तत्त्वचिन्तामणिटीकां तथा विनिर्ममे, या साम्प्रतिकप्रसिद्धटीकाग्रन्थेभ्यः कमपि प्रकर्षविशेषमुपादत्ते। शिरोमणेः पूर्वं तत्त्वचिन्तामणिग्रन्थसम्प्रदायः कोट्टशः समवर्त्ततेति तदीयतट्टीकासाहायकेनैव शक्यमवगन्तुम्। अतस्तस्या व्याख्यायाः सर्वे अंशाः प्रकटिताश्चेद् भवेयुः, तदा महदानुकूल्यं सम्पद्यते नव्यन्यायशास्त्रक्रमबुद्धिविज्ञानस्येति।

यदा तावत् कणादतर्कवागीशस्य रघुनाथशिरोमणेश्च तुल्यः कालः, अथ च शिरोमणिमपेक्ष्य कणादो वयसा ज्यायान् इति व्यवतिष्ठते, शिरोमणेः पूर्वत एव च तदा सुप्रसिद्धस्य पठनपाठनयोः सुप्रचरतो नव्यन्यायमूलभूतस्य चिन्तामणिग्रन्थस्य निरुपमां टीकां कणादः प्रणीतवान्। अध्यापनया विद्यार्थिनामज्ञानान्धकारं विद्राव्य ज्ञानालोकेन तेषां हृदयकन्दरं सुनिर्मलं विदधे। शिरोमणेरपि मान्यतया समुत्प्रेक्षितविद्यादिप्रकर्षः तदानीं वङ्गेषु लोकोत्तरां प्रतिष्ठामधिकृत्य विरराज। तर्कवादार्थमञ्जर्या भाषारत्नेन च विद्याद्रविणं वङ्गेषु परिवर्द्धयामास; तदा नवद्वीपादिविद्या-

पीठस्थानादपि खानाकुलकृष्णनगरं न लघीय इति सुस्थितः खलु निर्विरोधो राजान्तः।

न केवलं कणादतर्कवागीश एव खानाकुलकृष्णनगरमलमकार्षीत्; तत्राभूवन्परेऽपि सुविद्वांसः, येषां विद्याकीर्त्तिरत्युत्तमा समलङ्करोत्यद्यापि भारतवसुन्धराम्। तेषु प्रधानतमः कोऽपि नारायणठाकुरो नाम। तस्य शुद्धिकारिका बहूनां विदुषां मुखेषु प्रचरन्ती विश्रूयते। स हि नारायणो वन्द्योपाध्यायवंशप्रभव इत्यस्ति विश्रुतिः प्रत्नतात्त्विकेषु। महेन्द्रनाथविद्यानिधिर्नाम कश्चित् खानाकुलकृष्णनगरसमाजप्रबन्धनिर्माता तं नारायणवन्द्योपाध्यायं कणादशिष्यं प्राख्यापयदिति शास्त्रिनिवस्पाठेनाभिज्ञायते।

चौधुरीत्याख्या भूमिपतयः कणादतर्कवागीशाय तच्छिष्याय नारायणवन्द्योपाध्यायाय च सार्द्धशत-'विघा' परिमितां भूमिं प्रादुरिति तन्निबन्धादेव शक्यमवगन्तुम्।

तदानीन्तनानां भूमिपतीनां विद्यासु महान् अनुरागः समवर्त्तत, यत्र यत्र भूमिपतयो विद्यासमृद्धिमनन्यसाधारणीमवागच्छन्, तेषां तेषां विद्यासमृद्धेरेव भारतगौरवमुत्प्रेक्षमाणा द्रविणदानादिभिस्तानभिवर्द्धयितुं प्रायतन्त। प्रमीयत एव तादृग् कृत्यशतमद्यापि लभ्यमानेभ्यः संख्यातीतशिलापट्टलेखताम्रपट्टकलेखादिभ्यः। अस्तीयं किंवदन्ती;—यथा 'नवद्वीपनगरे यदा तावत् श्रीमान् मथुरानाथतर्कवागीशो नाम तत्त्वचिन्तामणिग्रन्थटीकां विरचितवान्, तदा तस्य दारिद्र्यश्रवणेन भृशमुद्वेजितो नवद्वीपाधीशस्तद्गेहं समेत्य मथुरानाथं पप्रच्छ। भगवन्! अप्यस्ति भवतः काचिद् अनुपपत्तिर्यन्निवर्त्तनेनात्मानमहं शक्नुयां कृतकृत्यतां नेतुम्। मथुरानाथः प्रत्यभाषत, राजन्! आसीद् विगतदिनं यावत् एकत्र ग्रन्थार्थे अनुपपत्तिः सा अद्यैव चिन्तया समाधिं नीता। तदिदानीं नास्ति कापि। राजा प्राह;—नाहं ग्रन्थार्थानुपपत्तिं पृच्छामि, परं सांसारि-

कार्यानुपपत्तिम्। मथुरानाथः प्राह;—का वा अर्थापेक्षा? सन्ति तावद् भवत्प्रदत्ताया भुवो लब्धानि धान्यानि, अस्ति चायं तिन्तिडीवृक्षः, तदेतन्मात्रेणैव निवृत्ता अर्थापेक्षा, धान्येभ्यः सम्यक्वान् तण्डुलान् आहृत्य ओदनं निष्पाद्य तिन्तिड्या अम्लं विनिवर्त्त्य च क्षुधां निवर्त्तयामो विद्यायाश्च सेवां कुर्मः। तावतैव पर्याप्तं मे सुखसम्भोगादिकमिति। राजा समाकर्ण्य राजभवनात् प्रत्यहं तस्य यथेष्टं भोज्यं प्रतिपादयामास, तेन च सुखेनास्य निरवर्त्तत संसारयात्रा इति।

अत एव विशिष्टविद्यासम्भारभासुराय कणादतर्कवागीशाय तच्छिष्याय नारायणठाकुराय च प्रभूतां भूमिं तदानीन्तना भूपतिविशेषाः प्रत्यपादयन्नित्यत्र कियानिवास्ति विप्रयावसरः।

श्रीमान् कणादतर्कवागीशो यदा मिथिलाप्रदेशात् न्यायशास्त्रमधीत्य विशिष्टं विज्ञानमासाद्य तत्त्वचिन्तामणिग्रन्थं गभीरार्थया टीकया स्फुटीचकार, तदा नव्यन्यायशास्त्रसम्प्रदायो वङ्गेषु न तथा प्रचचार, यथा किल अद्यत्वे समुपलभ्यते,। कणादतर्कवागीश एव प्रथमो न्यायशास्त्रनिबन्धकर्तृतां वङ्गे प्रतिनिरुक्त-प्रमाणाद् व्यवस्थाप्यते। तदा न्यायशास्त्रेषु प्रथमतः प्रविविक्षूणां नासीत् तथा कोऽपि ग्रन्थो, येन गभीरार्थन्यायशास्त्रग्रन्थनिबन्धवस्तुविज्ञानानुकूला पदार्थप्रतिपत्तिः सुलभा सम्पद्येत। तत एव तत्रत्यन्यूनतापरिजिहीर्षया विमलधियामग्रेसरः कणादो नाम भाषारत्नाभिधानं ग्रन्थरत्नं निबबन्ध, यत्साहायकेन नव्यन्यायशास्त्रं प्रविविक्षवः सम्यगधिगत्य पदार्थतत्त्वं गभीरार्थानि वस्तूनि प्रतिपत्तुमलं भवेयुरिति। तदिदमेव भाषारत्नं नाम।

सन्त्यपरेऽपि ग्रन्थास्तर्कभाषापरिच्छेदकाः सुविदिता एव सुविदुषाम् प्रशस्तपादभाष्य-किरणावली-न्यायकन्दली-न्यायलीलावतीप्रभृतयो ग्रन्थाः, सुगमाः संक्षिप्तरूपाश्च भाषापरिच्छेदतर्कसंग्रह-

तर्कामृततर्कभाषापदार्थदीपिकासप्तपदार्थीप्रभृतयः संख्यातीताः। तेषु केचिदतिसंक्षिप्ताः सिद्धान्तमात्रप्रतिपादका न परितर्पयन्ति चेतांसि प्रथमतोऽपि जिज्ञासाभूमिकामारोढुताम् निपुणधियां विद्यार्थिनाम्, युक्तितर्कादिराहित्येन च न दृढं संस्थापयितुमलं भवन्ति सिद्धान्तानन्तःकरणे पदार्थतत्त्वसम्बन्धान्। परे च प्रशस्तपादभाष्यतट्टीकाकिरणावलीप्रभृतयः सुदुर्गमार्थाः सुसंक्षिप्तभाषामयाश्च नोपयुज्यन्ते तेषाम्, अतः समपेक्षितः किल कश्चन तादृशग्रन्थो यः सुगमया नातिपल्लवितया च वचनसरण्या प्रतिपादयति सयुक्तिकानर्थान्, न चातिदुरूहवाचोयुक्त्या विप्लावयति प्रथमतः शिक्षामधिगन्तुमीहमानानां पदार्थतत्त्वसिद्धान्तान्। ईदृशस्य ग्रन्थस्य नितरां प्रयोजनमनुभूय कणादः स्वयं भाषारत्नं नाम तादृशलक्षणं ग्रन्थं प्रणिनाय, प्रणीय चेदं ग्रन्थरत्नं सफलश्रमः परां प्रतिष्ठामुपलेभे।

परमिदमस्माकमतिदुःखस्थानमेव, यदीदृशस्यापि तस्य ग्रन्थस्य भाषारत्नस्य विद्वत्सु विद्यार्थिषु च तथा प्रचारो नोपलभ्यते, यथा ततोऽर्वाचीनानामपि पदार्थतत्त्वप्रतिपादकग्रन्थानाम्। बहोः कालात् प्रभृत्येव न्यायविद्यार्थिसमाजेषु भाषापरिच्छेदादीनामर्वाचीनग्रन्थानां समुपलभ्यते प्रचारबाहुल्यम्। कतिपये च संवत्सराः समजायन्त तर्कसंग्रहादिग्रन्थानामपि प्रतिमुखं विद्यार्थिसमाजे प्रचरताम्, विद्वत्समाजे च दुरूहार्थप्रशस्तपादभाष्यादिग्रन्थानाम्। परमस्य भाषारत्नस्य प्रतिभाति शिक्षामार्गे प्रकर्षातिशयमधिकुर्वतो नामाप्यविदितप्रायम्। कणादेन एतद्ग्रन्थप्रणेत्रा रचिता विलुप्ता तत्त्वचिन्तामणिव्याख्या, नाममात्रसारा तर्कवादार्थमञ्जरी, अस्मदेव च मन्ये प्रथमतो लब्धप्रकाशं भाषारत्नम्; तदत्र तत्तद्ग्रन्थप्रचारविरहे विधिर्विगुण एव हेतुतामध्यास्ते।

शिरोमणिर्नाम दीधितिग्रन्थनिर्माता कणादेन प्रेरितो मिथिलां जगाम, तत्र गत्वा च न्यायशास्त्रमधीत्य लब्धवर्णो भूत्वा भूयः प्रत्यावृत्य

दीधितिग्रन्थनिर्माणेन नव्यन्यायसम्प्रदायं परिवर्द्धयामास इति हि प्रतिपादितमस्माभिरधस्तात् स्वर्गतानां हरप्रसादशास्त्रिपादानां मतानुसारेण, परमस्य कणादस्य भाषारत्नग्रन्थसन्दर्भः पर्यालोच्यते चेदन्यथैवेदं व्यवतिष्ठते। अस्ति किलायं सम्प्रदायः प्राचामर्वाचाञ्च ग्रन्थकृतां यथा स्वप्रतिपादितेषु वस्तुषु परेषाम् अप्रामाण्यशङ्कामपनेतुकामा ग्रन्थकृतः प्राचीनमतानि स्ववस्तुसाधकतया समुपस्थापयन्तीति, अत एव गङ्गेशप्रभृतयो न्यायशास्त्रमहर्षयोऽपि 'प्रत्यक्षपरिकलितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिकाः, न हि करिणि दृष्टे चीत्कारेण तमलुमिमते अनुमातार इति वाचस्पतिवचनयोरविरोध' इत्यादिना प्राचीनग्रन्थकारग्रन्थाविरोधादिकमुपपादयितुम् प्रयत्नवन्तः समुपलभ्यन्ते। सन्ति तावदीदृशानि परःसहस्राणि प्रमाणानि, यत्र प्राचीनग्रन्थसंवादः प्राक्तनग्रन्थकृद्भिः स्वीयवस्तुतत्त्वप्रतिपादनावसरे समुपपादितः समुपलभ्यते। अत्रापि ग्रन्थे कणादो नाम प्रकृततत्त्वकारो दीधितिकृतां वचनं प्रमाणरूपेणोपादाय स्वीयशास्त्रार्थं सप्रमाणं कर्त्तुं "दीधितिकृतस्तु ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे मानाभावात् तत्र रक्षात्यन्ताभावसत्त्वात् तादृशप्रतीतिः प्रमा एव" इत्यादिग्रन्थसन्दर्भानुपाददे। एतेनार्थतः कणादस्य शिरोमणेरुत्तरकालप्रभवत्वमेव प्रतीयते। न हि समकालीनानां दीधितिकृतां मतं तथा प्रामाण्येन कणादः परिजग्राह स्वीयग्रन्थ इति युक्तं प्रतिपत्तुम्। बहोः कालादनन्तरं प्रतिष्ठां प्राप्तेषु दीधितिकृत्सु तदीयवचनमात्रग्रन्थे प्रमाणतया परिगृहीतमित्येव युक्तिमदवभाति। कणादात् पूर्वं न कोऽपि तत्त्वचिन्तामणिग्रन्थस्य टीकां विनिर्ममे, कणाद एव प्रथमस्तत्त्वचिन्तामणिटीकाकृतामिति कृतान्तोऽपि न तथा प्रमाणसह इति। न विना प्रमाणं प्रमेयसिद्धिरिति हि सिद्धान्तः शास्त्रकृतां युक्तिमांश्चायं वादो नाम। यदि महामहोपाध्यायस्वर्गतशास्त्रिपादपरिगृहीतः पूर्वसिद्धान्तः

समीचीनः स्यात्, यदि च कणादेन कृता तत्त्वचिन्तामणिटीका सुलभा स्यात्, तदा कथञ्चिदिदं योग्यं भवति व्यवस्थापयितुम्। नास्ति तदितदयमेवेति वयमत्र सुतरामुदास्महे।

किञ्च रघुनाथशिरोमणिना सङ्कलितायां तत्त्वचिन्तामणिटीकायां पदार्थतत्त्वनिरूपणादिग्रन्थे च यादृशी लेखशैली समुपलभ्यते, सा नितरां प्राचीनरीतिमनुरुन्धाना सुसंक्षिप्ताक्षरा च प्रतिभाति, यावन्तः किल प्रतिपद्यन्ते प्राचीनटीकाग्रन्थादयः, तावत्सु सर्वेष्वेव तथैव रीतिः समवलोक्यते। परं भाषारत्नग्रन्थे यादृशी रचनाशैली, सा सुतरां नवीनेव प्रतीयमाना शिरोमणिकालादर्वाक्तनत्वं कणादकालस्य प्रत्याययति।

रघुनाथशिरोमणेः शिष्यः श्रीमान् मथुरानाथतर्कवागीशो माथुरीत्यभिधानां यां किल विदधे तत्त्वचिन्तामणिटीकाम्, स्मरणातीतकालात् प्रभृत्येव सा पठनपाठनयोः प्रचरन्ती प्रत्याययति स्वकीयमसाधारणं महिमानम्। श्रीमता मथुरानाथतर्कवागीशेन सुगमं पन्थानमवलम्ब्य विरचिता प्रत्यक्षानुमानोपमानशब्दाभिधानस्य खण्डचतुष्टयस्यैव टीका, ये नाम न्यायविद्यार्थिनः स्वारस्येन नव्यन्यायवादार्थानधिजिगमिषन्ति, तेषां परमः समाश्रयः सैव श्रीमथुरानाथस्य खण्डचतुष्टयव्याख्या। तत्र प्रत्यक्षखण्डात् प्रभृति शब्दखण्डपर्यन्तस्य नव्यन्यायस्य पुरा महानेव प्रचारः समवर्त्तत। सम्प्रत्यपि प्राचीनपण्डितानां गृहेषु हस्तलिखिता बहवः खण्डचतुष्टयग्रन्थाः, यत्साहायकेन कलिकाता-एसियाटिक्सोसाइटीनामकग्रन्थप्रकाशपरिषदा ते एते प्रायेण नीताः प्रकाशम्। उपमानखण्डस्य मथुरानाथटीकाया अनुपलम्भेऽपि खण्डत्रयटीका सुप्रचारैव। अद्यत्वे अनुमानशब्दखण्डयोरेव भूयान् प्रचारः समुपलभ्यते, अंशतश्च प्रत्यक्षखण्डस्यापि। तस्या रचनाशैली यद्यपि सुश्लिष्टार्था नातिसंक्षिप्ताक्षरा च तथापि तस्याष्टीकाया यथाप्रयोजनं विस्तृतिरिति

न प्राचीनकालानुरूपरचनाशैलीव्यभिचारः शङ्कास्पदं भवति। प्रत्यक्षखण्डात् प्रभृति यदि मथुरानाथटीका प्राचुर्येण पर्यालोच्यते, तदा तावदिदमेव वस्तु बुद्धावारोहति, यथा सुगमानि तत्र तत्र मथुरानाथादिभिर्नैव व्याख्यातानि पदानि, नापि गृहीता व्याहृत्तयस्तत्र सरलविशेषणादिपदानाम्।

कस्तत्र हेतुरिति विचारे प्रचरत्ययमेव सिद्धान्तो बुद्धिपथानुपाती, यथा यावद् यावच्छास्त्रेषु लोकानां बुद्धिरतिनिपुणा समवर्त्तत, यावद् यावच्च न्यायसम्प्रदायः सुतरां प्रतिष्ठावानासीत्, तावत् तावत् साधारणपदव्याहृत्यादिनिरूपणस्य प्रयोजनमेव नोदियाय, स चायं कालः शिरोमणिकालं यावत् प्रससार। पर्यालोच्यते यदि व्याप्तिपञ्चकादिग्रन्थस्य शिरोमणिकृता दीधितिस्तदैव सिद्धान्तोऽयं निरपवादः प्रतिपद्यते। तथाहि व्याप्तिपञ्चकस्य 'साध्याभाववदवृत्तित्व'-मित्यादिपञ्चलक्षणमयस्य पञ्चलक्षणीत्यपराख्या समुपलभ्यते। तत्र 'साध्याभाववदवृत्तित्वमि'ति प्रथमलक्षणम्, द्वितीयलक्षणञ्च 'साध्यवद्-भिन्नसाध्याभाववदवृत्तित्वमि'ति। तत्र निरुक्तपूर्व्वस्य प्रथमलक्षणस्य व्याख्यामैकान्त्येन परिहाय शिरोमणिः द्वितीयलक्षणोत्थापनबीजमात्रमुपदर्श्य द्वितीयलक्षणात् प्रभृत्येव पञ्चलक्षणीव्याख्यामारेभे। तत्रापीदमेव बीजमस्माभिरनुसन्धीयते, यत् साध्याभाववदवृत्तित्वमिति प्रथमलक्षणं न तथा दुर्गमम्, येन व्याख्यां विना विद्यार्थिनो नैतस्यार्थं प्रतिपत्तुमर्हेयुः, अतएव शिरोमणिस्तस्य विशदव्याख्यामपहाय द्वितीयलक्षणव्याख्यानप्रसङ्गेनैव 'इदञ्च येन रूपेण येन सम्बन्धेन च साध्यत्वं तेन रूपेण तेन सम्बन्धेन च साध्याभावस्य प्रवेशमाहत्य' इति ग्रन्थेन अंशतो निजाभिमतं संक्षिप्तं व्याख्यानमुपदर्शितवान्।

परे तु लाघवप्रियाः किल तार्किका भवन्तीति प्रसिद्धे वादे शिरोमणेरपि लाघवप्रियस्य ग्रन्थलाघवार्थमेव तथा प्रवृत्तिरिति।

तथाहि द्वितीयलक्षणं नाम साध्यवद्भिन्नसाध्याभाववदवृत्तित्व-रूपं अर्थतः साध्याभाववदवृत्तित्वघटितमेव अतः तदुव्याख्यानप्रसङ्गेन विज्ञेया एव साध्याभाववदवृत्तित्वादिपदार्थाः, तद्द्वितीयलक्षणविवरण-प्रसङ्गेनैव यदि तदर्थः समावेदितो भवेत्, तदैव ग्रन्थलाघवं भवति। अत एव प्रथमलक्षणमेकान्ततः परिहाय द्वितीयलक्षणतः प्रभृत्येव तदुव्याख्यानोपक्रम इति ब्रुवते। तदस्माकं न समीचीनं प्रतिभाति। तथाहि प्रथमोपस्थितपरित्यागे प्रमाणाभावात् सर्वथा प्रसिद्धस्य साध्याभाववदवृत्तित्वमात्रस्य व्याख्यामपहाय तदुघटितस्य साध्य-वन्निन्नसाध्याभाववदवृत्तित्वस्य व्याख्यानपरिग्रहे ग्रन्थकारस्य अदूर-दर्शितायां लब्धास्पदत्वात्।

किञ्च पञ्चलक्षणीग्रन्थे यानि पञ्च लक्षणानि 'साध्याभाववदवृत्ति-त्वादीनि' व्याप्तेः समुपलभ्यन्ते, तत्र प्रसिद्धानि त्रीण्येव परपरग्रन्थे-ष्वपि उपादीयन्ते स्खलविशेषेषु, तानि च प्रथमचतुर्थपञ्चमलक्षणान्येव। तेषु चतुर्थलक्षणस्य पञ्चमलक्षणस्य च कृता समीचीना शिरो-मणिना व्याख्या उपव्याख्या च जगदीशादिभिर्ग्रन्थकारैः। तत् प्रथमलक्षणस्यापि परपरग्रन्थेषु यथाश्रुतमुपादातव्यस्य कर्त्तव्यं समीचीनं व्याख्यानं शिरोमणिनेति युक्तम्। तच्च कथं न कृतमिति प्रश्ने सुगमतैवास्य लक्षणस्य हेतुरनुसन्धीयते। तदा तादृशस्य सुगमस्य लक्षणस्य व्याख्या नापेक्षितासीद् विद्यार्थिनाम्। न चैवं पञ्चमलक्षणस्यापि व्याख्यानमनपेक्षितम्, तत् कथं व्याख्यातं शिरोमणिनेति वाच्यम्, तस्यापि शिरोमणिना दुर्गमांश एव व्याख्यानात्। अनन्तरञ्च यदा तावच्छास्त्रेषु प्रतिभा लोकानां प्रक्षीणा समभवत्, तावदेव स्वल्पैरक्षरैः पदार्थग्रहणस्याग्रह्यतया टीकादिमार्गे सरलसरला सरणिरपेक्षितासीत्, तदैव क्रमेण सरलाः सरलतराः सरलतमाश्च टीकाग्रन्थादयः प्रादुरभूवन्। भाषायामर्थे च यथा यथा न लेशतोऽपि दुरवबोधः पन्थाः, तथा तथैव ग्रन्था

निरमीयन्त। अत एवानन्तरं शिरोमणेः शिष्येण मथुरानाथेन सरलां सरणिमुपजीव्य प्रथमलक्षणस्य तथा लक्षणान्तराणां सुगमार्थां टीका व्यधायि, येन पञ्चलक्षणीपदार्था अद्यापि न्यायशास्त्रार्थमधिजिगमिषतां निरावाधमेव बुद्धिभूमिकामारोहन्ति। तथाभूत एव क्वचित् समये सम्भवः कणादस्येति निर्विवादम्।

सन्ति किल प्राचीना बहव एव न्यायग्रन्थनिर्मातारो रघुनाथशिरोमणि-मथुरानाथतर्कवागीश-जगदीशतर्कालङ्कार-गदाधरभट्टाचार्य-भवानन्दसिद्धान्तवागीशप्रमुखाः परःशताः, तेषु सर्वेषामस्य असत्यामपि सम्यक् प्रतिपत्तौ कतिचन प्रसिध्यन्तीति विदितमेव न्यायशास्त्रानुशीलनपराणाम्। तत्र भाषारत्नग्रन्थनिर्माता रघुनाथशिरोमणिं दीधितिकारं गङ्गेशोपाध्यायञ्च तत्त्वचिन्तामणिप्रजापतिं नाम्ना समुपजग्राह, नेतरानर्वाक्तनान्।

न च पदार्थतत्त्वप्रतिपादनप्रसङ्गेन त एव नाम्ना ग्रहीतुं युक्तास्तेषाञ्च वाचः प्रमाणतया समुपन्यस्तया ये पदार्थतत्त्वानि प्रतिपिपादयिषवो ग्रन्थनिर्माणं विदधिरे। निरुक्तपूर्वेषु ग्रन्थकारेषु च शिरोमणिरेव पदार्थतत्त्वनिरूपणं नाम पदार्थतत्त्वप्रतिपादकं ग्रन्थं निर्माय स्मृतिपथमुपाकरोद्द कणादस्य, नेतरे इत्यपि शक्यं वक्तुम्। जगदीशतर्कालङ्कारप्रमुखैः परैरपि तर्कामृतादिग्रन्थरत्नानां पदार्थतत्त्वप्रतिपादनपराणां निर्मितत्वात्, तेषामपि प्रकृतग्रन्थे प्रामाण्येनोपग्रहस्य योग्यत्वात्। अतः सत्यामपि सम्भावनायां जगदीशग्रन्थस्य प्रमाणरूपेणानुपग्रहात् शिरोमणिग्रन्थस्य च तथात्वेनोपादानात् कणादस्य शिरोमणिमपेक्ष्य अर्वाक्तनत्वं जगदीशाद्यपेक्षया प्राक्तनत्वञ्च निरूढं सम्पद्यते। 'शिवादित्यमिश्रास्तु करणत्वमखण्डोपाधिमङ्गीचक्रुरिति ग्रन्थे च शिवादित्यमिश्रनाम्नो निरुक्तसिद्धान्तस्य च समुल्लेखेन शिवादित्यमिश्रस्यापि एतद्ग्रन्थनिर्मातृपर्वजत्वं सिद्धं भवति।

अस्ति किल कणादाभिधानः सूत्रकारो वैशेषिकदर्शनस्येति सुविदितमेव सुधियाम्। अयन्तु कणादः संज्ञामात्रेण कणादोऽपि तस्माद् भिन्नः अभिनवकणादसंज्ञया प्रख्यायते। दृश्यते बहुष्वेव हस्तलिखितभाषारत्नग्रन्थेषु तस्य ग्रन्थकृतोऽभिनवकणाद इति संज्ञासमुल्लेखः। अस्यैव प्रकरणस्य प्रतिज्ञाश्लोके श्रीकणादेनेत्यत्र श्रीशब्दप्रयोगोऽपि तदेवाकूतं सूचयतीव। नहि मुनीनां कणादानां प्रणामाद्यवसरे प्रशस्तपादेनापि

'प्रणम्य हेतुमीश्वरं मुनिं कणादमन्वतः।
पदार्थधर्मसंग्रहः प्रवक्ष्यते महोदयः'॥

इत्यत्र श्रीशब्दसमुल्लेखेन सूत्रकारा विशेषिताः। अत एव तत आत्मनो विशेषप्रतिपत्तये स्वनामनिर्देशप्रस्तावे श्रीशब्दः समुल्लिखितो दृश्यते प्रकृतग्रन्थप्रणेत्राऽभिनवकणादेन।

किञ्च अस्ति खलु भाषारत्ने दीधितिकृतां मणिकृतां प्राभाकरसम्प्रदायादीनाञ्च नामतः समुल्लेखेन मतविचारः समुपक्रान्तः तदुक्तमत्र स्वयमेव,—'दीधितिकृन्मते तु परमात्मनो नव गुणाः, तेन तस्य नित्यसुखस्वीकारात्।' इति। 'विशिष्टाभावस्य अतिरिक्तता वादिमणिकृन्मते तु तादृशविशिष्टाभावोऽञ्जनसंयोगसत्त्वे आलोकसंयोगस्य चासत्त्वे आलोकसंयोगस्य सत्त्वे अञ्जनसंयोगस्य चासत्त्वे तिष्ठति' इति, 'प्राभाकरास्तु नातिरिक्ताभावं स्वीकुर्वन्ति, वदन्ति च अधिकरणस्वरूपम्' इति, 'त्रिपुटीप्रत्यक्षवादी गुरुः' इति। 'मुरारिमिश्रमते घट इत्यादि-ज्ञानानन्तरं घटमहं जानामीत्याद्यनुव्यवसाया प्रामाण्यग्रहः' इति। 'भट्टो ज्ञानमतीन्द्रियं वदति, स्वीकुरुते ज्ञाततानाम पदार्थान्तरम्' इति च।

ततस्तत्तद्ग्रन्थकृद्भ्यः परत एव लब्धजनिः कश्चन कणाद ग्रन्थमिमं प्राणैषीदित्येव युक्तमभ्युपगन्तुम्। न हि कणादो ना

महर्षिरीलूक्यदर्शनकारो निरुक्तग्रन्थसम्प्रदायप्रवर्त्तकेभ्यः कथमप्यर्वाचीनः सम्भवति।

किञ्च भाषारत्नस्य मङ्गलाचरणश्लोके ग्रन्थकारेण 'चूडामणिपदाम्भोजभ्रमरीभूतमौलिना' इत्यनेन सन्दर्भेण चूडामणिर्नाम कोऽपि नमस्कृत इति प्रतिपद्यते, स चास्य ग्रन्थकृतो गुरुर्वा जनको वेत्यन्यदेतत्, परं कणादस्य महर्षेः प्रणत्या विषयीकर्त्तव्यस्तथा कश्चन चूडामणिर्नाम देवादिरन्यत्र क्वापि नोपलभ्यते यदीयप्रणतिरूपमङ्गलाचरणेन ग्रन्थस्य निर्विघ्न-परिसमाप्तिं कामयमानः किलैष तं नमस्कुर्य्यात्। अस्ति च सूत्रकृतामेष नियमो यदेते प्रायेण अथशब्दादिभिरेव ग्रन्थारम्भे मङ्गलमुपपादयन्तीति। तद् यथा वैशेषिकसूत्रारम्भे स्वयं कणाद एव 'अथातो धर्म्मं व्याख्यास्यामः' इत्यत्र, मीमांसादर्शनसूत्रप्रारम्भे जैमिनिः 'अथातो धर्म्मजिज्ञासे'त्यत्र, ब्रह्मसूत्रप्रारम्भे भगवता बादरायणेन 'अथातो ब्रह्मजिज्ञासे'त्यत्र, कापिलसूत्रारम्भे भगवता कपिलमहर्षिणा 'अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः' इत्यत्र, पातञ्जलसूत्रारम्भे च भगवता पतञ्जलिना 'अथ योगानुशासनम्' इत्यत्र च अथशब्देन मङ्गलमुपपादितं दृश्यते। न्यायसूत्रप्रारम्भे पुनरथशब्दाभावेऽपि 'प्रमाणप्रमेयादिसूत्रे 'प्रमाणं प्राणनिलय' इत्यादिभगवत्सहस्रनामान्तर्गत-भगवद्बोधकप्रमाणशब्देन तेन ग्रन्थकृता कृतं मङ्गलाचरणमिति प्रतिपद्यते; तदत्रापि सूत्रकृतः कणादस्य तद्विपर्य्ययो नैव प्रमाणवान् भवितुमर्हति।

अपरञ्च कणादेन महर्षिणा वैशेषिकसूत्रे पदार्थसमुद्देशप्रकरणे अभावज्ञानस्य भावज्ञानपरतन्त्रतया षडेव भावपदार्था द्रव्यगुणकर्म्मसामान्यविशेषसमवायरूपा "धर्म्मविशेषप्रसूताद् द्रव्यगुणकर्म्मसामान्यविशेषसमवायानां पदार्थानां साधर्म्म्य-वैधर्म्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्" इति सूत्रेण समुद्दिष्टा लक्ष्यन्ते। अत्र च प्रारम्भ एव 'पदार्थो द्विविधः भावोऽभावश्च' इत्यादिना पदार्थसप्तकमेव समुद्दिष्ट

ग्रन्थकृता। नैव युज्यते एकमेव मतवादं प्रचारयतो ग्रन्थकृतः पृथक्प्रकरणे पृथक्तया विभिन्नरूपपदार्थविभागव्यवस्थापनम् इति। तदस्य सप्तपदार्थप्रकरणस्य निर्माता षट्पदार्थवादी वैशेषिकसूत्रप्रणेता कणादो महर्षिरिति सिद्धान्तः सुदूरपराहत एव।

किञ्च विभिन्नानां ग्रन्थकृतां विभिन्नैव लेखशैली सर्वसिद्धा। एकस्यैव ग्रन्थकृतो विभिन्ना लेखशैलीति न दृष्टं प्रायेण। अत एव महाभारतादिग्रन्थप्रणेत्रैव व्यासेन श्रीमद्भागवतं नाम ग्रन्थरत्नं विलक्षणरचनाशैलीमाश्रित्य रचितमिति नैव बहवः प्रतियन्ति। परं व्यासादन्येन परमवैष्णवेन वोपदेवकविनैवेति। कुत्रापि ग्रन्थे परेण प्रक्षिप्ता अंशा अनेनैवोपायेन सूत्रवत् कुत्रचन शक्याः समुपलक्षयितुम्। तत् कणादस्य सूत्रकारस्य लेखशैली सुविचार्यते चेत् एतद्ग्रन्थलेखशैली सुतरां ततो विलक्षणा प्रतिभासते। तथाभूतविलक्षणलेखशैलीविचारेण च नवीनजनोचितां सुगमां लेखशैलीमुपादाय भाषारत्नग्रन्थनिर्माता कणादो न सूत्रकृत्कणाद एवेति सुव्यवस्थितमेव। तदयमभिनवकणादः कणादान्महर्षेर्भिन्न एवेत्यत्र को वा विप्रतिपद्यते।

न च उदयनाचार्यादीनाम् आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलिलक्षणावली-किरणावलीप्रभृतिग्रन्थप्रणेतॄणाम् अभिन्नत्वेऽपि तत्र तत्र विलक्षणलेखशैली दृश्यते। यथैव लेखशैली आत्मतत्त्वविवेककुसुमाञ्जलिप्रभृतिग्रन्थेषु नहि तथैवास्ति लक्षणावलीकिरणावलीप्रभृतिग्रन्थेष्वपि। अथ च तेषां ग्रन्थानाम् एक एव कर्त्ता इत्यत्र नास्ति विसंवादः केषाञ्चित्, तदत्रापि तथैव स्यात् इति चेन्न, नहि तावतैव प्रमाणेन वयमेतद्ग्रन्थनिर्मातुः कणादस्य कणादमहर्षिभिन्नत्वं प्रतिपादयामः, किन्तु प्रमाणान्तरसहकृतेनैव तावता, तदत्र कीदृशः पर्यनुयोगः? यावन्ति किल प्रमाणान्तराणि पूर्वमुपन्यस्तानि तैरालोच्यमानैरभिप्रेतार्थस्य कथमप्यनपायात्।

अयमेव कणादः कणादरहस्य-वैशेषिकसूत्रोपस्कारादिग्रन्थप्रजापतेः श्रीशङ्करमिश्रस्य भवनाथात्मजस्य गुरुरिति प्रतीयते। तदुक्तं स्वयं तेनैव "याभ्यां वैशेषिके तन्त्रे सम्यग् वृत्पादितोऽस्म्यहम्। कणाद-भवनाथाभ्यां ताभ्यां मम नमः सदा॥" इति। तत्र कणादः श्रीशङ्कर-मिश्रस्य गुरुः भवनाथश्च तदीयः पितेति प्राचां सिद्धान्तः। तदुक्तं कणादरहस्ये शङ्करमिश्रेण स्वयमेव—'महर्षेः श्रीकणादस्य रहस्यमति-निर्गतम्। पित्रा मद् (मे) भवनाथेन न्यवेदि तमि(द)हाखिलम्।" इति। न च कणादपदेन वैशेषिकसूत्रनिर्म्मातुः कणभुजोऽपि मुनेरुपस्थापनात् वैशेषिकसूत्राण्यनुशीलयतां वृत्पत्तिविशेषोपजननात् तेनापि श्रीशङ्करस्य वैशेषिके तन्त्रे सम्यग्वृत्पत्तेराधानाद् वाक्यार्थ-सङ्गत्या कणादतर्कवागीशः श्रीशङ्करस्य गुरुरिति तत्त्वं विवादास्पद-मेवेति मन्तव्यं, गुरोरिव तत्तद्ग्रन्थनिर्म्मातॄणां तत्र तत्र व्युत्पादकत्व-प्रवादस्यादृष्टचरत्वेन प्रकृते कणादतर्कवागीशस्य एव गुरुत्वप्रत्ययस्य निरावाधत्वात्। भवनाथः पितेव गुरुरप्यस्येत्यपि तत एव लभ्यते, जननद्वारा पितुः सर्वस्यैव पुत्रवृत्पत्त्याधायकत्वाद् भवनाथेति विशेषनिर्देशस्य अव्यावर्त्तकत्वात्।

भाषारत्नग्रन्थे प्रथमतः किल पद्यमिदमुपलभ्यते, यथा,—

'चूडामणिपदाम्भोजभ्रमरीभूतमौलिना।
संक्षिप्य श्रीकणादेन भाषारत्नं वितन्यते।' इति।

अत्र तावदयं प्रश्नः समुदेति यत्, कोऽयं चूडामणिर्नाम, यस्य चरणाम्बुजे भ्रमरीकृत्य निजमौलिं ग्रन्थकृद् ग्रन्थनिर्म्माणाय प्रवर्त्तते। अत्र केचित्,—चूडामणिरिति ग्रन्थकारस्य गुरोः पितुर्वा नाम,—परे तु चूड़ामणिरिति न ग्रन्थकारस्य गुरोः पितुर्वा नाम, 'याभ्या' मित्यादिवचनेनान्यथैव प्रतिपादनात्, किन्तु उपनामैव। उपना ममात्रेण व्यक्तिनिर्देशस्य तदीयगौरवातिशयद्योतनार्थः,

साम्प्रतिकेष्वपि तथा नियमस्य बाहुल्येन दृष्टचरत्वात्। अन्ये तु चूड़ामणिरिति कोटालिपारपत्तनीयः काश्यपः पौरन्दरिः श्रीनाथ-चूड़ामणिरेव, यस्य किल विश्रुतपाण्डित्यस्य सरस्वत्युपनाम्ना गीता-रहस्याद्वैतसिद्धिप्रस्थानभेदादिप्रणेता दण्डी मधुसूदनो भ्राता पितृव्यो वा। तदीयः शिष्यः श्रीकणाद इत्यपि वदन्ति। तदेतत् सर्वं न शक्यते युक्त्या सङ्गमयितुम्।

अस्ति किलास्य कणादतर्कवागीशस्य वितर्कवादार्थमञ्जरी नाम अपरो ग्रन्थः। वितर्कवादार्थमञ्जरीत्यस्य तर्कवादार्थमञ्जरी अथवा वाक्यार्थमञ्जरीत्यभिधानमित्यपरे, 'अतिविस्तरस्तु अस्माकं वितर्क-वादार्थमञ्जर्यामनुसन्धेयः' इति अत्रैव प्रत्यक्षप्रकरणे दृश्यते। अत्रैव 'अतिविस्तरस्तु तर्कवादार्थमञ्जर्यामनुसन्धेय' इति पाठान्तरं सन्दृश्यते। वितर्कवादार्थ मञ्जरी वा तर्कवादार्थमञ्जरी वा वाक्यार्थ-मञ्जरी वा कणादतर्कवागीशप्रणीता अद्यत्वे नोपलभ्यते भागतोऽपि। परं स्वयमेव 'अस्माकं वितर्कवादार्थमञ्जर्यामित्यादिसमाशंसनात् वितर्कवादार्थमञ्जरी नाम आसीत् अस्य ग्रन्थान्तरमित्यत्र नास्ति सन्देहावसरः।

स्वर्गत-महामहोपाध्याय-हरप्रसादशास्त्रिमहोदयानां खानाकुल-कृष्णनगराभिधाननिबन्धनिबद्धं वचनं प्रमाणभूतं मन्यते चेत् कणाद-तर्कवागीशस्य तर्कवादार्थमञ्जरी तत्त्वचिन्तामणिटीका भाषा-रत्नञ्चेति त्रितये ग्रन्था व्यवतिष्ठन्ते। तत्र चाद्य यावदस्य कोऽपि ग्रन्थो न प्राकाश्यमगात् मुद्रायन्त्रादिसाहायकेन। परमद्य संस्कृत-साहित्यपरिषदः प्रयत्नेन भाषारत्नमिदं मुद्रायन्त्रप्रकृतिनियन्त्रितं प्राकाश्यमासोदति सविधे पदार्थतत्त्वं विदुषाम्। काणादमतसिद्ध-पदार्थतत्त्वप्रतिपादने नैयायिकमतसिद्धपदार्थप्रतिपादने वा ग्रन्थस्यास्य महद् वैशिष्ट्यमुपलभ्यते। नैयायिकतन्त्रेषु सन्ति यद्यपि भाषा-परिच्छेदतर्कामृततर्कसंग्रहादिग्रन्थाः, तथापि तेषां सर्वथा अभ्यर्हितत्वा-

भावेन व्यर्थकामास्तत्प्रणेतारस्तथा सबहुमानं नादरणीया यथा किलास्य भाषारत्नस्य प्रणेता श्रीकणादो नाम।

नहि तावतैव प्रमाणेन वयमेतद्ग्रन्थनिर्म्मातुः श्रीकणादस्य कणाद-महर्षिभिन्नत्वं प्रतिपादयामः, किन्तु प्रमाणान्तरसहकृतेनैव तावता; तत्र कीदृशः पर्य्यनुयोगः ? यावन्ति किल प्रमाणान्तराणि पूर्व्वमुपन्यस्तानि, तैरालोच्यमानैरभिप्रेतार्थस्य कथमप्यनपायात्।

अथेदं भाषारत्नं न्यायदर्शनप्रकरणं वैशेषिकदर्शनप्रकरणं वेति विचार्य्यते।—

आदौ तावद् ग्रन्थकारस्य कणादेति स्वनाम्नः समुपलम्भादेव वैशेषिक-दर्शनप्रकरणमिदमिति सिद्धान्तो बुद्धिपथमारोहति। ये यत्सम्प्रदाय-मनुवर्त्तन्ते, तेषां तत्सम्प्रदायसिद्धनाम्नो बहुत्रैव सन्दर्शनात्। अत एव बृहदारण्यकश्रुतौ 'गौपवनाद् गौपवनः पौतिमाष्यात् पौतिमाष्य' इत्येवं गुरुनाम्ना शिष्यनामनिर्देशः समुपलभ्यते। तद्वदस्यापि कणादमहर्षिनाम-ग्रहणात् कणादमतानुवर्त्तनस्य सिद्धतया इदं प्रकरणं.कणादप्रणीतवैशेषिक-दर्शनमनुवर्त्तत इति व्यवतिष्ठते। यच्च ग्रन्थारम्भे पदार्थसमुद्देशप्रकरणे 'पदार्थो द्विविधः, भावोऽभावश्चेति' वैशेषिकमताद्बहिरभावपदार्थसमुद्देशनं तदपि वैशेषिकसूत्रभाष्यवृत्तिटीकादिसमालोचनेन न वैशेषिकमताद् विशेषं कञ्चिद् गमयति। तत्र तत्र केवलमभावस्य भावज्ञानपरतन्त्रज्ञान-कतया एव भावापेक्षया अप्राधान्यात् न प्राधान्येन समुल्लेखः, न तु तुच्छतया। तथाहि 'अभावप्रत्ययो हि विशिष्टवैशिष्ट्यावगाहिबोध-मर्य्यादां नातिशेत' इति नियमेन अभावज्ञानमात्रस्यैव प्रतियोगिता-वच्छेदकविशिष्टप्रतियोगिवैशिष्ट्यावगाहितया तादृशज्ञाने प्रतियोगिता-वच्छेदकप्रकारकप्रतियोगिज्ञानस्य कारणतायाः सिद्धत्वेन भावात्मक-प्रतियोगिज्ञानमन्तरेण अभावज्ञानं नोपपद्यत इति। अत एव किरणावल्याम् 'अभावस्तु स्वरूपवानपि पृथङ् नोद्दिष्टः प्रतियोगिनिरूपणाधीननिरूपण-त्वात्, न तु तुच्छत्वा'दित्युदयनाचार्य्याः प्राहुः। वैशेषिकमतमनु-

वर्त्तमानेषु नवीनग्रन्थेषु तत एव अभावसप्तमानां द्रव्यादिपदार्थानां समुद्देशो नासङ्गतिं धत्ते।

किञ्च ग्रन्थारम्भे अत्रैव पदार्थसमुद्देशप्रकरणे 'तत्र भावपदार्थो वैशेषिकमते षड्विधः,—द्रव्यगुणकर्म्मसामान्यविशेषसमवायभेदात्' इति वैशेषिकमतसिद्धपदार्थसमुद्देशोऽपि प्रकृतग्रन्थस्य वैशेषिकप्रकरणत्वमभिव्यनक्ति। नहि न्यायप्रकरणग्रन्थं समुपक्रम्य वैशेषिकपदार्थसमुद्देशः कथमपि सामञ्जस्यं लभते। न च मतान्तरप्रदर्शनमात्राभिप्रायेण तद्वचनमिति शक्यं वक्तम्, तथा सति तस्य निरसनेन स्वमतसिद्धपदार्थसमुद्देशस्यापि परतः कर्त्तव्यतापातात्, तस्य च प्रकृते ग्रन्थे अनुपलम्भात् तदिदं वैशेषिकदर्शनप्रकरणमित्येव सिद्धान्तः स्थिरीभवतीति।

किञ्च अर्थाभिधेयत्वं द्रव्यादीनां त्रयाणां साधर्म्यं व्याचिख्यासुः ग्रन्थकारेण 'अर्थाभिधेयत्वम् अर्थपदबोध्यत्वेन वैशेषिकपरिभाषाविषयत्वं तदर्थं' इति प्रतिपादनादपि प्रकृतग्रन्थस्य वैशेषिकप्रकरणत्वमधिगन्तुं शक्यते। नहि न्यायप्रकरणे साधर्म्यव्याख्यानप्रस्तावे वैशेषिकपरिभाषामुपादाय साधर्म्यनिरुक्तिः सुसङ्गतिका, दर्शनान्तरपरिभाषाविषयत्वमुपादाय साधर्म्यान्तरसहस्राणामपरेषामपि तथैव वक्तव्यतापातात्। तदन्यदर्शनपरिभाषाविषयत्वमुपादाय साधर्म्यस्य अभिधानात् वैशेषिकपरिभाषाविषयत्वमुपाश्रित्य साधर्म्यस्य प्रतिपादनाच्च वैशेषिकदर्शनप्रकरणमेवेदं, न न्यायदर्शनप्रकरणमिति सुस्थिरः किल सिद्धान्तः।

नन्वेवं 'तच्च प्रमाणं चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात्। तथा च न्यायसूत्रं प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि' इति ग्रन्थोऽयं कथं सुसङ्गच्छताम्। वैशेषिकसिद्धान्ते किल प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयमङ्गीक्रियते। तदुक्तं वरदराजेन तार्किकरक्षायाम् ;—

प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।
अनुमानञ्च तच्चाथ सांख्याः शब्दञ्च ते अपि।

न्यायैकदेशिनोऽप्येवमुपमानञ्च केचन।
अर्थापत्त्या सहैतानि चत्वार्य्याहुः प्रभाकराः।
अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा।
सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः। इति॥

तदस्य चतुर्विधप्रमाणसिद्धान्तमनुवर्त्तमानस्य वैशेषिकदर्शनप्रकरणत्वमिति कया युक्त्या प्रतिपद्यताम्। न्यायवैशेषिकशास्त्रयोर्युक्तिशास्त्रत्वेन प्रधानतया प्रमाणप्रतिपादकत्वेन प्रमाणमार्गेष्वेव विरुद्धं मतमावेदयदिदं न वैशेषिकशास्त्रं किन्तु न्यायप्रकरणमित्येव युक्तमभ्युपगन्तुम्।

किञ्च वैशेषिकसिद्धान्ते 'समवायोऽतीन्द्रियः नित्यत्वे सति चेतनान्यासमवेतभावत्वादाकाशव'दित्यादिप्रयोगेण समवायस्य अतीन्द्रियत्वसाधनात् अप्रत्यक्षत्वं व्यवस्थितमास्ते। नैयायिकास्तु तादृशानुमानमप्रयोजकं ब्रुवाणा विशेषणताविशेषसन्निकर्षेण समवायस्य प्रत्यक्षं स्वीकुर्व्वते। तेषाञ्चायं प्रकृतमतानुसारी प्रयोगो यथा, 'समवायो लौकिकप्रत्यक्षविषयः योग्यप्रतियोगिकत्वे सति विशेषणतया योग्यवृत्तित्वात् भूतलादिवृत्तिघटात्यन्ताभाववदि'त्यादिः। तादृशानुमानबलेनैव समवायस्य प्रत्यक्षत्वं नैयायिकाः साधयन्ति। तदत्र ग्रन्थे 'विशेषणतासन्निकर्षेण अभावसमवाययोः प्रत्यक्षं जन्यत' इति सन्दर्भेण समवायस्य प्रत्यक्षत्वं प्रतिपाद्य स्वयमेवाभ्युपगतमस्य ग्रन्थस्य न्यायदर्शनप्रकरणत्वमिति को वा न स्वीकुर्वीत।

ननु भोः किमिदमभिधत्से न्यायदर्शनप्रकरणमेवैतत् न वैशेषिकदर्शनप्रकरणमिति। न्यायदर्शने तावत् 'प्रमाणप्रमेयादयः षोडश पदार्था अभ्युपगम्यन्ते, अत्र च समुद्देशे सप्तैव पदार्था इति; तत् पदार्थतत्त्वप्रतिपादनपरस्यास्य ग्रन्थस्य वैशेषिकपदार्थतत्त्वानि प्रतिपादयतो वैशेषिकाभिन्नदर्शनप्रकरणत्वमित्युन्मत्तजल्पितमेवेदम्। अतो वैशेषिकदर्शनप्रकरणमेवेदमित्येव युज्यते वक्तुम्। यच्च चतुर्विधप्रमाणपरिग्रहणं समवायस्य प्रत्यक्षताप्रतिपादनादिकञ्च तन्नैयायिकसिद्धान्ताभ्युपगममात्रेणेति ब्रूमः।

नह्याभ्युपगमवादः शास्त्रकृतामलीक इति ; मतान्तरमभ्युपगम्य तथा तथा वस्तुनिरुक्तावपि न वैशेषिकदर्शनप्रकरणस्यास्य शक्यसम्भावना स्वरूप-हानिरिति विपरीतं मतमपोह्य वैशेषिकप्रकरणत्वमस्य शक्यं निर्णेतुम्।

अन्ये तु वैशेषिकतन्त्रं समानं तन्त्रं गौतमतन्त्रस्य न्यायदर्शनस्य, न्यायसूत्रे प्रतितन्त्रसिद्धान्तदृष्टान्तप्रतिपादनावसरे नैयायिकैस्तथैव व्याख्यानात्। तत् समानेन तन्त्रेणाभ्युपगतस्यार्थस्य स्वग्रन्थे ग्रहणं न तथा दोषाय यथा केवलेनासमानेन तन्त्रेण। समानतन्त्रप्रतिपादिता अर्थाः स्वीयसिद्धान्ते नैव प्रतिकूलतां दधते वस्तुसिद्धाविति तेषां परिग्रहः शक्य एव कर्तुम्। तदत्र वैशेषिकेऽपि प्रकरणे कथमिव न्यायसिद्धान्तसङ्गृहीताः प्रमाणचातुर्विध्यादयोऽर्थाः परिगृहीता इति पर्य्यनुयोगः शक्यसमाधिरेव।

परे तु वैशेषिकतन्त्रं नैयायिकतन्त्रञ्च एकमेव तन्त्रं, न तु मिथो भिन्नम्। परं गौतमकाणादयोः कापिलपातञ्जलयोः वैयासिकजैमिनीययोश्च दर्शनयोः परस्परमभेदबुद्ध्या आस्तिकदर्शनानां षड्विधत्वं प्राधान्यतः सिद्धमपोह्य त्रैविध्यमप्युपपादितं भवति। तदेवमवस्थिते सिद्धान्ते वैशेषिकमतमुपक्रम-माणस्यापि न्यायमतनिवेदनं नैव दोषाय पर्य्यकल्पत उभयोरेकतन्त्रत्वा-दिति। तत्र न्यायदर्शनांशो विचारपद्धतिविनिवेदनपरः, वैशेषिकदर्शनांशश्च पदार्थतत्त्वप्रतिपादनप्रधान इति न कस्यापि व्यर्थत्वम्।

वस्तुतस्तु नेदं वैशेषिकदर्शनप्रकरणम्, नापि प्राचीनन्यायदर्शन-प्रकरणम्, परं तृतीयप्रकारं नव्यन्यायदर्शनप्रकरणमेव, येन वैशेषिक-मतसिद्धपदार्थानां बाहुल्येन परिग्रहेऽपि तदनङ्गीकृतन्यायमतसिद्धप्रमाण-चातुर्विध्यादयोऽर्थाः सुतरां विरुध्येरन्, नव्यन्यायशास्त्रप्रजापतिगङ्गेशोपा-ध्याय-विश्वनाथन्यायपञ्चानन-जगदीशतर्कालङ्कार-रघुनाथशिरोमणिप्रभृति-भिरपि तत्सिद्धान्तमवलम्ब्यैव नव्यन्यायशास्त्रीयविचारस्य प्रस्तुतत्वात् समाहितत्वाच्च। अत एव हि मणिकारा उपमानचिन्तामणिग्रन्थे शक्ति-सादृश्यादीनां सप्तपदार्थातिरिक्तपदार्थत्वमाशङ्क्य तन्निरसनेन सप्तपदार्थ-

सिद्धान्तमेव स्वीयतया व्यवस्थापितवन्तः। न चैतदाशङ्कनीयम्, 'प्रकृतः सप्तपदार्थवादः षोड़शपदार्थवादं विरुणद्धी'ति षोडशपदार्थानां न्यायसूत्रोपात्तानामत्रैव सप्तसु पदार्थेषु अन्तर्भावस्य प्राक्तनग्रन्थकारैरुपदर्शितत्वात्।

तदिदं प्राचीनन्यायदर्शनस्य वैशेषिकदर्शनस्य च अन्तराले व्यवतिष्ठमानं तृतीयरूपं नव्यन्यायदर्शनप्रकरणमिति निरपवादः कृतान्तः। अत एव हि 'वैशेषिकस्तु शब्दो न प्रमाणान्तरम्' इत्यारभ्य 'उक्तप्रतिबध्यप्रतिबन्धभावलक्षणस्यैव बाधकत्वात्' इत्यन्तग्रन्थेन शब्दस्य प्रमाणान्तरत्वकल्पे दोषं पूर्वपक्षीकृत्य 'अत्र नव्यनैयायिकाः;—वैशेषिकमते बहुशो गौरव'मित्यादिग्रन्थेन नव्यनैयायिकमतसिद्धं तत्त्वं सिद्धान्तविधया व्यवस्थाप्य नव्यन्यायप्रकरणत्वमेवास्य ग्रन्थकर्त्रा सुसम्पादितमुपलभ्यते। तदिदं नव्यन्यायप्रकरणमेवेति निष्प्रत्यनीकम्।

अथेदानीं भाषारत्नसम्बन्धिनी वस्तुसमालोचना प्रारभ्यते।—उक्तमेवेदमधस्तात्, 'यत् सत्स्वपि परःशतेषु तर्कभाषापरिच्छेदकग्रन्थेषु, तत एव च प्रायेण निवृत्तायां तर्कपदार्थविषयिण्यां जिज्ञासायां, सम्पन्नप्राये च तेनैव तर्कविज्ञानमभिलषतां विद्यार्थिनां तार्किकविज्ञाने, कं विशेषमुररीकृत्य विरचितोऽयं नवीनग्रन्थः श्रीकणादेन इति। तत्र वयं ब्रूमः—ग्रन्थान्तरेभ्यः किलास्य ग्रन्थस्य तार्किकपदार्थप्रतिपादनरीतिः सुसमीचीना। तथैवात्र वस्तूनि ग्रन्थकारो निबबन्ध, यथा सुतरामपेक्षिता अर्था न हीयेरन्, नापि विशेषविस्तरादिदोषेण बुभुत्सवो मोहमासीदेयुः। तदिदं सोदाहरणं सविशेषं प्रतिपादयितुं यतामहे।—

आदौ तावत् भावाभावभेदेन पदार्थद्वैविध्यं निरुक्तवता प्रकृतग्रन्थकारेण पदार्थप्रतिपादने वैशिष्ट्यं किञ्चिदवलम्बितमेव। दृश्यते बहुष्वेव तर्कपरिभाषा-ग्रन्थेषु आदौ भावाभावभेदेन पदार्थद्वैविध्यमनभिधाय षट्पदार्थनिर्वचनं सप्तपदार्थनिर्वचनं वा। तेन हि षण्णां भावपदार्थत्वस्य सप्तमस्याभावपदार्थत्वस्य च फलतो बुद्धिगतत्वेऽपि प्रणिधानगम्यतया सरलधियस्तत्र मुह्यन्ति, परन्तु स एवोपयुज्यते भाषादिप्रतिपत्तिग्रन्थेषु

क्रमो यः किल निपुणधियां सरलधियाञ्च तुल्यतयैव सर्वत्र व्युत्पत्तिमाधत्ते, नेतरः। अत्र हि ग्रन्थे यत्र यत्र यं यं विषयमधिकृत्य सिद्धान्ता निरूपितास्तत्र तत्रैव तस्मिन् विषये समीचीना सुगमा च युक्तिरप्युपन्यस्ता दृश्यते। ये तावत् सुतरामृजुबुद्धयस्ते सिद्धान्तमात्रेणैव परितृप्तिं गच्छेयुः, परं ये ततो निपुणधियस्तेषां 'कथमेतत्' इति पर्य्यनुयोगः स्वान्तमाक्रामत्येव, यावच्च तस्य पर्यनुयोगस्य न समाधिस्तावत् प्रकृतसिद्धान्तबुद्धावप्रामाण्यसंशयसम्भवेन व्यर्थ एव पदार्थतत्त्वसिद्धान्तवाद इति सहैव युक्तिरपि निर्वक्तव्या। युक्तयश्च यदि सुतरां गभीराः सुदुर्गमाश्च स्युस्तदा ग्रहणधारणपटूनामपि प्रथमविद्यार्थिनां दुरवबोधतया तदुपन्यासः फलवत्तामतिकामेत्। अतः प्रतिपदं प्रतिवस्तुविवरणप्रस्ताव एव सुगमयुक्तिसमन्वितानर्थानभिदधता ग्रन्थकृता प्रतिपादितो महानेवास्य ग्रन्थस्य ग्रन्थान्तरेभ्यः समुत्कर्षः। तद् यथा प्रथमत एव वैशेषिकमतसिद्धान् षडेव पदार्थानुपक्रम्य द्रव्यत्वस्य जातित्वप्रस्तावे संयोगसमवायिकारणतावच्छेदकतया तस्य जातित्वसिद्धान्तः प्रकटीकृतः, तस्य प्रयोगरीतिस्तु अत्रैव मत्कृतटीकायां रत्नलक्ष्मीत्यभिधानायामनुसन्धेया, अत्र पुनर्विस्तरभयान्नोपन्यस्यते।

तत्र हि संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन कारणत्वं कल्पसमवलम्ब्यैव द्रव्यत्वजातिसिद्धिः कृता। तादृशकारणत्वस्य द्रव्यत्वजातिसाधकतया परिग्रहे स्वत एव युक्तिमनुसन्दधतां प्रादुर्भवति जिज्ञासा, यत् संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन कारणत्वमनङ्गीकृत्य संयोगत्वावच्छिन्नं प्रति सत्तावत्त्वादिना कारणत्वं शक्यवचनं न वा, शक्यवचनं चेत् तावता द्रव्यत्वजातिसिद्धिः सुदूरापेता भवति ; अतः सत्तावत्त्वादिना धर्मान्तरेण यथा संयोगसमवायिकारणता न स्यात् तथा उपपादनीयम्। तत एव 'न च सत्ताजातिरेव तत्समवायिकारणतावच्छेदिका इति वाच्यं गुणादावपि संयोगोत्पादापत्तेः ; तत्रापि सत्तासत्त्वा'दिति ग्रन्थभागो ग्रन्थकारेणोपाग्राहि। यद्ययमंशो ग्रन्थेऽस्मिन्नपन्यस्तो न स्यात्, तदा

तादृशीं जिज्ञासाम् इतरजना नैव निवर्त्तयितुमर्हन्तः पदार्थतत्त्वनिश्चये नितरामशक्ता ग्रन्थकृत्प्रयत्नस्य वैफल्यमेव समुपपादयेयुरिति। अतस्तत्र तत्र तथा तथा सरलधियापि सुगमस्य युक्तिपर्य्यायस्य विनिवेदनेन विद्यार्थिनामनुकूलिता दृढा प्रतिपत्तिः पदार्थतत्त्वपर्य्याये, विनिवर्त्तिता च तादृशी तादृशी जिज्ञासा।

उद्देशो लक्षणं परीक्षा चेति त्रिविधः किल शास्त्रार्थः। तत्र प्रथमतः समुद्देशः, अनन्तरं लक्षणम्, ततोऽपि परीक्षा इति क्रमेण त्रीणि वस्तूनि शास्त्रेण प्रतिपाद्यन्ते। अत्रापि तथैव रीतिरनुसृता ग्रन्थकारेण। उद्देशो नाममात्रेण पदार्थानां संकीर्त्तनमिति। यथा 'पदार्थो द्विविधः भावोऽभावश्चेति तत्र भावपदार्थः वैशेषिकमते षड्विधः द्रव्यगुणकर्म्म-सामान्यविशेषसमवायभेदात्' इति विभागस्यापि उद्देशमध्ये गणनात् सोऽपि समुद्देश एव।

अनन्तरञ्च लक्षणम्। लक्षणं नाम व्यावर्त्तकोऽसाधारणो वा धर्म्मः। तथाहि अव्याप्तिरतिव्याप्तिरसम्भवश्चेति त्रिविधदोषरहितो धर्म्म एव लक्षणमित्यायाति। अत एव लक्षणनिरूपणप्रसङ्गे सर्व्वत्रैव लक्षणस्य यथा नाव्याप्त्यतिव्याप्त्यसम्भवदोषसम्भवस्तथा प्रतिपादनीयम्, लक्ष्येषु च लक्षणसङ्गतिः प्रदर्शनीया, अन्यथा प्रकृतवस्तुबोधस्य विघटनसम्भवः स्यात्। तथाहि आदौ गुणाश्रयत्वं द्रव्यलक्षणमुपन्यस्तं ग्रन्थकारेण ;—तत्र द्रव्यमात्र एव गुणवत्त्वस्य अव्यभिचारात् क्षित्यादिनवद्रव्येष्वेव लक्षण-सङ्गतिरिति प्रदर्शितं स्वयमेव। पुनराद्यलक्षणे घटादौ गुणाभावेन गुणाश्रय-त्वस्य तत्राव्याप्त्या लक्षणान्तरं तथा प्रक्रान्तं यथा नैष दोषः प्रकृते पदं कुर्य्यात् ; तद् यथा 'रूपासमवेतपृथिवीसमवेतजातिमत्त्वम्' इति।

अत्र प्रतिपदं व्यावृत्तिरपि स्वयमेवोपदर्शिता। नैयायिकाः किल लाघवेनैव बहूनि वस्तूनि व्यवस्थापयन्ति, गौरवास्कन्दितञ्च परिहरन्ति, लघुधर्म्मस्य लक्षणत्वसम्भवे गुरुधर्म्मस्य लघुधर्म्मघटितस्य वैयर्थ्यञ्च अङ्गीकुर्व्वते। वैयर्थ्यञ्च स्वसमानाधिकरणसाध्यव्याप्यतावच्छेदकधर्म्मान्तर-

घटितत्वम्। यत्र लघुधर्म्मस्यापि अव्याप्त्यादिदोषराहित्यं तत्र तद्घटितस्य समानाधिकरणधर्म्मस्य वैयर्थ्यलक्षणाक्रान्ततया प्रकृतलक्षणं यथा ततो लघुतरं न शक्यं कर्त्तुमिति विशेषतः प्रदर्शनीयम्; अत एव लक्षणघटकपद-व्यावृत्तयः प्रदर्श्यन्ते। ग्रन्थान्तरेषु सरलसरला व्यावृत्तयः परिहियन्ते, समुपादीयन्ते च सुदुर्गमाः। सुगमाः पुनः सुगमा एव साधारणैरिति मत्वा तद्व्यावृत्तिप्रदर्शनं ग्रन्थगौरवमात्रफलं मन्यते। परं सरलधियः प्रकृतार्थं बोद्धुमशक्नुवन्तो विशेषणादिसार्थक्यम् अवधारयितुमक्षमा लघुविज्ञाना एव सन्तिष्ठन्ते। तेन तत्तत्सिद्धान्तेषु परिपाकमनासाद्य उत्तरोत्तरं दुरूहेषु ग्रन्थेषु प्रवेशमनाप्नुवन्तः स्वस्वसम्प्रदायसिद्धमर्थं स्वयमनवबुध्य परान् प्रत्याययितुं न क्षमन्ते, तेन तत्तत्सम्प्रदाय एव विच्छिद्यते। विद्या च लघीयस्तां क्रमेणोपादत्ते। अत एव शिक्षायाः प्रथमसोपानात् प्रभृति तथा प्राथमिकशिक्षाप्रवर्त्तकैः प्रयतितव्यम्, यथा,—सुगमोऽप्यर्थो नैव परिहीयते, नाप्यतिदुर्गमार्थ उपा-दीयते। तत्तत्सम्प्रदायसिद्धाः पारिभाषिका अर्था विचारपद्धतयश्च यत्र कुत्रापि परीक्षितव्या एव। तद् यदि तेऽर्थाः प्रथमतः शिक्षाप्रवर्त्तकैरुपे-क्ष्येरन्, तदा क्व वा समवसरस्तद्विज्ञानस्य। अत एव द्रव्यलक्षणात् प्रभृति यावतां वस्तूनामनेन ग्रन्थकारेण प्रस्तुतानि लक्षणानि, तत्र सर्व्वत्रैव सुगमानामपि पदानामंशतोऽप्यनुपेक्षणेन परिदर्शिताः सुगमसुगमा व्यावृत्तयः पिपठिसूनां बालानां व्युत्पत्तिविशेषोपजननाय।

तदिदं भाषारत्नम् आदितः प्रभृति समाप्तिपर्य्यन्तमालोच्यते चेत् अयमेव भावो मनसि समुदेति, यथा,—परिणतं विज्ञानमधिकृत्य स्वयं बालकीभूय बालानां बोधस्य कियानवधिरिति सविशेषं विदित्वैव इमं ग्रन्थं ग्रन्थकारो विनिर्म्ममे। अन्यथा कथमिव बालानां प्रथमविद्यापरिग्रहे उपयुक्तं पन्थानमवलम्ब्य ग्रन्थस्यास्य निर्म्माणं तेन ग्रन्थकृता सुकरं सम्पद्येत। प्रशस्तः किलायं पन्थाः प्रथमशिक्षायाम्। एतं मार्गमतिक्रम्य वर्त्तमानस्तन्त्रकारो नावधेयवचनो भवति प्रथमविद्यार्थिसमाजेषु, शोच्यतामाश्रयते च तत्त्वविदां विपश्चिताम्।

अत्र हि ग्रन्थे संज्ञाभेदनिरूपणप्रकरणे जगदीशकृतशब्दशक्तिप्रकाशिका-ग्रन्थात् किञ्चिद् वैषम्यमुपलभ्यते। तदुक्तं 'संज्ञा तावत् त्रिविधा साङ्केतिकी पारिभाषिकी नैमित्तिकी च, तत्र साङ्केतिकी पारिभाषिकी च व्याख्याता, जातिप्रवृत्तिनिमित्तिका हि संज्ञा साङ्केतिकी। पारिभाषिकी संज्ञा शृङ्गग्राहिकान्यायेन व्यक्तिविशेषबोधिका, नैमित्तिकी च उपाधि-प्रवृत्तिनिमित्तिका संज्ञा।' इति अत्रैव भाषारत्ने। जगदीशस्तु शब्द-शक्तिप्रकाशिकायाम् औपाधिकी नैमित्तिकी पारिभाषिकी चेति त्रिविधसंज्ञा व्याचष्टे। तत्र 'जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता' इति लक्षणेन एतन्मतसिद्धसाङ्केतिकसंज्ञाया एव नैमित्तिकसंज्ञात्वं सुस्थितं भवति। 'उभयावृत्तिधर्मेण संज्ञा स्यात् पारिभाषिकी' इति पारिभाषिकसंज्ञालक्षणन्तु प्रकृतग्रन्थेऽपि तुल्यतामेव धत्ते। परम् औपाधिकस्य जगदीशमतसिद्धस्य नैमित्तिकत्वमित्येव विशेषः पर्य्यवतिष्ठते। एतन्मते औपाधिकसंज्ञायाः पृथक्तया अनुपादानात् लक्षणैक्याच्च।

अत्रैव कारणत्रयनिरूपण-प्रस्तावे दर्शितं ग्रन्थकारेण किञ्चिदनितर-साधारण्यम्। तथाहि—ननु पटं प्रति तन्तोरेव कथं समवायिकारणत्वम्, तन्तुसम्बन्धीभूयेव तुर्यादिसम्बन्धीभूयापि पटजननादिति चेन्न तुर्यादौ पटसम्बन्धित्वेऽपि समवायाभावात्। अयुतसिद्धयोरेव हि सम्बन्धः समवायः, अयुतसिद्धौ च तावेव ययोर्द्वयोर्मध्ये एकमविनश्यदवस्थं सत् अपराश्रितमेवावतिष्ठत इति। तादृशसमवायस्वरूपनिरूपणेन सत्यपि प्राचीनसंवादे तथा परिष्कृत्य प्रदर्शितं तद् यथान्यत्र नोपलभ्यते।

किञ्च ध्वंसरूपाभावकार्यस्थले समवाय्यसमवायिरूपकारणद्वयस्य सुतरामसम्भवेन तद्घटितनिमित्तकारणस्याप्यसम्भवात् 'दण्डेन घटो नष्ट' इत्यादिप्रतीतेः का गतिरिति पर्य्यनुयोगसमाधये गृहीतो नवीनः पन्थाः; यथा—'समवायिकारणत्वभिन्नं सदसमवायिकारणत्वभिन्नं यत् कारणत्वं तन्निमित्तकारणत्वमिति। तथाहि समवायिकारणतायां असमवायिकारण-तायाश्च सामान्यतो विशेषतो वा निरूपणेऽपि सर्वथैव निमित्तकारणतायास्ततो

भिन्नतया समवाय्यसमवायिकारणासत्त्वस्थलेऽपि ध्वंसाभावरूपकार्यादौ ने दोषः, नापि दण्डरूपादिनिरूपितसमवायिकारणत्वादिमतो दण्डादेः सामान्य तया समवाय्यसमवायिकारणभिन्नत्वाभावेन तत्र घटनिमित्तकारणत्वा द्यनुपपत्तिरिति।

एकत्रैव दण्डादौ किञ्चिन्निरूपिता यैव समवायिकारणता किञ्चि न्निरूपिता असमवायिकारणता वा, न सैव कार्यान्तरनिरूपिता निमित्तकारण तापि, अत एकत्रैव दण्डादौ घटादिनिरूपितकारणतालक्षणायाः कारणताया दण्डरूपादिनिरूपितकारणताभिन्नतया तत्र निमित्तकारणलक्षणमपि सुसाधित भवति। सामान्यतः समवाय्यसमवायिकारणभिन्नत्वे सति कारणत्व निमित्तकारणत्वमित्येतादृशस्य निमित्तकारणलक्षणस्य निरूपणे तु दण्डादौ घटादिनिमित्तकारणता न सङ्गच्छेत, दण्डादीनां घटादिकारणत्वस्येव दण्डरूपादिनिरूपितसमवायिकारणत्वादिमत्त्वात्, अतः सम्यगुपपादित समवायिकारणत्वादिभेदं निमित्तकारणतालक्षणे धर्मे सन्निवेश्येति सर्व चतुरस्रम्।

प्रत्यक्षादिप्रकरणे च इन्द्रियाणां तत्सन्निकर्षादीनाञ्च तथा सुगमरीत्य विस्तरेण च विचारितः कार्यकारणभावः, यथा दर्पणप्रतिबिम्ब इव निरुक्त कार्यकारणभावो हृदये पदमाधत्ते।

निर्विकल्पकसविकल्पकभेदेन द्विविधं प्रत्यक्षमुपक्रम्य सविकल्पकज्ञान लक्षणघटकप्रकारताविवरणप्रसङ्गेन ज्ञानीयचतुर्विधविषयता निर्विकल्पक विषयता-प्रकारता-विशेष्यता-संसर्गतालक्षणाः सोदाहरणाः समुपन्यस्त सुतरामनुकूलितं प्रथमपाठार्थिनां विषयताविज्ञानम्।

अस्ति यद्यपि विधेयतालक्षणम् अवच्छेदकतादिलक्षणमपि विषयत्वान्त प्रतीतिविशेषनिरूपितं, तथापि विधेयतायाः पर्वतो वह्निमान् इत्याद्यनुमिति प्रकारत्वस्वरूपत्वोक्तावेव पर्वते वह्निरित्यादिसाध्यविधेयकानुमित्यादिस्थले विशेष्यत्वस्वरूपत्वोक्तावेव अवच्छेदकस्यापि किञ्चिद्विशेष्यांशे विशेषणतय भाननियमात् अवच्छेदकताया अपि प्रकारत्वस्वरूपत्वोक्तावेव सामञ्जस्ये

अतिरिक्तविषयताविभागस्य कर्त्तव्यतामार्गमतिक्रम्य वर्त्तमानत्वात् न न्यूनता।

किञ्च अनुमितिपरामर्शयोः कार्यकारणभावविचारप्रसङ्गे परामर्शत्वेन अनुमितित्वावच्छिन्नं प्रति कारणत्वमुपक्रम्य परामर्शत्वस्य जातित्ववादिनां मतं पूर्वपक्षीकृत्य चाक्षुषत्वादिना साङ्कर्य्येण प्रतिषिद्धम्। अनन्तरञ्च परामर्शत्वस्य मानसत्वव्याप्यजातित्वमभ्युपेत्य तादृशसाङ्कर्य्यवारणं प्रक्रम्य भक्तित्वेन सह साङ्कर्य्यात् परामर्शत्वं न जातिरिति नवीनया दिशा कृतः सिद्धान्तः। तदत्रापि वैलक्षण्यमस्य ग्रन्थकृतो भिन्नग्रन्थकारेभ्यः समनुभूयते।

पुनस्तत्रैव कार्यकारणभावविवरणप्रस्तावे सिद्धान्तप्रतिपादनावसरे, "अत्र वदन्ति ; धूमलिङ्गकपर्वतविशेष्यकवह्निविधेयकानुमितिं प्रति पर्वतविशेष्यकवह्निव्याप्यधूमप्रकारकनिश्चयत्वेन हेतुत्वमित्यत्र धूमलिङ्गकत्वं जातिविशेष" इति नवीनं मतमुपादाय ग्रन्थकारेण। धूमलिङ्गकत्वं नाम धूमपरामर्शाव्यवहितोत्तरजायमानत्वमित्येव साम्प्रदायिकः सिद्धान्तः ; धूमलिङ्गकत्ववत् आलोकादिलिङ्गकत्वस्यापि तथैव जातित्वात् आलोकलिङ्गकत्वादिना साङ्कर्य्यात्। परस्मिन् सिद्धान्ते उभयलिङ्गपरामर्शोत्तरजायमानायाम् अनुमितौ धूमलिङ्गकत्वस्य आलोकलिङ्गकत्वस्य च सहैव सत्ताया अनभ्युपगमादुभयलिङ्गकत्वलक्षणाया एकस्या एव विभिन्नजातेरभ्युपगमाच्च न साङ्कर्य्यमिति प्रतिपादितमास्ते। तदेतेन धूमपरामर्शाव्यवहितोत्तरजायमानत्वरूपधूमलिङ्गकत्ववादिनो विजिता धूमलिङ्गकत्वस्य जातिरूपस्य स्वीकर्तृभिर्लाघवप्रियैरिति।

यच्च लिङ्गोपहितलैङ्गिकभानं परतो विद्यार्थिभिः सामान्यनिरुक्तिप्रभृतिग्रन्थेषु बाहुल्येनाधिगन्तव्यम्, तस्यापि कृतोऽत्रैव ग्रन्थे श्रीमता ग्रन्थकारेण बीजवापः, येन हि तदा तदा तादृशलिङ्गोपहितलैङ्गिकभानादयो नाकस्मिकतां दध्युरिति। लिङ्गोपहितलैङ्गिकभानञ्चात्र तथा परिष्कृत्य दर्शितं यथा शब्दव्युत्पत्तिविचारेणैव सोऽयं सिद्धान्तो बुद्धावारोहति।

तथाहि 'लिङ्गोपहितलैङ्गिकभानमित्यस्य हि साध्यव्याप्यस्वरूपं यल्लिङ्गं तद्विशिष्टे लैङ्गिकभानं लिंगजन्या साध्यप्रकारिका अनुमितिरित्यर्थः।' इति एतस्मादधस्तादेव च तन्मतसिद्धानुमित्याकारस्य प्रदर्शनात् तत्र न्याय-विद्यार्थिनां समपसारितो व्यामोहः। तथाहि—"अचार्यास्तु लिंगोपहितलैङ्गिक भानं स्वीकृत्य वह्निव्याप्यधूमवान् पर्वत इति परामर्शात् वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इत्याकारिका अनुमितिर्जायते, वह्निव्याप्यालोकवान् पर्वत इति परामर्शाच्च वह्निव्याप्यालोकवान् पर्वतो वह्निमान् इत्याकारिका अनुमितिर्जायते। एवं भस्मादिलिंगकस्थलेऽपि बोद्धव्यमिति वदन्ति", इति।

तदेवं भाषारत्नग्रन्थः सविशेषमालोच्यते चेत्, पदार्थतत्त्वेषु ततस्तथा विद्यार्थिनां विज्ञानं सम्पद्यते, यथा पदार्थतत्त्वविज्ञानस्य लेशोऽपि नावशिष्यते। प्रथमतः शिक्षार्थिभिर्ये ये पदार्था बोधविधावपेक्षितास्ते सर्व एव निःशेषमत्र प्रतिपादिताः, युक्तिपरम्परया च कृता तत्र तत्र तेषां सकलाजज्ञासाविनिवृत्ति रिति प्रचारयितुं शक्यते सघण्टाघोषम्। परमिदमत्र महदेव दुःखस्थानं, यदद्य-यावत् नैयायिकसम्प्रदायेषु नास्य तथा प्रचारो यथा भाषापरिच्छेदादिग्रन्थानां, गुणगणनायान्तु प्रथितग्रन्थेभ्यः सुतरामस्य प्रकर्षो वरीवर्त्ति। तदाशास्महे यदतः परं भाषारत्नस्यास्य पदार्थतत्त्वावधारणे परामुपयोगितामवगच्छन्तो नैयायिका नितरामस्य प्रचाराय प्रयतेरन्निति।

संस्कृत-साहित्यपरिषन्नाम वहोः कालात् प्रभृति भारते वर्षे प्रतिष्ठा-मुपेयुषी नानाविधैरेवोपायैः सम्पादयति महनीयां सम्पदं संस्कृतविद्यायाः। तत्रान्यतम उपायः सुदुर्लभप्रचाराणां गभीरार्थग्रन्थानां मुद्रणादिद्वारेण सर्वत्र प्रचारणम्। अद्य यावत् सा किल संस्कृत-साहित्य-परिषत् प्रचारयामास बहून्येव ग्रन्थरत्नानि, येषां प्रकर्षः समनुभूयते विद्याद्रविणविश्रुतैर्महत्तरान्तः-करणिकप्रशस्तिपरम्पराभिः। तेषु तावत् कालीतन्त्रं, छन्दोगमन्त्रभाष्यं, पवनदूतं, ऋक्प्रातिशाख्यं, सायणभाष्योपक्रमणिका, मुक्तिवादः, प्रशस्त-पादभाष्यसूक्तिश्चेत्यादयो ग्रन्था नाम्ना विशेषतः समुल्लेखमर्हन्ति। अथेदानीं प्रकाशं नीयते भाषारत्नग्रन्थस्तयैव परिषदा सविधे विदुषाम्।

बहुतिथः किल कालो व्यतिक्रान्तः संस्कृत-साहित्यपरिषदो मयि भाषा-रत्नग्रन्थसम्पादनभारं प्रतिपादितवत्याः, परमन्तरा नानाविधकृत्य-परम्परया प्रतिहतैततकृत्यप्रयत्नेन मया न पारितं तावतापि कालेन ग्रन्थरत्नमिदं सम्पादयितुम्। तदत्र एतद्ग्रन्थप्रकाशं साग्रहमपेक्षमाणानां विदुषां पारिषदानाम् अनुकम्पाजनिं क्षमामपेक्षामहे।

अस्य ग्रन्थस्य सम्पादनावसरे त्रीणि हस्तलिखितपुस्तकानि मया लब्धानि। तेषु द्वे संस्कृत-साहित्यपरिषदो ग्रन्थागारस्य, अपरमेकं च कलिकाता-एशियाटिकसोसाइटीग्रन्थागारस्य, तत्र प्रथमद्वयं—बङ्गाक्षर-मयं द्वितीयञ्च देवनागराक्षरनिबद्धम्। तेषु परिषद्ग्रन्थयोरेकः सम्पूर्णः, अन्यश्च खण्डितः। त्रयाणां ग्रन्थानां यत्र यत्र यादृशः पाठः समुपलब्धः, तत्र तादृश एव पाठो मूलपाठपादटीकापाठान्य-तररूपेण परिगृहीतः। त्रयाणां लिपिग्रन्थानां पाठं विचार्य य एव समीचीनतया अवधारितः, स एव मूलपाठरूपेण इतरश्च पादटीकापाठरूपेण सन्निवेशितः। विद्यार्थिनां बोधसौकर्य्याय रत्नलक्ष्मीनाम्नी कापि टीकाप्यत्र सन्निवेशिता संस्कृतभाषामयी। अतिसुगमतया चास्य ग्रन्थस्य अस्मत्-सम्पादितमुक्तिवाद-प्रशस्तपादभाष्यसूक्तिवदत्र बंगभाषामयी विवृतिर्न सन्नि-वेशिता। मानुषधर्मः किल भ्रान्तिः, तदत्र मानुषधर्मतया स्वल्पज्ञतया च सम्भाव्यमानां भ्रान्तिं विद्वांसः सानुकम्पं यदि सहेरन्, तदैव वयमनुगृहीताः परिश्रमं सफलं मंस्यामहे। इति शम्।

आश्रव—

श्रीकालीपदतर्काचार्यस्य

सम्पादकस्य

———

तर्कशास्त्रीय-कतिपय-

# पारिभाषिकपदार्थविवृतिः

विदितमेवेदं विदितवेदितव्यानां विदुषां यद् व्यवहारसौकर्याय प्रायः सर्वेष्वेव शास्त्रेषु केचन केचन पारिभाषिकशब्दाः प्रयुज्यन्ते। तत्र शास्त्रान्तरापेक्षया नव्यन्यायशास्त्रे तेषामत्याधिक्यमुपलभ्यते। तत्तत् पारिभाषिकशब्दानाञ्च विशेषार्थज्ञानमन्तरेण दुरवबोध एव तच्छास्त्रार्थः। सुखेन तदवगमाय च किमपि प्रकरणादिकं तथा नोपलभ्यते, यत् प्रथम-पाठार्थिनां महदुपकुर्यादतस्तदर्थं किञ्चित् प्रयत्यते। तत्रादौ प्रति-योगित्वपदार्थो विचार्येत, परत्रश्चान्ये

---

## अभावीय-प्रतियोगित्वम्

प्रतियोगो विरोधः, सोऽस्य अस्तीति प्रतियोगी विरोधीत्यर्थः। प्रति-योगिनो भावः प्रतियोगित्वमिति कथञ्चिद् व्युत्पत्त्या प्रतियोगिन्-शब्दाद् भावत्वप्रत्ययेन प्रतियोगित्वमिति पदं निष्पद्यते। तस्मिन्नेवार्थे तल्-प्रत्ययेन प्रतियोगितेत्यपि तदर्थकमेव पदं सिध्यति। लोकेऽपि प्रतियोगि-शब्दो विरोधिनि अर्थे प्रयुज्यते, यथा को वात्र मे प्रतियोगीत्यादि। शास्त्रेऽपि तदर्थेनैवेयं परिभाषेति वस्तुपर्यालोचनया व्यवतिष्ठते। तथाहि यस्याभावः स प्रतियोगी। यत्र योऽभावः तत्र तत्प्रतियोगिनः सत्त्वं नास्ति, अत एव सहानवस्थानलक्षणो विरोधः प्रकृते सूपपद्यते। यत्र

गृहादौ घटाद्यभावो यद्देशावच्छेदेन किञ्चिदनवच्छेदेन वा वर्त्तते, तत्र तदवच्छेदेन निरवच्छिन्नतया वा घटादिर्न स्थातुमर्हति। सम्भवति हि देशविशेषावच्छेदेन तस्मिन्नेवाधिकरणे अधिकरणान्तरे निरवच्छिन्नतया वा, अत एव घटादौ घटाद्यभावप्रतियोगित्वं सङ्गच्छते।

वस्तुतस्तु प्रतियोगित्वं न विरोधित्वं मणिकारादिभिस्तन्मतस्य दूषितत्वात्। तदुक्तं पूर्व्वपक्षग्रन्थे मणिकारेण; 'प्रतियोगित्वं न विरोधित्वं सहानवस्थाननियमलक्षणं गोत्वाश्वत्वयोरतथात्वात् अन्योन्याभावप्रतियोगिन्यसत्त्वाच्च।' इति।

तदिदं प्रतियोगित्वं स्वरूपसम्बन्धरूपमिति केचित्। तदुक्तं सिद्धान्तलक्षणे शिरोमणिना,—'प्रतियोगित्वादिश्च स्वरूपसम्बन्धविशेषो न सम्बन्धत्वेन प्रविष्ट' इति। अखण्डोऽतिरिक्तधर्मविशेष इति परे। तदुक्तं सिद्धान्तलक्षणे शिरोमणिनैव,—'विषयतातत्त्वादिवत् प्रतियोगित्वाधिकरणत्वतत्त्वसम्बन्धत्वादयोऽप्यतिरिक्ता एव पदार्था इत्यप्येकदेशिन' इति। प्रतिकूलसम्बन्धवत्त्वमित्यन्ये। स्वाभावविरहात्मत्वमित्याचार्याः।

तत्र प्रतियोगित्वस्य स्वरूपसम्बन्धतास्वीकर्त्तृनये तत् प्रतियोगिस्वरूपं प्रतियोगितावच्छेदकस्वरूपं प्रतियोग्यभावोभयस्वरूपं वा स्वीक्रियते। तदुक्तं जगदीशेन सिद्धान्तलक्षणे, 'प्रतियोगिस्वरूपमवच्छेदकस्वरूपं वा यत् प्रतियोगित्वं, तदपि कस्यचिदभावस्य केनचिदेव धर्म्मेण सम्बन्धेन चावच्छिन्नं व्यवहारबलाद्' इति। अवच्छेदकत्वनिरुक्तौ पुनः,—'स्वरूपसम्बन्धात्मिकायाः प्रतियोगितायाः' इति शिरोमणिसन्दर्भविवरणप्रसङ्गेन 'स्वरूपसम्बन्धात्मिकाया इति प्रतिव्यक्तिभिन्नत्वे हेतुः, प्रतियोगितदभावोभयस्वरूपाया इति तदर्थ' इति जगदीशेनैवोक्तम्। प्रतियोग्याद्यन्यतमस्वरूपत्वनये प्रतियोगिनो घटादेः घटाद्यात्मकप्रतियोगितदभावोभयस्य प्रतियोगितावच्छेदकस्य घटत्वादेर्वा घटत्वघटतदभावोभयत्वघटत्वत्वादिरूपेण स्वरूपेण सम्बन्धेन अवृत्तिमत्त्वेऽपि प्रतियोगितात्वेन रूपेण स्वरूपेण सम्बन्धेन वृत्तिमत्त्वमभ्युपेयते।

अखण्डो धर्म इति कल्पे अतिरिक्तमेव तत्। इदञ्च सिद्धान्तलक्षणे शिरोमणिना समुपन्यस्तेनैकदेशिमतानुवादेनोपदर्शितमधस्तात्।

प्रतिकूलसम्बन्धवत्त्वमिति कल्पे घटो नास्तीति प्रतीतिसिद्धाभावस्य प्रतिकूलः सम्बन्धो घटप्रतियोगिकसंयोगादिः, तद्वत्त्वात् तत्प्रतियोगित्वात् घटादिः प्रतियोगी। सम्बन्धनिरूपितं प्रतियोगित्वञ्चाग्रे व्यक्तीभविष्यति। तन्मन्दं, संयोगादिना गुणाद्यभावस्थलेऽप्रसिद्धेः।

तदिदं प्रतियोगित्वम् अभावेन निरूपितमेव, नत्वभावस्य निरूपकमपि। यथा घटो नास्तीति प्रतीतिसिद्धाभावे घटनिष्ठं प्रतियोगित्वं घटाभावनिरूपितं, न तु तन्निरूपकमपि तत्। एतेन घटो नास्तीत्याद्यभावपरिष्कारे कर्त्तव्ये घटनिष्ठप्रतियोगितानिरूपकोऽभाव इत्येवापाततो वस्तु वर्णनीयं भवति। अयमीदृशोऽभावनिरूपितप्रतियोगितापरिष्कारः।

स्वरूपसम्बन्धरूपाया अस्याः प्रतियोगितायाः प्रतिप्रतियोगिव्यक्ति भेदः शास्त्रकृतामनुमतो दृश्यते। यथा घटो नास्तीत्याद्यभावनिरूपिताः प्रतियोगिता यावन्तो घटास्तावत्य एव, न तु सकलघटवृत्तिरेका घटत्वादिजातिरिव।

स्वाभावविरहात्मत्वमिति कल्पे स्वपदेन प्रतियोगित्वेनाभिमतो घटादिः, तस्य योऽभावः घटाद्यभावः, तस्य यो विरहः अभावः घटाद्यभावाभावः स एव आत्मा स्वरूपं यस्य स स्वाभावविरहात्मा तस्य भाव इति व्युत्पत्त्या बहुव्रीहिसमासोत्तरं त्वप्रत्ययेन घटाद्यभावाभावस्वरूपत्वमेव घटाद्यभावप्रतियोगित्वमिति व्यवस्थितं भवति। तथाहि यत्र घटोऽस्ति तत्र घटो नास्तीत्यभावो नास्ति, घटाभावो नास्तीत्यभावस्तु वर्त्तते, तदस्य घटवत्येव नियमेन सतो घटाभावो नास्तीत्यभावस्य अतिरिक्तस्वरूपत्वकल्पनापेक्षया लाघवेन घटस्वरूपत्वकल्पनमेव युक्तम्। एवञ्च घटाभावाभावत्वस्य घट एव सत्त्वेन तदेव घटाभावप्रतियोगित्वं, नान्यत्। सुव्यक्तमिदं नव्यन्यायशास्त्रीयपञ्चलक्षण्यां श्रीमन्मथुरानाथतर्कवागीशटीकायामिति।

न च घटो नास्तीत्यभावीयप्रतियोगित्वे किं मानमिति वाच्यम्, घटो

नास्तीत्याद्यभावबुद्धिः विशिष्ट-वैशिष्ट्यावगाहिनी अभावबुद्धित्वादित्याद्यनुमानस्यैव तत्र प्रमाणत्वात्। तथाहि 'अभावप्रत्ययो हि विशिष्टवैशिष्ट्यावगाहिबोधमर्यादां नातिशेत' इति नियमेन अभावप्रतीतिमात्रस्यैव प्रतियोगितावच्छेदकविशिष्टप्रतियोगिवैशिष्ट्यावगाहिताया आवश्यकतया तत्र वैशिष्ट्यान्तरस्य बाधेन प्रतियोगित्वाख्यातिरिक्तवैशिष्ट्यसिद्धिरित्यभावीयप्रतियोगित्वसमाधिः।

---

## सांसर्गिक-प्रतियोगित्वम्

घटो नास्तीत्यादिप्रतीतिसिद्धे अभावे यथा विशेषणतया अभावीया प्रतियोगिता वर्त्तते, तथैव 'घटवद्भूतल' मित्यादिप्रतीतौ घटनिष्ठा सांसर्गिकी कापि प्रतियोगिता संसर्गांशे विशेषणतया विद्यते। तदुक्तं सिद्धान्तलक्षणे जगदीशेन, —'साध्यतावच्छेदकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्व—हेत्वधिकरणीभूतयत्किञ्चिद्वयक्तयनुयोगिकत्व—सामान्योभयाभाव' इत्यादि। व्याप्तिपञ्चकरहस्ये च मथुरानाथेन 'हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणताप्रतियोगिकहेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयतानिरूपितविशेषणताविशेषसम्बन्धेने'ति। अत्र निरूपितत्वं प्रतियोगितात्वं प्रतियोगिकत्वञ्च निरूपितत्वरूपमिति सम्प्रदायः। 'घटवद् भूतल'मिति प्रतीतौ घटः, संसर्गः, भूतलमिति त्रयो विषयाः सन्ति, तत्र यस्य संसर्गः स प्रतियोगी इति नयेन घटस्य प्रतियोगित्वं, तत्रत्यसंसर्गस्य घटीयत्वात्। अत्र प्रतियोगित्वं सम्बन्धितारूपं, न तु प्रागुक्तविरोधित्वादिलक्षणम्। सम्बन्धित्वरूपमर्थमुपादाय 'प्रतियोगिपदादन्यद्' इत्यादिस्थलेषु प्रतियोगिपदव्यवहारस्य दृष्टचरत्वात्। 'कुण्डे बदरं न तु बदरे कुण्डम्'इत्यादिप्रतीतिसिद्ध-

स्वरूपसम्बन्धविशेषस्यैव जगदीशादिभिः प्रतियोगितास्वरूपत्वमुद्घोषितमुपलभ्यते। तदिदमपि अभावनिरूपितप्रतियोगित्वमिव प्रतियोगिव्यक्तिभेदभिन्नं स्वरूपसम्बन्धरूपमेवेति निर्विरोधम्। इत्थञ्च 'घटवद् भूतल'मित्यादौ घटनिष्ठा याः प्रतियोगिताः सांसर्गिक्यो वर्त्तन्ते, ता यावन्तो घटास्तावत्य एव। ताश्च प्रतियोगिताः संसर्गेण निरूपिता एव, न तु तन्निरूपकाः। तथाच 'घटवद् भूतल'मित्यादौ घटनिष्ठप्रतियोगितानिरूपकसंसर्गवद्भूतलमिति वस्तुस्थितिः।

तत्संसर्गावच्छिन्नप्रमीयप्रकारत्वमेव तत्संसर्गप्रतियोगित्वम्। तथाहि संयोगेन घटवति भूतले संयोगेन घटवदिति प्रतीतिः प्रमा, तदीयप्रकारता घटनिष्ठा संयोगसम्बन्धावच्छिन्ना, सैव संयोगसम्बन्धप्रतियोगिता सांसर्गिकी। तत्संसर्गावच्छिन्नप्रकारत्वमात्रोक्तौ गुणादावपि संयोगसम्बन्धप्रतियोगित्वमतिप्रसक्तं स्यात्, संयोगेन गुणवान् इति भ्रमप्रतीतेः सम्भवात् तन्निरूपिताया गुणनिष्ठायाः प्रकारताया अपि संयोगेन सम्बन्धेनावच्छिन्नत्वात्। प्रमापददाने तु संयोगेन गुणवान् इति प्रतीतिनिरूपिताया: संयोगसम्बन्धावच्छिन्नप्रकारताया गुणे सत्त्वेऽपि सा न प्रमीया इति नातिप्रसङ्गः।

यस्य हि सादृश्यादिः, तस्यापि प्रतियोगित्वं व्यवह्रियते, यथा 'मुखं चन्द्रेण सदृशम्' इत्यादि प्रतीत्या विषयीकृतं यत् मुखे चन्द्रस्य सादृश्यं तत् चन्द्रप्रतियोगिकमिति। तदपि सांसर्गिकं प्रतियोगित्वमेव इति केचित्; सादृश्यादीनामपि प्रकृते चन्द्रादिसंसर्गतायाः सम्भाव्यमानत्वात्। चैत्रस्य धनमित्यादौ षष्ठ्यर्थः स्वत्वं, तत्र यच्चैत्रप्रतियोगिकत्वं तदपि सांसर्गिकमुक्तरीत्या प्रतिपत्तव्यम्।

अन्ये तु निरूपकत्वमपि प्रतियोगित्वमाहुः। तथाहि चन्द्रस्य सदृशं मुखम्, चैत्रस्य धनमित्यादौ यत् सादृश्यस्वत्वादिकं तत् चन्द्रचैत्रादि निरूपितमेवेति तत्र तत्र निरूपकत्वलक्षणं प्रतियोगित्वं निष्प्रत्यूहमेव।

नव्यास्तु तत्सम्बन्धावच्छिन्नाधेयत्वमेव तत्सम्बन्धप्रतियोगित्वम् तथाहि संयोगेन घटादेर्भूतलादौ वर्त्तमानत्वात् संयोगसम्बन्धावच्छिन्ना

धेयत्वं घटादौ वर्त्तत इति घटादौ संयोगसम्बन्धप्रतियोगित्वम्। गुणादिस्तु संयोगेन कुत्रापि न वर्त्तत इति तत्र संयोगसम्बन्धावच्छिन्नाधेयताया अवर्त्तमानतया गुणादौ न संयोगसम्बन्धप्रतियोगित्वमिति प्राहुः।

वस्तुतस्तु सांसर्गिकीयं प्रतियोगिता वृत्तित्वादतिरिच्यते, वृत्तिनियामकसम्बन्धवत् वृत्त्यनियामकेनापि सम्बन्धेन निरूपितायाः प्रतियोगितायाः सम्प्रदायसिद्धत्वात्। तथाहि यथा संयोगेन घटवद् भूतलमित्यादौ संयोगादिरूपे वृत्तिनियामकसंसर्गे घटप्रतियोगिकत्वं, तथा भूतले घट इत्यादौ वृत्तित्वादिरूपे वृत्त्यनियामकसम्बन्धेऽपि भूतलादिप्रतियोगिकत्वम् इति राद्धान्तः। वृत्तित्वं पुनराधेयत्वापरपर्यायं वृत्तिनियामकसम्बन्धेन संयोगादिनैव निरूप्यमाणमभ्युपेयते, न तु वृत्त्यनियामकसम्बन्धेनाधेयत्वतादात्म्यादिनापि। अतः सांसर्गिकप्रतियोगिताया वृत्तित्वस्वरूपत्वाभ्युपगमे संसर्गमात्रस्थल एव वृत्तित्वप्रतीत्यतिप्रसंगो दुर्निवारः स्यात्।

———

# अभावीयमनुयोगित्वम्

'अनुयोगः सम्बन्धः, स यत्र अस्ति सः अनुयोगी, तस्य भाव' इति व्युत्पत्त्या अनुयोगशब्दादिन-प्रत्ययोत्तरं त्व-प्रत्ययेन 'अनुयोगित्व'पदनिष्पत्तिः। 'यस्याभावः स प्रतियोगी' इति नियमवत् 'यत्र अभावः सः अनुयोगी' इत्यपि लौकिकैः प्रोक्तो नियमः। तथाहि 'भूतले घटो नास्ती'ति प्रतीतिसिद्धाभावस्थले घटस्य अभाव इति कृत्वा यथा घटः प्रतियोगी, तथा भूतले तस्य अभावस्य सत्त्वाद् भूतलम् अनुयोगि। अत एवायमभावो यथा घटप्रतियोगिकस्तथा भूतलानुयोगिकोऽपि।

संसर्गाभावान्योन्याभावभेदेन अभावीयानुयोगितात्ययकविभक्तौ किञ्चिदिव वैषम्यमुपलभ्यते, तथाहि संसर्गाभावीयानुयोगितायाः प्रतीतौ अनुयोगिबोधकपदोत्तरं सप्तम्यपेक्षा। यथा 'इह कपाले घटो भविष्यति' इति प्रागभावस्थले कपालादिपदोत्तरम्, 'इह कपाले घटो नष्ट' इति ध्वंसाभावस्थलेऽपि तत्र, इह भूतले घटो नास्तीति अत्यन्ताभावस्थले च भूतलादौ सप्तम्या एव अनुयोगित्वमवगम्यते। अन्योन्याभावस्थले तु न नियमतः सप्तम्यपेक्षिता, किन्तु नञुपस्थाप्यान्योन्याभावस्थले घटो न पट इत्यादौ नियमेन प्रथमैवापेक्षिता, अन्यत्र तु यथासम्भवं विभक्त्यन्तरमपि, यथा घटान्यस्य पटस्य रूपम्, घटभिन्नेन पटेन भवितव्यम्, पटे घटभेद इत्यादौ।

अभावत्वरूपामपि अभावीयानुयोगितां व्याचक्षते तैर्थिकाः। सेयमनुयोगिता प्रतियोगितायां निरूपिकैव, न तु तन्निरूपितापि। पूर्वोक्तरूपा अनुयोगिता भूतलादिनिष्ठा अभावेनैव निरूपिता, न तु प्रतियोगितया निरूपिता, नाप्यसौ प्रतियोगितायां इति ध्येयम्। प्रति-

योगिताया अभावत्वलक्षणानुयोगितानिरूपितत्वे पञ्चलक्षण्यादौ प्रतियोगितायाम् अत्यन्ताभावत्वनिरूपित्वादिनिवेशो मानम्।

---

# सांसर्गिकमनुयोगित्वम्

प्रतियोगित्ववदनुयोगित्वमपि सांसर्गिकं समभ्युपेयते। तथाहि यस्य संसर्गः स संसर्गस्य प्रतियोगीतिवत् यत्र प्रतियोगिनः संसर्गः स तस्य संसर्गस्य अनुयोगीति नियमः। यथा संयोगेन घटवद् भूतलमित्यादौ घटप्रतियोगिकसंयोगस्य भूतलादौ वर्त्तमानत्वात् भूतलादिकं तदनुयोगि।

तदिदमनुयोगित्वं संयोगेन भूतले घट इत्यादिप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेष इति केचित्। तत्संसर्गावच्छिन्नाधेयतानिरूपितमधिकरणत्वमेव तत्संसर्गानुयोगित्वमिति परे। अन्ये तु तत्संसर्गावच्छिन्नप्रमीयप्रकारतानिरूपितविशेष्यत्वमेव तत्संसर्गानुयोगित्वमाचक्षते। स्वरूपसम्बन्धविशेषकल्पः सुगम एव। अधिकरणत्वकल्पे संयोगेन घटवद् भूतलमित्यादौ संयोगसम्बन्धावच्छिन्ना या घटनिष्ठा आधेयता तन्निरूपिताधिकरणत्वस्य घटवति भूतले वर्त्तमानत्वात् तत्र अनुयोगिलक्षणसमन्वयः।

विशेष्यत्वस्वरूपताकल्पे संयोगसम्बन्धावच्छिन्ना घटनिष्ठा या प्रमीयप्रकारता तद्विशेष्यत्वस्य संयोगेन घटवति भूतल एव सत्त्वात् तत्र लक्षणसमन्वयः। प्रमापदव्यावृत्तिस्तु पूर्ववदूह्या। संयोगादीनां संसर्गाणां द्विष्ठत्वेऽपि प्रतियोगित्वमनुयोगित्वञ्च न अनियमेन उभयत्र स्थितिं लभते, कुण्डे बदरं न तु बदरे कुण्डमित्यादिप्रतीत्या तन्नियमस्य श्रीजगदीशतर्कालङ्कारादिभिः सिद्धान्तलक्षणप्रभृतिग्रन्थेषु समर्थनात्।

प्रतियोगितावत् सांसर्गिकी अनुयोगितापि संसर्गेन निरूपिता भवति, संसर्गस्तन्निरूपक एव, न तु तन्निरूपितोऽपि। निरुक्तप्रतियोगितानुयोगितयोरपि परस्परं निरूप्यनिरूपकभाव इति केचित्। अन्ये तु तयोः परस्परं निरूप्यनिरूपकभावमनङ्गीकृत्य संसर्ग-संसर्गता-संसर्गतावच्छेदकधर्मनिरूपितत्वमेवानयोरङ्गीकुर्वते। यथा संयोगेन भूतले घट इत्यादौ घटनिष्ठप्रतियोगितैव भूतलनिष्ठानुयोगिता संयोगरूपसंसर्गवत् संयोगत्वरूपसंसर्गतावच्छेदकेन संयोगनिष्ठसंसर्गतयापि निरूपिता भवतीति अभ्युपगम्यते।

इत्थञ्च यथा अभावस्थले 'भूतले घटो नास्ती'ति अभावस्य स्वरूपं 'घटप्रतियोगिको भूतलानुयोगिकोऽभाव' इति। घटप्रतियोगिक इत्यत्र घटः प्रतियोगी यस्य, भूतलानुयोगिक इत्यत्र च भूतलमनुयोगि यस्य इति व्युत्पत्त्या षष्ठ्यर्थस्य प्रतियोगितायाम् अनुयोगितायाञ्च अन्वयेन स्वनिरूपितप्रतियोगिताश्रयघटसम्बन्धीति स्वनिरूपितानुयोगिताश्रयभूतलसम्बन्धीति च परिष्कारः, तथा संसर्गस्थले 'भूतले घटस्य संयोग' इत्यत्र भूतलानुयोगिको घटप्रतियोगिकश्च संयोग इति स्वरूपम्, प्रागुक्तरीत्या विशेषप्रतिपत्तिश्च।

## अवच्छेदकत्वम्

अवच्छिनत्ति व्यावर्त्तयति पदार्थान्तरात् पृथक्कृत्य स्थापयति इति व्युत्पत्त्या अवपूर्वस्य छिदेः णकप्रत्यये बुनि वा कृते अवच्छेदकमिति रूपनिष्पत्तिः। एतेन व्यावर्त्तको धर्म इत्यापाततोऽर्थः पर्यवस्यति। अवच्छेद-

कस्य भावः अवच्छेदकत्वम्, तच्च प्रतियोगित्वानुयोगित्वादिवत् स्वरूप-सम्बन्धविशेष एव।

तस्यावच्छेदकत्वस्य प्रतियोगित्वादेश्च मिथो निरूप्यनिरूपकभावः सिद्धः। तथाहि घटो नास्तीत्यभावस्य प्रतियोगी घटः, तत्र या प्रतियोगिता वर्त्तते, तस्या अवच्छेदकं घटत्वं, तत्र या अवच्छेदकता अस्ति सा तया प्रतियोगितया निरूपिता, प्रतियोगिताप्यसौ तया अवच्छेदकतया निरूपिता भवति। अतो यथा अस्याभावस्य परिचयावसरे घटत्वनिष्ठा या अवच्छेदकता तन्निरूपिता या प्रतियोगिता तन्निरूपकोऽभाव इति व्यवह्रियते, तथा घटत्वनिष्ठा या अवच्छेदकता तन्निरूपिका या प्रतियोगिता तन्निरूपकोऽभाव इत्यपि व्यवहर्त्तुं शक्यते। यो यस्य अवच्छेदकः स तेनावच्छिन्न इति सामान्यनियमबलाद् घटो नास्तीत्यादौ घटनिष्ठा प्रतियोगिता स्वावच्छेदकेन घटत्वेन अवच्छिन्नेति घटत्वावच्छिन्नप्रतियोगितानिरूपकोऽभाव इति संक्षेपोक्त्या अस्यैवाभावस्य परिष्कारः।

घटत्वावच्छिन्नत्वं घटत्वनिष्ठावच्छेदकतानिरूपितत्वमेव, न तु ततः किञ्चिदतिरिक्तम्। न च घटो नास्तीत्यादिप्रतीतिस्थले घटत्वादौ अवच्छेदकत्वकल्पनं निष्प्रयोजनमिति वाच्यम्, घटत्वादौ अवच्छेदकत्व-कल्पनामन्तरेण अतिप्रसंगाप्रसंगादिदोषापत्तेः। तथाहि घटो नास्तीत्यभावस्य प्रतियोगी घटः; अवच्छेदकत्वकल्पनामन्तरेण सामान्यतस्तस्याभावस्य एतावान् परिष्कारो भवति, यथा 'घटनिष्ठप्रतियोगितानिरूपकोऽभाव' इति। अभावमात्रनिरूपितैव प्रतियोगिता वर्त्तते, घटो नास्तीत्यभावनिरूपिता काचित् प्रतियोगिता अस्ति या घटमात्रे वर्त्तते, द्रव्यं नास्तीत्यभावनिरूपिता काचित् प्रतियोगिता अस्ति या द्रव्यमात्रे वर्त्तते; घटस्यापि द्रव्यत्वात्' घटो नास्तीत्यभावीयप्रतियोगिताया इव द्रव्यं नास्तीत्याद्यभावीयप्रतियोगिताया अपि घटे वर्त्तमानत्वात् घटनिष्ठप्रतियोगितानिरूपकोऽभाव इत्यनेन घटो नास्ति इत्यभावस्येव द्रव्यं नास्तीत्यभावस्यापि लाभेन प्रतियोग्यधिकरणतया समम्

अभावस्य विरोधित्वनिर्वचनावसरे अगत्या द्रव्याधिकरणतया द्रव्यानिष्ठ-प्रतियोगितानिरूपकाभावस्य विरोधिताया वक्तव्यतया घटो नास्तीत्याद्य-भावानामपि द्रव्यनिष्ठप्रतियोगिताकतया घटानधिकरणे पटरूपद्रव्याधिकरणे भूतलादावपि द्रव्याधिकरणतायाः सत्त्वेन घटरूपद्रव्यप्रतियोगिकाभावस्य घटो नास्तीत्यादिप्रतीतिसिद्धस्य सत्त्वानुपपत्तिः। प्रतियोगितात्वेन रूपेण घटनिष्ठा घटो नास्तीत्यभावीयप्रतियोगिता द्रव्यं नास्तीत्यभावीयप्रतियोगिता च एकविधैव, न तु विलक्षणा। प्रतियोगितावैलक्षण्यमन्तरेण च न शक्योऽभावभेदः समुपपादयितुम्।

सत्यां पुनरवच्छेदकत्वकल्पनायां घटो नास्तीत्यभावस्य या प्रतियोगिता सा घटत्वावच्छिन्ना द्रव्यं नास्तीत्यभावीयप्रतियोगिता च द्रव्यत्वावच्छिन्ना इति प्रतियोगितयोरवच्छेदकभेदनिबन्धनेन भेदेन घटो नास्तीति प्रतीतिसिद्धस्य घटत्वावच्छिन्नप्रतियोगितानिरूपकाभावस्य द्रव्यं नास्तीति प्रतीतिसिद्धाभावेन द्रव्यत्वावच्छिन्नप्रतियोगितानिरूप-केण सह वैलक्षण्यात् घटत्वाच्छिन्नाधिकरणतया सह घटत्वावच्छिन्न-प्रतियोगितानिरूपकाभावस्य द्रव्यत्वावच्छिन्नाधिकरणतया च द्रव्यत्वाव-च्छिन्नप्रतियोगितानिरूपकाभावस्य विरोधित्वकल्पनात् न पटाधिकरणे घटानधिकरणे भूतलादौ घटो नास्तीत्यभावसत्त्वानुपपत्तिः। तत्र द्रव्यत्वावच्छिन्नाधिकरणतायाः सत्त्वेऽपि घटो नास्तीत्यभावस्य घटत्वाव-च्छिन्नप्रतियोगिताकस्य विरोधिन्या घटत्वावच्छिन्नाधिकरणताया असत्त्वात्।

किञ्च अवच्छेदकत्वकल्पनामन्तरेण भावाभावज्ञानयोर्मिथः प्रतिबध्य-प्रतिबन्धकभावकल्पनापि निर्दोषतया नोपपादयितुं शक्या भवति। तथाहि घटवद् भूतलम् इति ज्ञानं प्रति घटाभाववद् भूतलमिति निश्चयो विरोधी। द्रव्यवद् भूतलम् इति ज्ञानं प्रति तु द्रव्याभाववद् भूतलमिति निश्चयो विरोधी। तदेवम् अवच्छेदकताया अकल्पने घटनिष्ठप्रकारताकभूतलनिष्ठ-विशेष्यताकज्ञानं प्रति घटाभावप्रकारकभूतलविशेष्यकनिश्चयस्य द्रव्यनिष्ठ-

प्रकारताकभूतलनिष्ठविशेष्यताकज्ञानं प्रति च द्रव्याभावप्रकारकभूतल-विशेष्यकनिश्चयस्य विरोधित्वं वाच्यम्। तथाच सति घटवद् भूतलमिति ज्ञान-स्येव द्रव्यवद् भूतलमिति ज्ञानस्यापि घटनिष्ठप्रकारताकभूतलनिष्ठविशेष्य-ताकज्ञानत्वेन घटवद्भूतलमिति ज्ञानवत् द्रव्यवद् भूतलमिति ज्ञानं प्रत्यपि घटा-भाववद् भूतलमिति निश्चयस्य घटवद् भूतलमिति ज्ञानस्यापि द्रव्यनिष्ठ-प्रकारताकभूतलविशेष्यकज्ञानत्वेन घटवद्भूतलमिति ज्ञानं प्रत्यपि द्रव्या-भाववद्भूतलमिति निश्चयस्य च प्रतिबन्धकत्वप्रसक्तेः। अनयैव रीत्या वैपरीत्येनाभाववुद्धिं प्रति भावनिश्चयस्य प्रतिबन्धकत्वस्य निर्वचनीयतया घटवद् भूतलमिति ज्ञानस्येव द्रव्यवद् भूतलमिति ज्ञानस्यापि घटनिष्ठ-प्रकारताकभूतलनिष्ठविशेष्यताकज्ञानत्वेन द्रव्याभावद्भूतलमिति ज्ञानवत् घटाभाववद् भूतलमिति ज्ञानं प्रत्यपि द्रव्यवद् भूतलमिति निश्चयस्य विरोधित्वापत्तेः। एवमन्यत्र सर्वत्रैवोह्यम्।

अवच्छेदकत्वकल्पनायाश्च घटवद् भूतलमिति ज्ञाननिरूपिता या घटनिष्ठा प्रकारता तस्या घटत्वेन धर्मेण, द्रव्यवद् भूतलमिति ज्ञानीया या द्रव्यनिष्ठा प्रकारता तस्याश्च द्रव्यत्वेन धर्मेण अवच्छिन्नतया पृथक्तया घटत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यतानिरूप-कज्ञानं प्रति घटाभावत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्न-विशेष्यताशालिनिश्चयस्य द्रव्यत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्न-विशेष्यताशालिज्ञानं प्रति च द्रव्याभावत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वा-वच्छिन्नविशेष्यताशालिनिश्चयस्य विरोधित्वमित्यादिकल्पनया न क्षतिः। एवं वैपरीत्येन भावज्ञानस्यापि अभावज्ञानप्रतिबन्धकत्वमूह्यम्। अनयावच्छेद-कतया सर्वं परिष्यात्तं नव्यन्यायशास्त्रम्। तत्र अवच्छेदकमिति सामान्य-संज्ञा, प्रतियोगितावच्छेदक-प्रकारतावच्छेदक-विशेष्यतावच्छेदक-साध्यता-वच्छेदक-पक्षतावच्छेदक-हेतुतावच्छेदकेत्यादयो विशेषसंज्ञाः।

स्वांशे विशेषणतया भासमानधर्मस्यैव स्ववृत्तिप्रतियोगित्वाद्यवच्छेदक-त्वम्। तथाहि प्रतियोग्यंशे विशेषणतया भासमानो धर्मः प्रतियोगितावच्छेदकः,

प्रकारांशे विशेषणतया भासमानो धर्मः प्रकारतावच्छेदक इत्येवमूह्यम्। प्रकारताविशेष्यतादयः परतो विवेचयिष्यन्ते। घटो नास्तीत्यादौ घटरूप-प्रतियोग्यंशे विशेषणतया घटत्वरूपो धर्मो भासत इति तत्र स एव धर्मः प्रतियोगितावच्छेदकः। यत्र पुनः प्रतियोग्यंशे धर्मद्वयं धर्मत्रयं तदधिकं वा समं विशेषणतया भासते, तत्र तस्य तस्य धर्मद्वयस्य धर्मत्रयस्य तदधिकस्य वा तुल्यतया अवच्छेदकत्वम्, यथा नीलघटो नास्ति इत्यत्र घटरूपप्रतियोग्यंशे नीलत्वं घटत्वञ्चेति द्वयमेव विशेषणतया भासत इति द्वयमेव तत्रत्यप्रतियोगितायां अवच्छेदकतामवगाहते। यत्र पुनः नीलनदूघटो नास्ति इत्यादौ नीलत्व-तत्त्व-घटत्वरूपं धर्मत्रयं विशेषणं तत्र तदेव, यत्राधिकं तत्राधिकमपि।

घटपटोभयं नास्तीत्याद्युभयाभावस्थलेऽपि घटत्वं पटत्वं उभयत्वञ्चेत्यादि धर्मत्रयमेवावच्छेदकं प्रतिपत्तव्यम्। न च तत्र उभयत्वमात्रस्यैव प्रतियोगितावच्छेदकत्वे का क्षतिरिति वाच्यम्, उभयाभावस्थलमात्र एव उभयत्वमात्रस्य प्रतियोगितावच्छेदकत्वे उभयत्वावच्छिन्नाधिकरणतया समभेव उभयत्वावच्छिन्नप्रतियोगिताकाभावस्य विरोधितायाः कल्पनीयतया घटपटोभयवति भूतलादावपि वह्निधूमोभयाभावसत्त्वानुपपत्तिः, तस्यापि किञ्चिदुभयत्वावच्छिन्नाधिकरणत्वात्।

उभयत्वावच्छिन्नप्रकारकबुद्धि प्रति उभयत्वावच्छिन्नाभावत्वावच्छिन्न प्रकारकनिश्चयस्य प्रतिबन्धकतायाः कल्पनेन घटपटोभयाभाववान् इति प्रतिपत्तिदशायामिव वह्निधूमोभयाभाववान् इति प्रतीतिदशायामपि घटपटोभय-वानिति प्रतीतेरनुपपत्तिः स्यात्। अत एव उभयत्वाश्रयांशे विशेषणतया भासमानानां घटत्व-पटत्व-वह्नित्वधूमत्वादीनामपि धर्माणां प्रतियोगिता-वच्छेदकत्वं कल्पनीयम्। तेन वह्नित्व-धूमत्वोभयत्व-त्रितयधर्मावच्छिन्न-प्रतियोगिताकाभाववत्ताज्ञानेन वह्नित्व-धूमत्वोभयत्वत्रितयधर्मावच्छिन्न-प्रकारकज्ञानस्य प्रतिबध्यप्रतिबन्धकभावकल्पनात् तादृशत्रितयधर्मावच्छिन्नाधिकरणतया समञ्च तादृशत्रितयधर्मावच्छिन्नप्रतियोगिताकाभावस्य

विरोधित्वात् नानुपपत्तिलेशोऽपि। एवमन्यतराभावस्थलादावपि दोषसमाधी तुल्ये एव। न च घटत्वं पटत्वञ्चेति धर्मद्वयमेव तदवच्छेदकमस्तु, न तु उभयत्वमपि लाघवादिति वाच्यं, तथा सति घटत्वावच्छिन्नाधिकरणतया पटत्वावच्छिन्नाधिकरणतया च तादृशाभावविरोधित्वस्य वक्तव्यतया घटानधिकरणे पटाधिकरणे पटानधिकरणे घटाधिकरणे च तादृशोभयाभावस्य सत्त्वानुपपत्तेः। प्रथमस्थले पटाधिकरणताया द्वितीयस्थले च घटाधिकरणतायास्तद्विरोधिन्याः सत्त्वात्। न च घटपटोभयाभावादिस्थले सामानाधिकरण्यसम्बन्धेन घटविशिष्टपटत्वादिकमेव तदवच्छेदकमस्तु, न तु तादृशं धर्मत्रयमिति वाच्यं; तत्र विनिगमनाविरहेण घटविशिष्टपटत्वस्य पटविशिष्टघटत्वस्य च अवच्छेदकतया सामानाधिकरण्यस्य संसर्गविधया च प्रवेशेन गौरवात्। विरुद्धयोर्घटत्वपटत्वयोरुभयाभावप्रतीत्यनुपपत्तेश्च। तदेतावता सिद्धमुभयाभावस्थले प्रतियोगिताया धर्मत्रयेणावच्छिन्नत्वम्।

तदेवं विरोधितायाः प्रतिबध्यप्रतिबन्धकभावादीनाञ्च सम्यगुपपादनार्थमेव प्रतियोगितावच्छेदकत्वादिकमभ्युपगन्तव्यमिति तत्त्वम्।

सेयमवच्छेदकता क्वचित् किञ्चिद्धर्मावच्छिन्ना, क्वचिच्च निरवच्छिन्ना। यत्र अवच्छेदकांशे धर्मान्तरं विशेषणतया भासते, तत्रत्या अवच्छेदकता किञ्चिद्धर्मावच्छिन्ना; यथा घटवान् नास्ति इति प्रतीतिसिद्धाभावीया या घटवन्निष्ठा प्रतियोगिता तन्निरूपिता या घटनिष्ठा अवच्छेदकता तस्या घटांशे विशेषणतया भासमानेन घटत्वरूपधर्मेण अवच्छेदात् किञ्चिद्धर्मावच्छिन्नत्वम्। घटो नास्ति इत्यादौ पुनः घटनिष्ठा या प्रतियोगिता तस्या अवच्छेदकं घटत्वं तस्य च जातिस्वरूपस्य अनुल्लिख्यमानस्य स्वरूपतो भानात् तदंशे कस्यापि धर्मस्य विशेषणतया अप्रतीतेस्तन्निष्ठा या अवच्छेदकता सा निरवच्छिन्नैव। तदुक्तं सिद्धान्तलक्षणरहस्ये मथुरानाथेन 'जात्यखण्डोपाध्यतिरिक्तपदार्थस्यैव स्वरूपतोऽवच्छेदकतानभ्युपगमादिति।' घटो नास्तीत्यादौ घटत्वं प्रतियोगितावच्छेदकं, घटवान् नास्ति इत्यादौ घटः

प्रतियोगितावच्छेदकः घटत्वं पुनः प्रतियोगितावच्छेदकतावच्छेदकं, तद् पुनः कस्यचिद् विशेषणस्य कदाचित् सति भाने तस्य प्रतियोगितावच्छेदकतावच्छेदकतावच्छेदकत्वमित्येवमूह्यम्। एष धार्मिकावच्छेदकत परिष्कारः।

अस्ति च पुनरन्यादृशी अवच्छेदकता या सांसर्गिकावच्छेदकतेति व्य दिश्यते। सांसर्गिकावच्छेदकता संसर्गतेत्यनर्थान्तरम्; तदुक्तं विषयताव गदाधरेण,—'संसर्गतायाः संसर्गनिष्ठावच्छेदकतारूपत्वा'दिति। तथाहि य घटो नास्तीत्यादौ घटत्वं प्रतियोगितावच्छेदकं पूर्वनिरुक्तयुक्त्या उपगन्तव्य तथा संयोगेन घटो नास्ति इत्यादौ संयोगरूपे संसर्गेऽपि प्रतियोगितावच्छे कत्वमुपगम्यते। अन्यथा संयोगेन घटो नास्ति समवायेन घटो नास्ती पृथक्प्रतीतिसिद्धयोरभावयोः सममेव घटत्वावच्छिन्नप्रतियोगिताकतया स सर्गिकावच्छेदकतामनन्तर्भाव्य घटत्वाच्छिन्नाधिकरणतया सह घटत्व वच्छिन्नप्रतियोगिताकाभावस्य विरोधितायाः तथा घटत्वावच्छिन्नप्रका कबुद्ध्या समं घटत्वावच्छिन्नप्रतियोगिताकाभावप्रकारकबुद्धेः प्रतिबध्यप्रा बन्धकभावस्य कल्पनात् संयोगेन घटवति भूतलेऽपि समवायेन घ नास्तीत्यभावस्य सत्ताया अनुपपत्तिः, तथा संयोगेन घटवद् भूतलमि ज्ञानदशायां समवायेन घटाभाववद् भूतलमिति समवायेन घटाभाववद् भूत मिति ज्ञानदशायाश्च संयोगेन घटवद् भूतलमिति प्रतीतेरनुपपत्तिरित संसर्गेऽपि धर्मवदवच्छेदकत्वं कल्पनीयमेव।

इत्थञ्च संयोगेन घटो नास्ति इत्यादौ यथा घटनिष्ठा प्रतियोगिता घटत्वेन अवच्छिन्ना तथा संयोगरूपसंसर्गेणापि; समवायेन घटो नास्तीत्यादौ पुनः घटत्वेनेव समवायेन संसर्गेणापि; तथाच संयोगसम्बन्धावच्छिन्नघटत्वाव-च्छिन्नाधिकरणतया समं संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रति-योगिताकाभावस्य समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नाधिकरणतया समञ्च समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रतियोगिताकाभावस्य विरोधितायाः तथा संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारकबुद्धि-

संयोगसम्बन्धावच्छिन्नघटाभावप्रकारकबुद्धयोः समवायसम्बन्धावच्छिन्न-घटत्वावच्छिन्नप्रकारकबुद्धितादृश-घटाभावप्रकारकबुद्धयोश्च मिथः प्रतिबध्य-प्रतिबन्धकभावस्य कल्पनेन प्रागुक्तदोषनिरासः। तथाहि संयोगेन घटवद्भूतल-मितिबुद्धिः संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारकभूतलत्वावच्छिन्न-विशेष्यिकेति संयोगसम्बन्धावच्छिन्नघटाभावप्रकारकभूतलविशेष्यिकैव बुद्धि-स्तद्विरोधिनी ; न तु समवायसम्बन्धावच्छिन्नघटाभावप्रकारकभूतलविशेष्य-कापि ; समवायसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारकभूतलविशेष्यिकैव च समवायसम्बन्धावच्छिन्नघटाभावप्रकारकभूतलविशेष्यिकाया बुद्धेर्वि-रोधिनी, न तु संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नप्रकारकभूतल-विशेष्यिकापि, अतः संयोगेन घटवद् भूतलमिति ज्ञानस्य संयोगसम्बन्धाव-च्छिन्नघटत्वावच्छिन्नप्रकारकभूतलविशेष्यकस्य सत्त्वेऽपि समवायेन घटाभाववद् भूतलमिति ज्ञानस्य समवायसम्बन्धावच्छिन्नघटाभावप्रकारक-भूतलविशेष्यकस्य नानुपपत्तिः, न वा समवायसम्बन्धावच्छिन्नघटाभाव-प्रकारकभूतलविशेष्यकस्य सत्त्वे संयोगसम्बन्धघटिततादृशज्ञानस्यानु-पपत्तिः, तयोस्तयोर्मिथः प्रतिबध्यप्रतिबन्धकभावस्य अभावादिति।

केचिद् वृत्त्यनियामकसम्बन्धस्य संसर्गाभावप्रतियोगितावच्छेदकसम्बन्ध-त्वं नाङ्गीकुर्वन्ति, तदुक्तं व्युत्पत्तिवादे गदाधरेण ;—'स्वत्वादिसम्बन्धस्य वृत्त्यनियामकतया प्रतियोगितानवच्छेदकत्वेन तत्सम्बन्धाच्छिन्नप्रतियोगि-ताकाभावाप्रसिद्धेः.....तादृशसम्बन्धस्य वृत्त्यनियामकतया संसर्गाभाव-प्रतियोगितानवच्छेदकत्वेन ततसम्बन्धावच्छिन्नाभावस्य नव्या प्रत्यायना-सम्भवाद्" इति। तादात्म्यसम्बन्धस्य वृत्त्यनियामकत्वेऽपि भेदप्रतियोगि-तावच्छेदकसम्बन्धत्वं भवत्येव। अत एव 'संसर्गाभावप्रतियोगितानवच्छेद-कत्वेन' इति उक्तम्।

तस्यापि न प्रतियोगितावच्छेदकसम्बन्धत्वमिति बौद्धाधिकारटिप्पन्यां शिरोमणिः। तदुक्तं जगदीशेन सिद्धान्तलक्षणप्रकपणे,—'साधनवन्निष्ठा-न्योन्याभावप्रतियोगितायाः साध्यतावच्छेदकतादात्म्यसम्बन्धावच्छिन्नत्वे

मानाभावस्य स्वयमेव बौद्धाधिकारटिप्पन्यामुक्तत्वात्। एवं धनी चैत्रत्वादित्यादौ वृत्त्यनियामकस्वामित्वादिसम्बन्धेन धनादेः साध्यतायातपि तादृशसम्बन्धावच्छिन्नप्रतियोगित्वाप्रसिद्धे'रिति।

संसर्गनिष्ठा सांसर्गिकावच्छेदकता नियमेन किञ्चिद्धर्मावच्छिन्ना, न तु निरवच्छिन्नापि, सर्वत्रैव संसर्गस्य संयोगादेः संयोगत्वादिरूपसंसर्गतावच्छेदकधर्मपुरस्कारेण भानात्। परमस्याः सांसर्गिकावच्छेदकताया धर्ममात्रमेव अवच्छेदकं, न तु संसर्गोऽपि ; संसर्गस्य संसर्गः तस्य संसर्गः तस्य च संसर्ग इत्येवमनवस्थाप्रसङ्गेन कुत्रापि संसर्गसंसर्गस्य भानानङ्गीकारात्। अत एव व्युत्पत्तिवादे गदाधरेण ;—'राज्ञः पुरुष इत्यादौ षष्ठ्यर्थस्य संसर्गमर्यादया भानमुचितं तस्य प्रकारत्वोपगमे तत्सम्बन्धस्याधिकस्य भाने गौरवात्" इति प्रस्तुतम्। तथाहि संयोगेन घटवद् भूतलमित्यादिप्रतीतौ संयोगे सांसर्गिकावच्छेदकत्वं घटत्वे च धार्मिकावच्छेदकत्वम्, घटे प्रकारत्वम्, भूतले विशेष्यत्वं, भूतलत्वे विशेष्यतावच्छेदकत्वम्। तत्र संयोगे या सांसर्गिकावच्छेदकता संसर्गत्वापराख्या, सा संयोगत्वेन धर्मेण अवच्छिन्ना, न तु केनचित् संसर्गेणापि। संयोगनिष्ठा या संसर्गता सांसर्गिकावच्छेदकता वा तन्निरूपिता या संयोगत्वनिष्ठा अवच्छेदकता समवायेन सम्बन्धेन अवच्छिन्ना, न तु केनचिद्धर्मेणापि, संयोगत्वस्य जातेरनुल्लिख्यमानतया स्वरूपत एव भानात्।

इत्थञ्च धार्मिकावच्छेदकतामात्रमेव किञ्चिन्सम्बन्धावच्छिन्नमिति नियमः। तेन घटत्वनिष्ठापि या धार्मिकावच्छेदकता सा केनचिन् धर्मेण अनवच्छिन्नापि समवायेन सम्बन्धेनावच्छिन्ना, समवायेनैव सम्बन्धेन तत्र घटांशे घटत्वस्य विशेषणतया भानात्। यो यत्सम्बन्धेन क्वचित् विशेषणतया भासते, स एव सम्बन्धस्तद्गतविषयताया अवच्छेदक इति नियमः। यत्र कुत्राप्येकस्य विशेषणत्वं क्वचित् सम्बन्धमवलम्ब्यैव सम्पद्यते, न तु सम्बन्धमनवलम्ब्याऽपि, अवच्छेदकता च विशेषणतया

भातस्यैव, अतः अवच्छेदकता नियमेन केनापि सम्बन्धेनावच्छिद्यत इत्यप्रत्यूहमेव।

अवच्छेदकताकल्पनमन्तरेण सामान्याभावविशेषाभावादीनां स्वरूपतो भेदप्रतिपादनं विषयभेदेन विभिन्नानां विज्ञानशतानां पारस्परिकं सुसूक्ष्मं वैलक्षण्यञ्च दुरुपपादमेव। असति च सामान्याभावविशेषाभावादीनां पारस्परिके वैलक्षण्ये अनुपपन्ने च विभिन्नप्रकाराणां विज्ञानविशेषाणां मिथः प्रकारपार्थक्ये विरोधिज्ञानानां प्रतिबध्यप्रतिबन्धकभावो दुर्निर्वचः स्यादिति विशेषेण प्रतिपादितमिदमधस्तादेव।

केचिद् गुरुधर्मस्य प्रतियोगितावच्छेदकत्वं नाङ्गीकुर्वते, यदि लघुधर्मे तत्स्वीकारे अतिप्रसङ्गादिदोषो न स्यात्। तथाहि प्रमेयघटो नास्ति इत्यादि-प्रतीतौ घटत्वमात्रस्यैव अवच्छेदकत्वाङ्गीकारेण उपपत्तौ प्रमेयत्वविशिष्टघटत्वे अवच्छेदकत्वं नाङ्गीक्रियते। अत्रायं भावः—यत्र प्रमेयघटो नास्ति इत्यभावः प्रतीयते, तत्रैव घटो नास्ति इत्यभावोऽपि प्रतीतिविषयतामर्हति, यत्र च घटो नास्ति, इति तत्रैव च प्रमेयघटो नास्ति इत्यपि, अतः घटो नास्ति इत्यभावस्येव प्रमेयघटो नास्ति इत्यभावस्यापि प्रतियोगितावच्छेदकं घटत्वमेव, न तु प्रमेयत्वविशिष्टघटत्वं प्रमेयत्वं घटत्वञ्चेत्युभयं वा। परन्तु नीलघटो नास्ति इति प्रतीतिसिद्धाभावस्य घटत्वमात्रे प्रतियोगितावच्छेदकत्वाङ्गीकारे रक्तपीता-दिघटाधिकरणेऽपि नीलघटो नास्तीति प्रतीत्यनुपपत्तिः स्यात्, तत्रापि स्वप्रति-योगितावच्छेदकीभूतघटत्वावच्छिन्नाधिकरणताया विरोधिन्याः सत्त्वादतस्तत्र नीलत्वविशिष्टघटत्वं नीलत्वं घटत्वञ्चेत्युभयं वा प्रतियोगितावच्छेदकं प्रति-पत्तव्यमेव। एवमन्यत्रापि अनुसन्धेयम्। तदुक्तमवच्छेदकत्वनिरुक्तौ शिरो-मणिना,—'नन्ववच्छेदकत्वमिह न स्वरूपसम्बन्धविशेषः, सम्भवति लघौ धर्मे गुरौ तदभावा'दिति। तद्व्याख्यायाञ्च जगदीशेन ;—'यस्यावच्छेदकत्व-स्वीकारे अतिप्रसङ्गाद्यभावः स एवावच्छेदक इत्याशयेनाह सम्भवतीति अतिप्रसङ्गाद्यनापादके लघौ सम्भवतीत्यर्थः'। इति।

तत्तु न विचारसहम्, समानप्रकारकज्ञानयोरेव प्रतिबध्यप्रतिबन्धकभावात्

कम्बुग्रीवादिमत्त्वान् देश इति ज्ञानस्य कम्बुग्रीवादिमान् नास्तीति प्रतीतेश्च परस्परं प्रतिबध्यप्रतिबन्धकभावस्य अनुपपत्तेः। कम्बुग्रीवादिमत्त्वान देश इति ज्ञानस्य कम्बुग्रीवादिमत्त्वावच्छिन्नप्रकारकत्वात् कम्बुग्रीवादिमान् नास्तीनि प्रतीतेश्च घटत्वावच्छिन्नप्रकारकत्वात् असमानप्रकारकत्वेन विरोधिताया असम्भवात्। सुव्यक्तमिदम् तार्किकशिरोमणिना रघुनाथेन निरुक्तायामवच्छेदकत्वनिरुक्तौ, तदुक्तं—'गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान् नास्तीनि प्रतीतिवलाद् गुरुरपि धर्मोऽवच्छेदकः प्रतियोगितायाः' इति। तत्रैव तद्ग्रन्थं व्याचक्षाणेन जगदीशेनापि,—'कम्बुग्रीवादिमत्त्वावच्छिन्नस्य विशिष्टबुद्धौ तदवच्छिन्नप्रतियोगिताकत्वेनाभावनिश्चयस्य विरोधित्वादिति ध्येयमिति।" तेनैव पुनः सामान्यनिरुक्तौ—'गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमत एव एतल्लक्षणम्. अन्यथा ह्रदो दाहजनकद्रव्यवान् द्रव्यादित्यादौ बाधाद्यसम्भवापत्तेः' इत्यादि। अनुसृतश्चैतन्मतं बहुत्रैव बहुभिस्तन्त्रकारैः। स्वरूपसम्बन्धरूपस्यैवावच्छेदकत्वस्य प्रतियोगितानिरूपितस्य एषा व्यवस्था, न तु प्रकारान्तरस्यापि इति ध्येयम्।

अवच्छेदकस्तु अन्यूनानतिरिक्तवृत्तिधर्म्म एव, न्यूनवृत्तेरतिरिक्तवृत्तेर्वा अवच्छेदकत्वे अतिप्रसङ्गाप्रसङ्गाद्यवतारप्रसङ्गात्। तथाहि न्यूनवृत्तिधर्म्मस्य अवच्छेदकत्वे घटादिमत्यपि प्रदेशे घटाद्यभावप्रतीतिप्रसङ्गः, अतिरिक्तवृत्तिधर्मस्य तथात्वे प्रतियोग्यनधिकरणे तादृशधर्मविशिष्टाधिकरणविशेषे तदभावप्रतीत्यनुपपत्तिः। यथा घटो नास्ति इति प्रतीतिसिद्धाभावप्रतियोगितावच्छेदकत्वं यदि तद्घटत्वादौ अङ्गीक्रियते, तदा प्रतियोगितावच्छेदकावच्छिन्नाधिकरणतया सममेवाभावस्य विरोधेन तद्घटत्वावच्छिन्नाधिकरणतया एव तस्य विरोधकल्पनात् तद्घटानधिकरणे अपरघटाधिकरणे घटो नास्तीति प्रतीतिरापद्येत। तत्रैव अतिरिक्तवृत्तिधर्मस्य द्रव्यत्वादेः प्रतियोगितावच्छेदकत्वे द्रव्यत्वावच्छिन्नाधिकरणतया सह तस्याभावस्य विरोधात् घटानधिकरणे पटादिरूपद्रव्याधिकरणेऽपि घटो

नास्तीति प्रतीत्यनुपपत्तिप्रसङ्ग इति अन्यूनानतिरिक्तवृत्तिधर्म एव प्रतियोगितावच्छेदको वाच्यः।

स्वरूपसम्बन्धरूपावच्छेदकत्वपक्षेऽपि तादृश एव प्रतियोग्यंशे भासमानो धर्मः प्रतियोगित्वावच्छेदकः। यथा घटो नास्ति पटो नास्तीत्यादौ घटत्वपटत्वादिः। पक्षान्तरे पुनः प्रतियोग्याद्यंशे अभासमानोऽपि प्रतियोगित्वाद्यन्यूनानतिरिक्तवृत्तिधर्मः पारिभाषिकावच्छेदकतामवगाहते, यथा कम्बुग्रीवादिमान् नास्तीत्यादौ घटत्वादिः। प्रतियोगित्वाद्यनतिरिक्तवृत्तिधर्मस्यापि पारिभाषिकावच्छेदकत्वमवच्छेदकत्वनिरुक्तौ सूत्रितं शिरोमणिना, तदिदं गौरवभयान्नोपादीयते।

अस्त्यन्यदपि अधिकरणैकदेशनिष्ठमवच्छेदकत्वं, तदपि 'अग्रे वृक्षः कपिसंयोगी न तु मूले' इत्यादिप्रतीतिसाक्षिकः स्वरूपसम्बन्धविशेष एव। तथाहि अत्र कपिसंयोगस्य अधिकरणं वृक्षः, तस्य एकदेशः अग्रं, तदेव कपिसंयोगस्य तादृशमवच्छेदकम्। अधिकरणार्थवत् अवच्छेदकार्थेऽपि सप्तमी आनुशासनिकी। कालापिकास्तु क्रियाधारभूतस्य कर्त्तादेरवयविनः समवायेन अवयवे वर्त्तमानत्वात् तत्र अधिकरणार्थ एव सप्तमीत्यादिरीत्या सप्तमीमुपपादयन्ति। यथा गले बद्धा गौर्नीयत इत्यादौ। पूर्वोक्तप्रतीतिस्थले अग्रं कपिसंयोगस्य मूलञ्च कपिसंयोगाभावस्य अवच्छेदकम्। तादृशावच्छेदकभेदादेव विरुद्धयोरपि भावाभावयोरेकस्मिन् अधिकरणे सत्त्वमुपपन्नं भवति, नान्यथा। उक्तञ्च पूर्वपक्षग्रन्थे मणिकारेण,—'मूले वृक्षः कपिसंयोगवान्नेत्यवाधितप्रतीतेस्तदन्योन्याभावस्यापि तत्र सत्त्वात्। नचैवं भेदाभेदः, अवच्छेदकभेदेन तत्सत्त्वाभ्युपगमाद् इति।

अत एव हि केषाञ्चित् पदार्थानां स्वाधिकरणवृत्त्यभावप्रतियोगित्वरूपं स्वाभावसामानाधिकरण्यरूपं वा अव्याप्यवृत्तित्वं, केषाञ्चिच्च स्वाधिकरणवृत्त्यभावाप्रतियोगित्वरूपं स्वाभावासामानाधिकरण्यरूपं वा व्याप्यवृत्तित्वमुपपद्यते। तथाहि कपिसंयोगो यत्र वृक्षे वर्त्तते, स तस्य किञ्चिदेशावच्छेदेनैव वर्त्तते, स च देशः अग्रादिः, तत्रैव अधिकरणे अपरदेशावच्छेदेन कपिसंयोगा-

भावस्य सत्त्वम्, स चापरदेशो मूलम्, अत एव स्वाधिकरणे वृक्षे अवच्छेदकभेदेन कपिसंयोगस्य तदभावस्य च सत्तया कपिसंयोगस्य निरुक्ताव्याप्यवृत्तित्वं, व्याप्यवृत्तित्वञ्च द्रव्यत्ववृक्षत्वादीनां धर्मान्तराणाम्, द्रव्यत्ववृक्षत्वादीनां धर्माणां न वृक्षे किञ्चिद्देशावच्छेदेन सत्त्वं, नाप्यपरदेशावच्छेदेन तदभाव इति तेषामधिकरणे वृक्षादौ वर्त्तमानोऽभावो न द्रव्यत्वाद्यभावः, परं गुणत्वाद्यभाव एव, तत्प्रतियोगित्वस्य गुणत्वादौ तत्प्रतियोगित्वाभावस्य च द्रव्यत्वादौ सत्त्वेन तत्र व्याप्यवृत्तित्वलक्षणसमन्वयः। तत् 'अग्रे वृक्षः कपिसंयोगी न तु मूले' इत्यादि प्रत्यक्षवत् युक्तिबलादपि तादृशमवच्छेदकत्वं सिध्यतीति। अव्याप्यवृत्तिपदार्थस्यैव तादृशमवच्छेदकं स्वीक्रियते, न तु व्याप्यवृत्तिपदार्थस्यापि, अतोऽव्याप्यवृत्तिपदार्थनिरूपितमेव तदवच्छेदकत्वं, न तु व्याप्यवृत्तिपदार्थनिरूपितमपि।

अग्रावच्छिन्नो वृक्षः कपिसंयोगी, न तु मूलावच्छिन्न इत्यादिरीत्यापि अस्य प्रतीतिर्भवति, तेन तदवच्छेदकत्वं अव्याप्यवृत्तिपदार्थनिरूपितं तद्गतवृत्तितानिरूपितं अधिकरणनिरूपितं तद्गताधिकरणतानिरूपितमित्यपि व्यवहियते। यथा अग्रावच्छिन्नः कपिसंयोगः अग्रावच्छिन्ना कपिसंयोगनिष्ठा वृत्तिता अग्रावच्छिन्नाधिकरणता इत्यादि सर्वमेवेदमनाविलं भाति। अधिकरणस्य एकदेशवत् अन्यत्रापि क्वचित् इदमवच्छेदकत्वमनुभूयते, यथा उत्पत्तिकाले पृथिवी गन्धाभाववती' ति अत्र गन्धाभावस्य अधिकरणं पृथिवी, अवच्छेदकश्च उत्पत्तिकालः, तथा 'इदानीं घटे घटत्वं न तु पटे' इत्यत्र कालवृत्तिघटत्वस्य अवच्छेदको घटः, इत्थञ्च त्रिविधे वस्तुनि इदमवच्छेदकत्वं व्यवतिष्ठते, सावयवस्याधिकरणस्य अवयवविशेषे, काले देशे च, तत्र कालवृत्तितायाः अवच्छेदको देशः देशवृत्तितायाः कदाचिदवच्छेदको देशः, कदाचिच्च कालः उदाहरणत्रयन्तु समुपपादितप्रायम्। तदुक्तं सिद्धान्तलक्षणे शिरोमणिना, 'देशे कालस्येव कालेऽपि देशस्यावच्छेदकत्वाद्' इति।

अननिरिक्तवृत्तित्वरूपमप्यवच्छेदकत्वमङ्गीक्रियते, तदुक्तं पूर्वपक्षग्रन्थे

शिरोमणिना,—'तदवच्छेदकत्वञ्च' तदनतिरिक्तवृत्तित्वम्,' इति। एतन्मतमुपन्यस्य दूषितमिदमवच्छेकत्वनिरुक्तिप्रकरणे तेनैव। तच्च अवच्छेदावच्छेदेन प्रतीत्यादौ स्पष्टतया शक्योपपादं भवति। तथाहि सप्रकारकप्रतीतिर्द्विविधा अवच्छेदावच्छेदेन सामानाधिकरण्यमात्रेण च। अवच्छेदावच्छेदेन प्रतीतौ धर्मिजातीये निखिल एव प्रकारीभूतो धर्मो भासते, सामानाधिकरण्येन प्रतीतौ पुनः यत्र कुत्रापि धर्मिजातीये इति सुगमया दिशा प्रत्येतव्यम्। सुपरिष्कारे कर्त्तव्ये पुनरिदं वक्तव्यं भवति प्राचीनतन्त्ररीतिमनुवर्त्तमानानाम् यथा ;—अवच्छेदावच्छेदेन प्रतीतौ प्रकारीभूते धर्मे धर्मितावच्छेदकव्यापकत्वं संसर्गे च तादृशधर्मप्रतियोगिकत्वं भासते। तदुक्तं पक्षतामन्थे जगदीशेन,—'पर्व्वतत्वावच्छेद्यत्वं न स्वरूपसम्बन्धविशेषो मानाभावात्, किन्तु पर्व्वतत्वव्यापकसाध्यप्रतियोगिकत्वं, तदपि संसर्गमर्य्यादया एव भासते। पर्व्वतो वह्निमानित्याकारकानुमितौ पर्व्वतत्वव्यापकवह्निसंयोगत्वेनैव संयोगस्य सम्बन्धविधया भानाङ्गीकाराद्' इति।

इत्थञ्च अवच्छेदावच्छेदेन 'संयोगेन वह्निमान् पर्वत' इति प्रतीतिः पर्वतत्वव्यापकवह्निप्रतियोगिकसंयोगसम्बन्धावच्छिन्नवह्नित्वावच्छिन्नप्रकारकपर्वतत्वावच्छिन्नविशेष्यताशालिनी ; वह्नौ पर्वतत्वव्यापकत्वस्य प्रतीतौ तुल्यवित्तिवेद्यतया यत् पर्वतत्वे व्याप्यत्वं भासते, तदेव तत्रत्यमवच्छेदकत्वमनतिरिक्तवृत्तित्वरूपं ज्ञेयम्, पर्वतत्वे तादृशावच्छेदकत्वं विना तादृशविशिष्टार्थस्य प्रतीत्यसम्भवात्। तादृशप्रतीतिस्थले प्रकारीभूतधर्मे धर्मितावच्छेदकव्यापकत्वस्य भानेन निखिलेष्वेव पर्वतेषु वह्निमत्तासिद्धिः ; निखिलेषु पर्वतेषु वह्निमत्त्वाभावे तादृशव्यापकत्वानुपपत्तेः। सामानाधिकरण्यमात्रेण प्रतीतिस्थले तु तादृशं व्यापकत्वं न भासते, अतो न तादृशमनतिरिक्तवृत्तित्वरूपं व्याप्यत्वमपि, इत्थञ्च संयोगेन पर्वतो वह्निमानिति सामानाधिकरण्यमात्रेण पर्वते वह्निज्ञानं संयोगत्वमात्रावच्छिन्नसंसर्गतानिरूपितवह्नित्वावच्छिन्न-प्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकमिति न सर्व्वत्र पर्वते फलतो वह्निसिद्धिः, परम् अविशेषतः पर्वतत्वविशिष्टमात्रे। तदुक्तं पक्षतामन्थे जगदीशेन ;—'पक्षता-

वच्छेदकसामानाधिकरण्यमात्रेणानुमितित्वं.....यद्रूपेण साध्यतावच्छेदक-सम्बन्धत्वं तादृशधर्ममात्रावच्छिन्नसंसर्गताकपक्षधर्मिकसाध्यानुमितित्वम्, एवमन्यत्राप्यूह्यम्

अनयोः प्रतीत्योरयमेव विशेषः यथा ;—अवच्छेदावच्छेदेन प्रतीतौ धर्मितावच्छेदकव्यापकधर्मप्रतियोगिकत्वेन अधिकेन अवच्छिन्ना संसर्गता, सामानाधिकरण्यमात्रेण प्रतीतौ पुनः संयोगत्वादिमात्रेणैवेति ॥

परे तु अवच्छेदावच्छेदेन ज्ञानस्थले व्यापकत्वरूपमवच्छेदकत्वमाहुः। स्वानतिरिक्तवृत्तित्वरूपव्याप्यत्वात्मकस्य अवच्छेदकत्वस्य उदाहरणन्तु—हेत्वाभासग्रन्थे हेत्वाभाससामान्यलक्षणादौ अनुसन्धेयम्। तदुक्तं सामान्य-निरुक्तौ शिरोमणिना,—'अवच्छेदकत्वञ्चेह। अनतिरिक्तवृत्तित्व'मिति। इति सामान्यतो निरुक्तमवच्छेदकत्वम्, अधिकमत्र ग्रन्थगौरवभिया न प्रस्तूयते।

———

## पर्य्याप्तिसम्बन्धः

इयमवच्छेदकता सामान्यतः स्वरूपसम्बन्धरूपा स्वरूपेणैव सम्बन्धेन अवच्छेदकवृत्तिर्भवति। स चायम् अवच्छेदकताया अवच्छेदकनिरूपित-वृत्तितानियामकः सम्बन्धो द्वेधा व्यवतिष्ठते, साधारणस्वरूपसम्बन्धः पर्य्याप्ति-रूपस्वरूपसम्बन्धश्च। अवच्छेदकता हि सामान्यस्वरूपसम्बन्धेन बहुषु अवच्छेदकेषु सत्सु यत्किञ्चिदेकत्रापि वर्त्तते, पर्य्याप्त्याख्यस्वरूपसम्बन्धेन तु यावन्तोऽवच्छेदकधर्मास्तावत्स्वेव, न न्यूनेषु, नाप्यधिकेषु। एकमात्रावच्छेद-कस्थले तु स्वरूपमात्रस्य पर्य्याप्त्याख्यस्वरूपस्य च संसर्गतायां न कोऽपि विशेषः। तथाहि नीलघटो नास्ति इति प्रतीतिसिद्धाभावीयप्रतियोगिता-

निरूपिता अवच्छेदकता नीलत्वे घटत्वे च वर्त्तते। तत्र स्वरूपमात्रेण अवच्छेदकता पृथक्तया नीलत्वे घटत्वे चाप्ति। पर्य्याप्त्याख्यस्वरूपेण तु नीलत्वं घटत्वञ्चेति सममेवोभयस्मिन्।

सोऽयमवच्छेदकतायाः पर्य्याप्त्याख्यस्वरूपसम्बन्धः अवच्छेदकताप्रतियोगिकः अवच्छेदकधर्मानुयोगिकश्च। येन सम्बन्धेन यो वर्त्तते तत्र तत्प्रतियोगितायाः येन सम्बन्धेन यत्र किञ्चिद् वर्त्तते तत्र तदनुयोगितायाश्च प्रतीतेः। तदत्र घटो नास्तीत्यादिप्रतीतिसिद्धाभावनिरूपितप्रतियोगितानिरूपितावच्छेदकताया घटत्वरूपे तादृशप्रतियोगितावच्छेदकधर्मे पर्याप्त्याख्यस्वरूपसम्बन्धेन वर्त्तमानतया तत्र पर्य्याप्तौ तादृशाभावीयप्रतियोगितावच्छेदकताप्रतियोगिकत्वं घटत्वरूपप्रतियोगितावच्छेदकधर्मानुयोगिकत्वञ्च पर्य्यवस्यति।

एवञ्च पर्याप्तिसम्बन्धस्य प्रतियोगितायास्तादृशावच्छेदकतायां वर्त्तमानतया अवच्छेदकतात्वेन प्रतीयमानायां तस्यां भासमाना पर्याप्तिसंसर्गनिरूपिता सा प्रतियोगिता तादृशावच्छेदकतात्वावच्छिन्ना, तस्याः प्रतियोगितायाश्च निरूपकः पर्याप्तिसम्बन्धः, तन्निरूपिता या अनुयोगिता अवच्छेदकधर्मे वर्त्तते सैव प्रकृतप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगिता, तदवच्छेदकधर्मश्च नावच्छेदकवृत्तिरपरो धर्मः, नापि स्वरूपतो भासमानेऽपि घटत्वादौ वर्त्तमानायास्तस्या अनुयोगितायाः निरवच्छिन्नत्वं, परं तदवच्छेदिका अवच्छेदकपर्याप्ता संख्यैव। तथाहि घटो नास्ति इत्यादौ घटनिष्ठा या अभावीयप्रतियोगिता तन्निरूपिता या घटत्वमात्रनिष्ठा अवच्छेदकता तत्प्रतियोगिकपर्याप्त्याख्यसम्बन्धनिरूपिता या घटत्वनिष्ठा अनुयोगिता तस्या अवच्छेदकं रूपं घटत्वगतमेकत्वमेव, न तु तादृशं किमपि घटत्वत्वादि धर्मान्तरमिति। तदेवं घटो नास्ति इत्येतदाकाराभावस्य विशेषतः परिचये वर्णनीये घटत्वगतैकत्वावच्छिन्नानुयोगिताकपर्याप्तिप्रतियोग्यवच्छेदकतानिरूपितप्रतियोगितानिरूपकोऽभाव इत्येव पर्यवस्यति।

नीलघटो नास्तीत्यादौ तु प्रतियोगितावच्छेदकं नीलत्वं घटत्वञ्चेति

उभयमेव, तत्र या तादृशपर्याप्त्यनुयोगिता तदवच्छेदकं नीलत्वघटत्वगत-मुभयत्वमेव। तदस्य विशेषतः परिचये वर्णनीये नीलत्वघटत्वगतद्वित्वा-वच्छिन्नानुयोगिताक-पर्याप्ति-प्रतियोग्यवच्छेदकतानिरूपितप्रतियोगितानिरूप-कोऽभाव इति वर्णनीयम्भवति। एवं रीत्या सर्वत्रैवावच्छेदकताप्रतिपत्तिस्थले पर्याप्तिमवलम्ब्य परिष्कारः प्रतिपत्तव्यः। प्रकारान्तरेण तत्र तत्र कथमपि परिष्कारकरणस्याशक्यत्वात्।

तादृशी पर्याप्तिं तन्निरूपितानुयोगितावच्छेदकविशेषञ्च अङ्गीकृत्य व्याप्तिलक्षणादिप्रकरणेषु परिष्कारः कृतो विपश्चिद्भिः। तत्प्रकारास्तत्र तत्र निपुणैरुन्नेयाः।

एवमेव साध्यतावच्छेदकता-पक्षतावच्छेकता-हेतुतावच्छेदकता-प्रकार-तावच्छेदकता- विशेष्यतावच्छेदकता--कार्यतावच्छेदकता--कारणतावच्छेदकता वृत्तितावच्छेदकताधिकरणतावच्छेदकतादीनामपि पर्याप्तिरीतिर्ज्ञातव्या। सर्व-त्रैव पर्याप्त्यनुयोगितावच्छेदकं रूपं संख्या। सम्बन्धान्तरस्थले तु न तथा नियम इत्येव सम्बन्धान्तरादस्य महान् विशेषः।

अवच्छेदकतादिवत् संख्याभूतानां द्वित्वादीनामपि पर्याप्तिः सम्बन्धो-ऽङ्गीक्रियते। स चापि 'द्वौ घटौ त्रयो घटा' इत्यादिप्रतीतिसाक्षिकः स्वरूप-सम्बन्धविशेषः।

इदमत्रावधेयम्, द्वित्वादयः संख्याः, अतस्ता गुणभूता एव इति सम-वायेनापि तत्सत्त्वं द्रव्ये अभ्युपगन्तव्यम्, विशेषस्तु संख्यानां गुणान्तरेभ्यः स्वाश्रयेषु यावत्सु पर्याप्त्याख्यस्वरूपसम्बन्धेन सत्त्वमेव। रूपादयो गुणाः स्वाश्रये यथा समवायेन वर्त्तन्ते, न तथा पर्याप्तिसम्बन्धेनापि, द्वित्वा-दयः संख्यास्तु यथा घटादौ द्वित्ववति समवायेन तिष्ठन्ति, तथा स्वाश्रयेषु यावत्सु पर्याप्तिसम्बन्धेनापि।

अस्ति संख्यादौ प्रत्येकनिरूपितमपि समवायसम्बन्धावच्छिन्नं सत्त्वं, न तु प्रत्येकनिरूपितं पर्याप्तिसम्बन्धावच्छिन्नम्, तथाहि 'घटौ' इत्यादि प्रतीत्या भासमानं द्वित्वमुभयोरेव घटयोः समुदाये वर्त्तते, न तु प्रत्येकमपि

घटे, अत एव 'उभयत्वमुभयत्रैव पर्याप्तं नत्वेकत्र' इति सिद्धान्तमाद्रियन्ते केचित्तन्त्रकाराः ।

अन्ये तु प्रत्येकमुभयत्रासत उभयत्र सत्त्वस्य अनुपपद्यमानतया उभयघटकीभूते प्रत्येकमपि उभयत्वादीनां सत्त्वमङ्गीकुर्वते, अत एव सिद्धान्तलक्षणप्रकरणे जगदीशेन 'प्रत्येकमुभयत्र पर्याप्तिसम्बन्धेनासतोऽवच्छेदकत्वस्य उभयत्र पर्याप्तिसम्बन्धेन सत्त्वायोगात्' इति । अवच्छेदकत्वनिरुक्तौ च 'प्रत्येकवृत्तौ पर्य्याप्तिसम्बन्धेनापि न तार्णातार्णो-भयत्वादेरभावः, किन्तु घटादावेव अन्यथा तत्सम्बन्धेन प्रत्येकावृत्तिधर्मस्य तत्सम्बन्धेन समुदायावृत्तित्वनियमाद् उभयत्रैव प्रत्येकं द्वित्वाभावसत्त्वात् इमौ न द्वाविति प्रतीत्यापत्तेरिति च प्रतिपादितम् । पूर्वस्मिन् मते उभयत्वादिकमुभयत्रैव, प्रत्येकन्तु कथमपि तस्य सत्त्वं नास्ति, प्रत्येकं तदभावो व्याप्यवृत्तिः । परस्मिन् मते तु उभयवत् प्रत्येकमपि द्वित्वाद्यवच्छेदेन उभयत्वादीनां सत्त्वं प्रत्येकमात्रवृत्तिधर्मावच्छेदेन च उभयत्वादीनामसत्त्वमिति अग्रावच्छेदेन वृक्षे सतः संयोगस्य मूलावच्छेदेन तत्रैव वृक्षे वर्त्तमानाभावप्रतियोगित्वादव्याप्यवृत्तित्वमिव उभयत्वावच्छेदेन प्रत्येकं सतोऽवच्छेकत्वादेः प्रत्येकमात्रवृत्तिधर्मावच्छेदेन तत्रैव वर्त्तमानाभावप्रतियोगित्वादव्याप्यवृत्तित्वमिति प्रतिपत्तव्यम् ।

'द्वौ' इति प्रतीतिः 'द्वित्ववात्' इति प्रतीतिश्च सम्बन्धांशे एव परस्परं भिन्नविषया, अयं न द्वौ किन्तु द्वित्ववान इति प्रतीतिस्तत्र मानम् । तथाहि 'द्वौ' इति प्रतीतौ द्वित्वं पर्याप्त्याख्यस्वरूपसम्बन्धेन भासते, द्वित्ववानिति प्रतीतौ 'समवायेन' ; अतएव समवायेन द्वित्वादेः प्रत्येकमप्यबाधिततया अयं द्वित्ववान् इत्यपि प्रतीतिः प्रमा, पर्याप्तिसम्बन्धेन तु द्वित्वादेरेकमात्रवृत्तित्वबाधात् 'अयं द्वौ' इति प्रतीतिर्न प्रमा ।

द्वित्वादीनामिव घटत्वादिधर्माणामपि पर्याप्तिसम्बन्धः कैश्चिदभ्युपेयते, तेषाञ्च घटत्वादिधर्मप्रतियोगिकपर्याप्त्यनुयोगितावच्छेदकं रूपं घटादिगतं-तत्तद्घटत्वमन्यतमत्वमेव वाऽङ्गीकर्त्तव्यम् । तदुक्तं जगदीशेनावच्छेदकत्व-

निरुक्तौ वह्नित्वपर्याप्त्यवच्छेदकीभूततत्तद्वह्नित्वावच्छेदेन यावत्त्वादेरपर्याप्तत्वाद् इति। व्यासज्यवृत्तिधर्माणामेव पर्याप्तिः सविशेषोपयोगेति ध्येयम्। 'अयमेको घट' इत्यादिप्रतीत्या एकत्वघटत्वादेरिदन्त्वावच्छिन्नपर्याप्तिकत्वमपि अभ्युपगम्यते, तदुक्तं जगदीशेनावच्छेदकत्वनिरुक्तौ,—'न च इदन्त्वावच्छिन्नपर्य्याप्त्यप्रसिद्धिः, एकत्ववह्नित्वादौ तत्सौलभ्यात्। एकत्वं वह्नित्वञ्च इदन्त्वावच्छिन्ने पर्याप्तं, न तु द्वित्वादिकमित्यनुभवस्य सर्वसिद्धत्वाद्' इति। पर्याप्तिशब्दस्य व्युत्पत्तिरालोच्यते चेदयमर्थो व्यवतिष्ठते, यथा परि सर्वतोभावेन आप्तिः सम्बन्धः पर्याप्तिः, परिशब्दस्य सर्वत इत्यर्थः समुपदिष्टो दृश्यते कुसुमाञ्जल्यादिग्रन्थे 'परिमलप्रोद्बोधबद्धोत्सव' इत्यस्यार्थविवरणप्रसङ्गे टीकाकारेण हरिदासेन। 'परि सर्वतः मलः सम्बन्धो व्याप्ति' रित्यत्र।

एतेन स्वाश्रयेषु यावत्सु साकल्येन सम्बन्ध एव पर्याप्तिपदेन लभ्यते ततश्च व्यासज्यवृत्तिधर्मप्रभृतीनां तत्र तत्र यावन्त आश्रयास्तावत्सर्वेष्वेव वर्त्तमानता तेषामनेन सम्बन्धेन समुपपाद्यते। एतद्व्युत्पत्त्यनुसारेणापि द्वित्वादीनामुभयादावेव सत्त्वं नैकत्र इत्युपपादितं भवति, एकमात्रसत्त्वे साकल्येन स्वाश्रयवृत्तित्वस्यापायात्।

पर्याप्तिरूपं सम्बन्धमेके नाभ्युपगच्छन्ति, तन्मते पर्याप्तिप्रयोजनमन्यथैव ते समुपपादयन्ति, तन्न समीचीनं, 'अयं न द्वौ किन्तु द्वित्ववान इत्यादिप्रतीतेः पर्याप्त्याख्यस्यातिरिक्तसम्बन्धस्यास्वीकारे दुरुपपादत्वादित्यादिकमूह्यम्।

# भाषारत्नस्य विषयसूची


**ग्रन्थारम्भः—** १—४ पृः

परमेश्वरप्रणतिः। ग्रन्थनिर्म्माणप्रतिज्ञा। ग्रन्थप्रतिपाद्यविषयादिसूचनम्। ग्रन्थकर्त्तृ-नामनिर्देशः। सत्यपि समाने प्राचीनतन्त्रान्तरे संक्षिप्योत्यनेनैतद्ग्रन्थस्योपयोगिता-कथनञ्च।

**पदार्थविभागः—** ५—७ पृः

भावाभावभेदेन प्रथमतो द्विविधपदार्थनिरूपणम्। भावपदार्थानां द्रव्यादिभेदेन षड्विधत्वकथनम्। द्रव्यत्वस्य जातित्वस्थापनम्। सत्तासामान्येन द्रव्यत्वस्य जातेर्गतार्थतानिरासश्च।

**द्रव्यलक्षणप्रकरणम्—** ७—८ पृः

गुणाश्रयत्वलक्षणं द्रव्यलक्षणमुक्त्वा पृथिव्यादौ तत्सङ्गतिप्रदर्शनम्। प्रथमलक्षणे घटादौ गुणाभावेऽपि तत्र द्रव्यलक्षणानुपपत्तिनिराकरणम्। द्रव्यलक्षणघटकानां पदानां प्रत्येकं सार्थक्यप्रदर्शनञ्च।

**द्रव्यविभागप्रकरणम्—** ८—११ पृः

द्रव्याणां पृथिव्यादिभेदेन नवविधत्ववर्णनम्। अन्धकारस्य दशमद्रव्यत्वमाशङ्क्य तस्य अभावरूपत्वस्थापनञ्च।

**पृथिवीलक्षणप्रकरणम्—** ११—१५ पृः

पृथिवीसञ्ज्ञायाः पृथिवीत्वरूपजातिप्रवृत्तिनिमित्तकत्वेन सार्द्वैतिकत्वकथनम्। पृथिव्या गन्धवत्त्वात्मकलक्षणकथनम्। द्विविधगन्धयुक्तैरवयवैरारब्धैकतरगन्धोत्पत्त्यसम्भवेन गन्धवत्त्वानुपपत्त्या तत्र तल्लक्षणानुपपत्तिमाशङ्क्य प्रकारान्तरेण लक्षणसुपन्यस्य दोष-निराकरणम्। एतद्द्रव्यत्तिसमवेतेत्यादितल्लक्षणस्य व्याख्यानादिप्रदर्शनेन उपपादनम्। पृथिवीत्वजातौ प्रमाणप्रदर्शनम्। द्रव्यत्वस्य गन्धसमवायिकारणतावच्छेदकत्वनिरा-करणञ्च। प्रसङ्गतो गन्धज-पाकजभेदेन गन्धस्य द्वैविध्यवर्णनञ्च।

**पृथिवीगुणादिप्रकरणम्—** १५—१८ पृः

पृथिव्या नित्यानित्यभेदेन द्वैविध्यकथनम्। पृथिव्या रूपादिचतुर्द्दशगुणाधारत्व-विवरणम्। रूपादिगुणानां तत्र शुक्लाद्यनेकप्रकारत्वादिनिरूपणम्।

**जललक्षणादिप्रकरणम्—** १८—२२ पृ:

जलमितिसंज्ञाया: पृथिवीसंज्ञाया इव सांसिद्धिकत्वव्यवस्थापनम्। जलत्वजातौ प्रमाणकथनम्। परमाणौ द्व्यणुके च जलत्वस्य जाते: सत्त्वोपपादनम्। दीधितिकृतां मते वसरेणुपर्यन्तं जलत्वं जाति: परमाणुद्व्यणुकसाधारणञ्च जलत्वमन्यदिति प्रतिपादनम्। स्नेहवत्त्वस्य शीतलस्पर्शवत्त्वस्य वा जललक्षणत्वं निरस्य एतद्व्यक्तिसमवेतेत्यादिजललक्षणनिरूपणम्। जले तल्लक्षणसङ्गमनम्। लक्षणघटकपदानां व्यावृत्तिप्रतिपादनम्। जलस्यापि पूर्ववदौत्या नित्यानित्यभेदेन वैविध्यकथनम्। तत्र रूपादिचतुर्दशगुणाधारत्वप्रतिपादनम्। तत्रत्यरूपादीना विशेषकथनञ्च।

**तेजोलक्षणादिप्रकरणम्—** २२—२५ पृ:

तेज इति सञ्ज्ञाया: पूर्ववत् सांसिद्धिकत्वकथनम्। उष्णस्पर्शवत्त्वस्य तेजोलक्षणत्वं दोषमाशङ्क्य एतद्व्यक्तिसमवेतेत्यादिनिर्दोषलक्षणोपन्यास:। तस्यापि पूर्ववत् वैविध्यादिनिरूपणम्। तस्य रूपादयेकादशगुणवत्त्वकथनम्। तदीयरूपादीना विशेषकथनञ्च।

**वायुलक्षणादिप्रकरणम्—** २५—२८ पृ:

वायुसंज्ञाया: सांसिद्धिकत्वकथनम्। तस्याप्येतद्व्यक्तिसमवेतेत्यादिलक्षणकथनम् वायौ तल्लक्षणसङ्गतिप्रदर्शनम्। वायौ प्रमाणप्रदर्शनम्। प्रत्यक्षस्य तत्र प्रमाणत्वमसम्भवीति समर्थ्य अनुमानस्य प्रमाणत्वप्रकटनम्। तस्य स्पर्शादिनवगुणाधारत्वप्रतिपादनम्। नित्यानित्यभेदेन वायोरपि वैविध्यकथनञ्च।

**पार्थिवशरीरादिप्रकरणम्—** २८—३२ पृ

पृथिव्यादिवायुन्तानां चतुर्णां शरीरेन्द्रियविषयभेदेन वैविध्यकथनम्। पार्थिवशरीरस्य योनिजायोनिजभेदेन वैविध्यकथनम्। देवर्षीणा कीटादीनाञ्चायोनिजदेहकथनम् जलीयशरीरस्य वरुणलोके प्रसिद्धिकथनम्। जलीयशरीरस्यापि पार्थिवभागोपष्टम्भादुपभोगसामर्थ्योक्ति:। तदीयेन्द्रियविषयनिर्देश:।

तैजसशरीरस्य सूर्यलोके प्रसिद्धिकथनम्। तस्य अयोनिजत्वपार्थिवभागसम्बन्धप्रयुक्तोपभोगसामर्थ्ययो: कथनम्। तदीयेन्द्रियविषयनिरूपणम्।

वायवीयशरीरस्य वायुवयवारब्धस्य वायुलोके प्रसिद्धिकथनम्। अयोनिजस्य तस्य पार्थिवावयवोपष्टम्भेन उपभोगसामर्थ्यकथनम्। वायवीयेन्द्रियस्य संज्ञास्थानप्रयोजनाकथनम्। वायवीयविषयनिरूपणम्। अभ्यन्तरवायो: प्राणादिभेदपञ्चककथनम्। तस्य रसमलधातुप्रेरणादितुल्योक्ति:।

आकाशकालदिशां गुणादिप्रकरणम्— ३२—३५ पृः

आकाशादौ तवे द्रव्यत्वव्याप्यजात्यभावेन आकाशादिसंज्ञायाः सार्वत्रिकत्वाभाववचनम्। तत्रैव भाष्यकारवचनसंवादप्रदर्शनम्। आकाशादिसंज्ञायाः पारिभाषिकत्वनिरूपणम्। पारिभाषिक्यादिभेदेन सज्ञात्रैविध्यकथनम्। आकाशस्य सख्यादिषड्गुणवत्त्वकथनम्। कालस्य सख्यादिपञ्चगुणकत्वकथनम्। कालदिशोरेकैकत्वेऽपि औपाधिकभेदव्यपदेशकथनम्। दिशोऽपि पञ्चगुणकत्वकथनम्। आकाशकालदिशा परममहत्त्वकथनम्।

आत्मगुणादिप्रकरणम्— ३६—३८ पृः

आत्मसंज्ञायाः सार्वत्रिकत्वोक्तिः। आत्मत्वजातौ प्रमाणकथनम्। ईश्वरात्मन्यपि आत्मत्वजातेः सत्त्वोपपादनम्। जीवात्मनः सख्यापरिमाणादिचतुर्दशगुणकत्वकथनम्। जीवात्मनामानन्त्यनिरूपणम्।

मनोगुणादिप्रकरणम्— ३८—४१ पृः

मनःसंज्ञायाः सार्वत्रिकत्वकथनम्। मनस्त्वजातौ प्रमाणकथनम्। शरीरभेदेन मनसो भेदनिरुक्तिः। तस्य सख्याद्यष्टगुणकत्वकथनम्। तदीयपरिमाणादीनां विशेषकथनम्। तस्य वेगाख्यसंस्कारभावकथनम्।

परमात्मगुणादिप्रकरणम्— ४१—४२ पृः

परमात्मनः सख्याद्यष्टगुणकत्वकथनम्। अस्य परिमाणादीना विशेषकथनम्। वायुादीना गुणसख्याभेदे प्राचीनसंवादप्रदर्शनम्। दीधितिकारमते ईश्वरस्य नित्यसुखमादाय नवगुणकत्वकथनम्।

गुणलक्षणादिप्रकरणम्— ४२—४४ पृः

गुणसज्ञायाः सार्वत्रिकत्वकथनम्। गुणलक्षणनिर्वचनम्। लक्षणघटकपदाना व्यावृत्तिकथनम् गुणानां चतुर्विंशतिविधत्वोक्तिः। विशेषतश्चतुर्विंशतेः प्रदर्शनञ्च

रूपलक्षणादिप्रकरणम्— ४४—५२ पृः

रूपादिसज्ञानां सार्वत्रिकत्वकथनम्। रूपलक्षणनिरुक्तिः। लक्षणघटकपदाना व्यावृत्तिप्रदर्शनम्। रूपलक्षणघटकचक्षुर्ग्राह्यत्वस्य रूपे असिद्धिमाशङ्क्य तद्दोषनिराकरणम्। रूपस्य शुक्लादिभेदेन अनेकविधत्वकथनम्। रसादीनां मधुरादिभेदेन भेदकथनम्। गन्धं प्रति विजातीयवायुसंयोगस्य हेतुत्वोक्तिः। सयोगादीनां गुणानामव्याप्यवृत्तित्वकथनम्। अपेक्षाबुद्धिभिन्नज्ञानेच्छाकृतीना द्वेषसुखदुःखशब्दानाञ्च

स्वतन्त्रीयत्वचणे विनाशकथनम्। अपेक्षाबुद्धेः द्वित्वादिलौकिकप्रत्यक्षानुरोधेन स्वीयचतुर्थक्षणे विनाशित्वकथनम्। दीधितिकारमते द्वित्वादिप्रत्यक्षस्य द्वित्वाद्यंशे अलौकिकत्वात् अपेक्षाबुद्धेरपि स्वीयस्वतन्त्रीयक्षणे विनाशित्वकथनम्। सख्योगादीनां द्विष्ठत्वादिनिर्देशश्च।

**कर्म्मलक्षणादिप्रकरणम्—** ५२—५४ पृः

कर्म्मसत्तायाः सार्व्वत्रिकत्वकथनम्। कर्म्मलक्षणकथनम्। लक्षणघटकपदानां व्यावृत्तिप्रदर्शनम्। कर्म्मणः उत्क्षेपणादिभेदेन पञ्चविधत्वकथनम्। भाष्यकारमतसवादेन भ्रमणादिना अधिकसंख्याशङ्कानिरासः।

**सामान्यलक्षणादिप्रकरणम्—** ५४—५५ पृः

सामान्यलक्षणकथनम्। लक्षणघटकपदानां व्यावृत्तिप्रदर्शनम्। परापरभेदेन सामान्यस्य द्वैविध्योपपादनम्।

**विशेषलक्षणादिप्रकरणम्—** ५६—५७ पृः

विशेषाणाम् असख्यत्वकथनम्। विशेषस्य लक्षणकथनम्। विशेषे तल्लक्षणोपपादनम्। लक्षणघटकपदानां व्यावृत्तिप्रदर्शनम्।

**समवायलक्षणादिप्रकरणम्—** ५८—६० पृः

समवायस्य प्रमाणकथनम्। समवायस्य एकमात्रत्वकथनम्। समवायलक्षणनिरुक्तिः। लक्षणघटकपदानां व्यावृत्तिप्रदर्शनम्। सम्बन्धलक्षणकथनम् तद्घटकपदानां व्यावृत्तिप्रदर्शनञ्च।

**साधर्म्म्यवैधर्म्म्यप्रकरणम्—** ६०—६५ पृः

अस्तित्वादीना द्रव्यादिषट्पदार्थसाधर्म्म्यत्वकथनम्। अस्तित्वादिस्वरूपनिर्व्वचनम्। नित्यद्रव्येतरादीना यथायथमाश्रितत्वादिसाधर्म्म्यकथनम्। मूर्त्तत्वस्याव्याप्त्रपरिमाणवत्त्वरूपत्वोक्तिः मतविशेषे जातिस्वरूपत्वोक्तिश्च। साङ्ख्येन भूतत्वस्य जातित्वाभावकथनम्। घ्राणादीनां पार्थिवेन्द्रियत्वादिवर्णनम्। पृथिव्यादीना विभिन्नेन्द्रियग्राह्यतत्तद्विशेषगुणाधारत्वकथनम्। गन्धादीना पृथिव्याद्यसाधारणगुणत्वोक्तिश्च।

**अभावलक्षणादिप्रकरणम्—** ६६—६८ पृः

अभावलक्षणकथनम्। अभावस्य संसर्गान्योन्याभावभेदेन द्वैविध्यकथनम्। द्विविधस्वरूपनिरुक्तिः। संसर्गाभावस्य भेदत्रयकथनम्। मतभेदेन ध्वंसप्रागभावयोरैक्यमा-

भावविरोधित्वकथनम्। अत्यन्ताभावस्य त्रैकालिकत्वविचारः। प्राभाकरमते अभावस्य अधिकरणस्वरूपत्वकथनम्। उक्तप्राभाकरमतखण्डनम्।

**प्रमाणसामान्यप्रकरणम्—** ७०—७४ पृः

प्रमाणनिरूपणीयपदार्थकथनम्। प्रमाणलक्षणनिरुक्तिः। लक्षणीयपदानम्। प्रमाणलक्षणघटकप्रमाणनिरूपणम्। प्रमालक्षणघटकपदानां व्यावृत्तिप्रदर्शनम्। करणलक्षणकथनम्। तल्लक्षणीयपदानम्। तस्य व्यावृत्तिप्रदर्शनम्। फलोपधायकस्वरूपयोग्यभेदेन कारणस्य वैविध्यमुक्त्वा तदुदाहरणीयन्यासः करणस्वरूपे मीमांसकशिवादित्यमिश्रयोर्मतभेदकथनम्।

**कारणलक्षणादिप्रकरणम्—** ७४—७८ पृः

करणलक्षणकथनम्। तदृघटकपदानां व्यावृत्तिप्रदर्शनम्। कारणलक्षणघटकान्यथासिद्धिपक्षनिर्वचनम्। प्रत्येकं तदुदाहरणप्रदर्शनम। तस्य विशेषत उपपादनम्।

**कारणावान्तरभेदप्रकरणम्—** ७८—८२ पृः

कारणत्रैविध्यकथनम्। त्रिविधकारणलक्षणनिरुक्तिः। तन्तोरिव तुर्य्यां अपि पटसमवायिकारणत्वमाशङ्क्य समवायाभावप्रतिपादनेन तत्खण्डनम्। अयुतसिद्धप्रतिपादनम्। असमवायिकारणप्रतिपादनम्। निमित्तकारणस्वरूपप्रतिपादनम्। भावकार्य्ये उक्तत्रिविधकारणसम्भवकथनम्। सक्रिये तदुपपादनम्। अभावरूपकार्य्यस्य निमित्तकारणमात्रोपपादनम्।

**प्रमाणविभागप्रकरणम्—** ८२—८७ पृः

न्यायसूत्रसंवादेन प्रत्यक्षादिभेदेन प्रमाणचातुर्विध्यकथनम्। प्रत्यक्षप्रमाणलक्षणनिरुक्तिः। तल्लक्षणीयपदानम्। प्रत्यक्षप्रमितिलक्षणमुक्त्वा लक्ष्ये तदुपपादनम्। यथाश्रुत इन्द्रियार्थसन्निकर्षघटितलक्षणस्य दोषमाशङ्क्य निष्कृष्टलक्षणकथनेन तन्निरासः। एतद्व्यक्तिसमवेतेत्यादिनिष्कृष्टलक्षणस्य लक्ष्ये सङ्गतिं प्रदर्श्य तदृघटकपदानां व्यावृत्तिप्रदर्शनम्।

**प्रत्यक्षप्रमाणभेदप्रकरणम्—** ८७—१०२ पृः

प्रत्यक्षप्रमाणानाम् इन्द्रियाणां चक्षुरादिभेदेन षड्विधत्वकथनम्। तदृव्यापारस्य लौकिकालौकिकभेदेन द्वैविध्यप्रतिपादनम्। लौकिकसन्निकर्षस्य संयोगादिभेदेन षड्विधत्वकथनम्। अलौकिकस्य सामान्यलक्षणादिभेदेन त्रैविध्यकथनम्।

संयोगादिभिः सन्निकर्षैः यथायथं द्रव्यादीनां प्रत्यक्षनिर्वचनम्। तत्तत्प्रत्यक्षतत्तदिन्द्रिय-सन्निकर्षयोर्विशिष्य कार्यकारणभावप्रतिपादनम्। कार्यकारणभावघटकपदार्थानां विशिष्योपयोगिताप्रदर्शनम्। कार्यकारणभावस्य पुरुषविशेषनियन्त्रितत्वस्य उपयोगिता-प्रतिपादनम्। चाक्षुषप्रत्यक्षे आलोकसंयोगस्यापि हेतुत्वोपपादनम्। बहिर्द्रव्यप्रत्यक्षे उद्भूतरूपवत्त्वस्यापि हेतुत्वमुक्त्वा पिशाचादिप्रत्यक्षनिवारणम्। आलोकसंयोग-घटकालोकस्वरूपनिर्वचनम्। तद्घटकपदानां सार्थक्यसम्पादनम्। आलोकसंयोग-मन्तरेणापि अञ्जनविशेषादिना द्रव्यचाक्षुषोत्पत्त्या व्यभिचारमाशङ्क्य तन्निराकरणम्। द्रव्यस्य एकदेशावच्छेदेन आलोकसंयोगस्य अपरदेशावच्छेदेन च चक्षुःसंयोगस्य सत्त्वदशायां चाक्षुषापत्तिखण्डनम्। परमाण्ववच्छेदेन घटादौ चक्षुःसंयोगसत्त्वेऽपि घटादिचाक्षुषापत्तिवारणाय स्थूलावयवावच्छिन्नचक्षुःसंयोगस्य हेतुत्वकथनम्। चक्षुःसंयोग-निष्ठवैजात्यस्य साङ्कर्येण जातित्वाभावकथनम्। क्रियाजन्यतावच्छेदकजातेरेव नानात्वं न तु चक्षुःसंयोगनिष्ठवैजात्यस्य इति विशिष्य प्रतिपादनम्।

## रूपादिप्रत्यक्षप्रकरणम्— १०२—१०६ पृः

द्रव्यसमवेतादिचाक्षुषं प्रति चक्षुःसंयुक्तसमवायत्वादिना हेतुत्वोक्त्या, रूपादिचाक्षुष-सम्पादनम्। द्रव्यसमवेतसमवेतचाक्षुषं प्रति अवश्यकुलालकारणताकचक्षुःसंयुक्तसमवेत-समवायादेव द्रव्यचाक्षुषद्रव्यसमवेतचाक्षुषयोरुत्पादसम्भवेन तत्र तत्र संयोगस्वसंयुक्त-समवाययोर्हेतुत्वाभावमाशङ्क्य तन्निराकरणम्।

## द्रव्यादित्वार्शनादिप्रकरणम्— १०६—११२ पृः

द्रव्यत्वार्शनप्रत्यक्षे त्वक्संयोगस्य हेतुत्वकथनम्। उद्भूतस्पर्शस्यापि स्पार्शने हेतुत्वात् प्रभायाः स्पार्शनापत्तिखण्डनम्। द्रव्यसमवेतादित्वार्शनं प्रति त्वक्संयुक्तसमवायत्वादिना हेतुत्वव्यवस्थया द्रव्यत्वादेः स्पार्शनोपपादनम्।

द्रव्यादिमानस प्रति मनःसंयोगत्वादिना हेतुत्वव्यवस्थया आत्मादेर्मानसप्रत्यक्षोप-पादनम्।

रसादिरासनं प्रति रसनसंयुक्तसमवायत्वादिना हेतुत्वव्यवस्थया रसादेः रासनप्रत्यक्षोप-पादनम्। विशेषतः कार्यकारणभावघटकपदार्थानामुपयोगिताप्रदर्शनम्। कारण-तावच्छेदकगर्भे महत्त्वनिवेशस्यार्थक्यकथनम्।

गन्धादिघ्राणजं प्रति घ्राणसंयुक्तसमवायादेर्हेतुत्वोक्त्या गन्धादिघ्राणजोपपादनम्। घ्राणजत्वस्य प्रत्यक्षत्वव्याप्यजातिविशेषत्वकथनम्।

श्रावणप्रत्यक्षप्रकरणम्— ११२—११६ पृः

शब्दादिश्रावणप्रत्यक्षं प्रति श्रोत्रसमवायादेर्हेतुत्वकथनात्शब्दादिश्रावणोपपादनम्। विजातीयवायुसंयोगस्य ककारादिशब्दहेतुत्वात् ककारादीनां कादाचित्कत्वस्थितेः ककारादिश्रावणस्य कादाचित्कत्वोपपादनम्। ककारादीनां स्वोत्तरोत्पन्नशब्दनाश्यत्वकथनम्। मीमांसकमते ककारादिशब्दानां नित्यत्वमाशङ्क्य स्वमते तत्खण्डनेन अनित्यत्वव्यवस्थापनम्।

अभावप्रत्यक्षप्रकरणम्— ११६—१२८ पृः

अभावप्रत्यक्षे सामान्यतो विशेषणतायाः सन्निकर्षत्वकथनम्। द्रव्यादिवृत्त्यभावचाक्षुषादौ संयुक्तविशेषणतादीनां विशिष्य सन्निकर्षतात्प्रतिपादनम्। अभावप्रत्यक्षे योग्यानुपलब्धेरपि हेतुत्वाद् भूतलादौ पिशाचाद्यभावप्रत्यक्षापत्तिखण्डनम्। योग्यानुपलब्धिस्वरूपविचारः। पृथिव्यादिपरमाणौ जलत्वाद्यभावप्रत्यक्षवारणाय संयुक्तसमवेतविशेषणतात्वेन हेतुत्वकथनम्। अनुपलब्धिनिष्कर्षं प्रतिपादनम्। योग्यानुपलब्धेः कारणत्वमनङ्गीकृत्यापि पिशाचाद्यभावप्रत्यक्षस्य प्रकारान्तरेण वारणम्। भाट्टमते अभावस्य अनुपलब्ध्याख्यप्रमाणान्तरग्राह्यत्वमाशङ्क्य तत्खण्डनम्। एकदा सत्स्वपि नाना विषयेषु नानेन्द्रियसन्निकर्षेषु नानाज्ञानोत्पादस्य मनसोऽणुत्वेन वारणम्। मीमांसकमते मनसो विभुत्वमाशङ्क्य स्वमते तत्खण्डनेनाणुत्वव्यवस्थापनम्।

अलौकिकसन्निकर्षादिप्रकरणम्— १२८—१३८ पृः

सामान्यलक्षणादिभेदेन त्रिविधालौकिकसन्निकर्षकथनम्। त्रिविधैः सन्निकर्षैस्त्रिविधालौकिकप्रत्यक्षोपपादनम्। आलोकसंयोगाभावदशाया घट इति सृत्या घटत्वेन यावद्घटचाक्षुषापत्तिवारणम्। ज्ञानलक्षणसन्निकर्षस्य सन्निकर्षत्वव्यवस्थापनम्। चाक्षुषादिस्थले तत्प्रकारकचाक्षुषत्वादीनां मानसस्थले च तत्प्रकारकमानसत्ववत् तद्विशेष्यकमानसत्वस्यापि ज्ञानलक्षणप्रत्यासत्तिजन्यतावच्छेदकत्वाद् ज्ञानलक्षणप्रत्यासत्त्या तत्तद्विशेष्यकमानसप्रत्यक्षोपपादनम्। निर्विकल्पकसविकल्पकभेदेन प्रत्यक्षस्य द्वैविध्यस्यापि कथनम्। निर्विकल्पकविषयता-प्रकारत्वाख्यविषयता-विशेष्यत्वाख्यविषयता-सांसर्गिकविषयतामेदेन विषयताचातुर्विध्यकथनम्। विषयतास्वरूपनिर्वचनम्। प्रकारविशेष्ययोः स्वरूपकथनम्। निर्विकल्पके प्रमाणप्रदर्शनम्। समज्ञानमनङ्गीकुर्वतो मीमांसकस्य मतखण्डनम्।

**ज्ञानप्रामाण्यग्रहप्रकरणम्—** १३८—१४४ पृ:

ज्ञानप्रामाण्यग्रहे स्वत:प्रामाण्यवादिमीमांसकमतीपन्यास:। मुरारिमिश्रमतस्य भट्टमतस्य च विवरणम्। तत्तन्मतखण्डनेन स्वमते अनुमानत: प्रामाण्यग्रहव्यवस्थापनम्।

**अनुमानप्रकरणम्—** १४४—१४८ पृ:

अनुमानस्वरूपकथनम्। अनुमानघटकानुमितिलक्षणकथनम्। लक्ष्ये तल्लक्षणोपपादनम्। साध्यविशेषघटितव्याप्तिज्ञानजन्यत्वस्य साध्यान्तरविषयकानुमितावप्यक्षात् तत्तल्लक्षणाव्याप्तिमाशङ्क्य एतद्व्यक्तिसमवेतेत्यादिलक्षणोपन्यासेन दोषवारणम्। लक्षणघटकपदाना व्यावृत्तिप्रदर्शनम्।

**व्याप्तिप्रकरणम्—** १४८—१५७ पृ:

साध्याभाववदवृत्तित्वस्य व्याप्तित्वकथनम्। यथाश्रुत लक्ष्ये तदुपपादनम्। साध्याभावादिपरिष्कारेणाव्याप्त्यादिदोषवारणम्। मतभेदेनानौपाधिकसम्बन्धादीना व्याप्तित्वालोचनम्। तव दोषमुद्भाव्य निष्कृष्टव्याप्तिलक्षणनिर्वचनम्। तल्लक्षणघटकपदाना व्यावृत्तिकथनम्।

**व्याप्तिग्राहकप्रकरणम्—** १५८—१६८ पृ:

भूयोदर्शनस्य व्याप्तिग्राहकत्वमुपन्यस्य तत्खण्डनेन व्यभिचारज्ञानविरहसहचारदर्शनयोर्व्याप्तिनिश्चायकत्वकथनम्। क्वचित् तर्कबलात् क्वचिच्च स्वत एव व्यभिचारज्ञानविरहसमर्थनम्। परामर्शे व्याप्तिज्ञानव्यापारत्वव्यवस्थापनम्। अनुमितिनिरूपितव्याप्तिज्ञानवृत्तिकारणतावच्छेदकविचार:। अनुमितौ परामर्शकारणतावच्छेदकविचार:। परामर्शस्वरूपनिरूक्ति:। अनुमितिपरामर्श-योर्विशिष्यकार्यकारणभावविवेचनम्। तत्तल्लिङ्गकत्वस्य कार्यतावच्छेदके प्रवेशेन शङ्कितस्य व्यभिचारस्य निराकरणम्। धूमलिङ्गकत्वादीना जातित्वतदभावविचार:। लिङ्गोपहितलैङ्गिकभानवादिनामाचार्याणा मते अनुमितिपरामर्शयो: कार्यकारणभावादिविवेचनम्। पक्षताया अनुमितिकारणत्वकथनेन सिद्धिसत्त्वे अनुमितेरापत्तिखण्डनम्।

**पक्षताप्रकरणम्—** १६८—१७० पृ:

साध्यसन्दिग्धस्य पक्षताया दोषमुद्भाव्य सिषाधयिषाविरहविशिष्टसिद्धाभावस्य पक्षतात्वव्यवस्थापनम्। तल्लक्षणघटकपदव्यावृत्तिप्रदर्शनम्। अवच्छेदावच्छेदेन सामानाधिकरण्येन च अनुमितिभेदात् सिद्ध्यनुमित्यो: प्रतिबध्यप्रतिबन्धकभावभेदप्रदर्शनम्। प्राभाकरमते पक्षताया अनुमितिहेतुत्वाभावसमर्थनम्।

अनुमानप्रामाण्यप्रकरणम्— १७०—१७४

अनुमितिज्ञानस्य मानसोपनीतभानत्वशङ्कनम्। अनुमिनोमीत्यनुव्यवसायेन अनुमितित्वस्य पृथक्त्वव्यवस्थापनम्। पुनरनुमितित्वस्यानपलापेन मानसत्वव्याप्यत्वपूर्व्वपक्षः। अथ बहुगुरुत्तरप्रतिबध्यप्रतिबन्धकभावकल्पनाभिया अनुमितित्वस्य मानसत्वव्याप्यत्वानङ्गीकरणम्।

केवलान्वयिसाध्यकादिभेदेन अनुमानत्रैविध्यप्रतिपादनम्। केवलान्वयिसाध्यकादिस्वरूपनिरूपणम्। प्रत्येकदृष्टान्तेन ततस्वरूपोपपादनञ्च।

न्याय-तदवयवप्रकरणम्— १७५—१७६

स्वार्थपरार्थभेदेनानुमानद्वैविध्यस्यापि प्रतिपादनम्। स्वाथपरार्थस्वरूपकथनम्। परार्थानुमानस्य न्यायसाध्यत्वप्रतिपादनम्। न्यायस्वरूपनिर्वचनम्। सोदाहरणप्रतिज्ञादिपञ्चकनिरूपणम्। न्यायलक्षणघटकपदकृत्यप्रदर्शनम्। प्रत्येकं प्रतिज्ञादिस्वरूपनिरूपणम् ततपदकृत्यप्रदर्शनञ्च।

हेत्वाभासप्रकरणम्— १७६—१८६

स्वीयसाध्यसाधकहेतौ सद्धेतुत्वव्यवस्थापनयेव परकीयसाध्यसाधकहेतौ हेत्वाभासत्वव्यस्थापनयापि प्रमाणतत्त्वनिर्णयोपयोगितया हेत्वाभासनिरूपणप्रतिपादनम्। हेत्वाभासपदस्य व्युत्पत्तिभेदेन हेतुदोषपरत्वस्य दुष्टहेतुपत्वस्य च प्रतिपादनम्। व्यभिचारादिभेदेन पञ्चानां हेतुदोषाणां विभजन तल्लक्षणनिर्वचनञ्च। साधारणादिभेदेन व्यभिचारत्रैविध्यकथनम्। साधारणादिस्वरूपनिर्वचनम् विरोधादिदोषान्तरस्वरूपोदाहरणादिविवेचनम्। असिद्धिसतप्रतिपक्षाभ्यां बाधस्य गतार्थतामाशङ्क्य तन्निराकरणञ्च।

उपमानप्रमाणप्रकरणम्— १८६—१८६

उपमानस्वरूपप्रतिपादनम्, उपमितित्वस्य अनुव्यवसायसिद्धजातित्वकथनम्। उपमानस्य अतिदेशवाक्यार्थज्ञानत्वोपपादनम्। उपमानप्रमाणसाहायकेन उपमितिसमुत्पादप्रकारप्रदर्शनम्। साधर्म्मज्ञानवत् वैधर्म्मज्ञानतोऽपि उपमितिसमुत्पादोपपादनञ्च।

शब्दप्रमाणप्रकरणम्— १८६—१६५

शब्दप्रमाणस्वरूपकथनम्, शाब्दत्वस्य अनुव्यवसायसिद्धजातित्वप्रतिपादनम। शब्दप्रमाणस्य पदज्ञानत्वोपपादनम् शाब्दप्रमाकरणस्य पदज्ञानस्य वृत्त्या पदजन्य-

पदार्थोपस्थितिव्यापारकत्वकथनम्। शक्तिलक्षणाभेदेन वृत्तिद्वैविध्यनिरूपणम्। व्यापारांशे वृत्त्या पदजन्यत्वनिवेशप्रयोजनकथनम पदज्ञानजन्यपदार्थोपस्थितेर्व्यापारत्वनिराकरणम् पदज्ञानोपपादनम्। शाब्दबोधस्य मतभेदेन राजपुरप्रवेशादिन्यायेन समुत्पादविचारः। निराकांक्षवाक्यात् शाब्दबोधापत्तिखण्डनञ्च।

आकाङ्क्षाप्रकरणम्— १९५—२००

आकाङ्क्षास्वरूपविचारः, आकाङ्क्षास्वरूपसिद्धान्तः। विशिष्य उदाहरणेन तदुपपादनम्। प्राचीनमते घटमानय इत्यादौ घटीयकर्म्मत्वस्य आनयनांशे प्रकारतया संसर्गतया च भानप्रतिपादनम्।

आकाङ्क्षाज्ञानादिहेतुताप्रकरणम्— २००—२०७

आकाङ्क्षासंशयात् शाब्दबोधवारणाय आकाङ्क्षाज्ञानस्य आकाङ्क्षानिश्चयत्वेन हेतुताकथनम्। सेको न वह्निकरणक इत्यादिज्ञानदशायां वह्निना सिञ्चतीत्यादितः शाब्दबोधवारणाय योग्यताज्ञानस्य शाब्दबोधहेतुताप्रतिपादनम्। योग्यतायाः स्वरूपनिरूपणम्। योग्यतालक्षणघटकपदकृत्यप्रदर्शनम्। बाधनिश्चयाभावेन योग्यताज्ञानकारणतायां गतार्थत्वशङ्कानिरासः। परस्परमनासन्नपदसमूहात् शाब्दसमुत्पादवारणाय आसत्तिनिश्चयस्यापि शाब्दकारणत्वोपपादनम्। एकतात्पर्यगोचरितात् शब्दात् अन्यार्थविषयकशाब्दवारणाय तात्पर्यज्ञानस्यापि शाब्दहेतुताप्रतिपादनम्। वैशेषिकमतमाश्रित्य शब्दस्य प्रमाणान्तरत्वमपोह्य नैयायिकमतेन तस्य प्रमाणान्तरत्वोपपादनञ्च।

शब्दस्य शक्तिप्रकरणम्— २०८—२१२

शब्दशक्तिस्वरूपनिरूपणम्। शक्तिग्राहकप्रतिपादनम्। सर्गादौ ईश्वरस्यैव प्रयोज्यप्रयोजकशरीरपरिग्रहेण शक्तिशिक्षणकथनम्। ईश्वरे प्रमाणप्रदर्शनञ्च।

पदानां जातिशक्त्यादिप्रकरणम्— २१२—२१५

मीमांसकमतसिद्धं जातिशक्तिसिद्धान्तमपोह्य व्यक्तिशक्तिसिद्धान्तस्थापनम्। कार्यान्विते शक्तिवादनिराकरणञ्च।

लक्षणाप्रकरणम्— २१५—२१७

लक्षणायाः स्वरूपनिरूपणम्। गौणीशुद्धाभेदेन लक्षणाया द्वैविध्यकथनम्। उदाहरणेन तदुपपादनञ्च।

इति सूचीपत्रं समाप्तम्।

# भाषारत्नम्

## श्रीमत्कणादतर्कवागीश-प्रणीतम्

[ ग्रन्थारम्भः ]

ओम् सृष्टिस्थितिप्रलयकारिणे नमः ।

चूड़ामणिपदाम्भोजभ्रमरीभूतमौलिना ।
संक्षिप्य श्रीकणादेन भाषारत्नं वितन्यते ॥

यत्पादपङ्कजपरागपवित्रगात्रः
सर्व्वत्र जैत्रपदवीमुपगन्तुमीशे ।
पित्रोस्तयोः पदयुगं हृदये प्रपद्ये
प्रोद्यन्मनोरथतरोः सफलत्वमाप्तुम् ॥

भाषारत्नं श्रीकणादप्रणीतं
भासा रत्नं यत्नदृश्यं विधत्ते ।
तस्मादस्य प्रोज्ज्वला कापि लक्ष्मी-
र्लक्ष्या लोकै रत्नलक्ष्मीति नाम्ना ॥

अकाले स्वर्गमाप्तायाः स्वपत्न्याः स्मृतिहेतवे ।
तन्नामांशमुपादाय टीकानाम व्यधामिदम् ॥

अथ सत्स्वपि प्रभूतेषु तर्कभाषापरिच्छेदग्रन्थेषु कस्यचिदति-संक्षेपेण सिद्धान्तमात्रावेदकत्वात् कस्यचिच्च दुरूहतर्कबहुलत्वात् तेभ्यो जिज्ञासूनामर्भकाणामतिसुखेन तार्किकभाषापरिच्छेदमविच्छेद-

मपश्यन् तर्कवागीशोपनामा श्रीमान् कणादः सुबोधावश्यकविचाररीति-सुभगं भाषारत्नं नाम वैशेषिकग्रन्थरत्नं निबन्धुकामः प्रारिप्सितस्य तस्य निर्व्विघ्नपरिसमाप्तये सृष्ट्यादिकर्त्तृत्वेन सिद्धभावस्य परमात्मनो नमस्कारं शिष्यशिक्षायै निबध्नाति सृष्टीत्यादिना।

ओमित्यादिः।—'ओम् तत् सदिति निर्द्देशो ब्रह्मणस्त्रिविधः स्मृत' इति शास्त्रात् ओमशब्दस्य परमात्मापरपर्य्यायब्रह्मवाचकतया परमात्मन इत्यर्थः। सृष्टीत्यादितद्विशेषणपदोपादानञ्च तत्रैव परमात्मनि प्रमाणप्रदर्शनाय; 'क्षितिः सकर्त्तृका कार्य्यत्वादित्याद्यनुमानस्य परमेश्वरसाधकतायाः प्राचीनैरुपपादितत्वात्।

न च एकस्य सृष्टिकारित्वस्य परमात्मनि विशेषणविधया उपन्यासेनैव सिषाधयिषितवस्तुसाधनस्य सुशकतया स्थितिप्रलयकारित्वोपादानं विफलमिति वाच्यं सृष्टिस्थितिप्रलयकारित्वानामेक-परिहारेणापरस्य साधकत्वाभ्युपगमे विनिगमनाविरहादविशेषेण त्रयाणामेवोपादानात्।

ओमित्यादिना प्रतिपादितो नमस्कारश्च मङ्गलाचरणलक्षणः। ओमितिपदस्य प्रारम्भे सन्निवेशोऽपि मङ्गलसाधक एवेति मन्तव्यम्। यदुक्तम् 'ओङ्कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ' ॥ इति।

मङ्गलाचरणस्य कर्त्तव्यत्वं समाप्तिफलकत्वञ्च 'समाप्तिकामो मङ्गलमाचरेद्' इति शिष्टाचारानुमितश्रुत्या प्रतिपाद्येते, नातो नमस्कारेण ग्रन्थस्यापार्थमाधिक्यमिति।

ओमित्यस्य परमेश्वरवाचकत्वमाह पतञ्जलिः, 'तस्य वाचकः प्रणव' इति सूत्रेण। प्रणवात्मकस्य च ओम्पदस्य विग्रहदृष्ट्या अकारोकारमकारस्वरूपतावभासेन ब्रह्मविष्णुमहेश्वरस्वरूपाभिव्यपरमात्मप्रतिपादकत्वम्। परमेश्वर एव हि ब्रह्मादिशरीरमुपादाय सृष्ट्यादिकर्म्माणि करोतीति श्रुत्यादिभिरनुशिष्टमास्ते। तदयं

नमस्कारः परमेश्वरस्यैवेति निरपवादो राद्धान्तः। विस्तरस्तु सुधीभिरन्यत्र स्वयमनुसन्धेयः।

अथादौ सर्व्वाभ्यर्हितत्वेन सृष्ट्यादिकर्त्तारं परमेश्वरं स्वाभीष्टसिद्धये प्रणिपत्य ग्रन्थकारो गुरूनमस्कारमपि अनुपेक्ष्यं समीक्षमाणः प्रकारान्तरेण तमेवानुशंसन् शिष्यावधानाय प्रकृतग्रन्थनिर्म्माणं प्रतिजानीते 'चूड़ामणौ' त्यादिना।

चूड़ामणिरिति ग्रन्थकारस्य गुरोः पितुर्व्वा नाम। तस्य पदाम्भोजे भ्रमरोभूतो मौलिः यस्य तेनेति बहुव्रीहिः। करकपालसंयोगविशेषस्येव मौलिचरणसंयोगविशेषस्यापि नमस्कारस्वरूपत्वात् प्रकारान्तरेण तत्सिद्धिः। न च करकपालसंयोगलक्षणनमस्कारापेक्षया मौलिचरणसंयोगविशेषलक्षणनमस्कारस्य सत्यपि सम्प्रदायसिद्धे प्रकर्षे कथमीश्वरप्रणामस्थले विशिष्य स नोपात्त इति वाच्यं; नमःशब्दस्य प्रणतिसामान्यवाचित्वेन तादृशस्यापि तत्र ग्रहणसम्भवात्। अथवा अमूर्त्तस्य परमेश्वरस्य 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' इत्यादिभिः शास्त्रैः पादशून्यत्वस्य सिद्धतया तन्नमस्कृतिस्थले तादृशस्य स्वरूपस्य सुतरामसम्भवात्। तत्सम्भवस्थले च तदनुपग्रहे गौरवस्योदस्य स्वेच्छासम्पादितत्वेन प्रत्यवायस्य कथमपि अपोहितुमशक्यत्वात्।

केचित्तु चूड़ामणिरिति न खलु ग्रन्थकारस्य गुरोः पितुर्वा नाम, किन्तु उपनामैव। तेन तदीयनिर्देशस्य गौरवातिशयप्रतिपत्त्यर्थः। उपनाममात्रेण व्यक्तिनिर्देशस्य गौरवातिशयद्योतकतायाः साम्प्रतिकेष्वपि भूयो दृश्यमानत्वाद् इत्याहुः।

परे तु चूड़ामणिरिति कोटालिपाड़पत्तनीयः काश्यपः पौरन्दरिः श्रीनाथचूड़ामणिरेव। यस्य किल पण्डितधुरीणस्य सरस्वत्युपनामा गौतारहस्याद्वैतसिद्धिप्रस्थानभेदादिप्रणेता दण्डी मधुसूदनो भ्राता पितृव्यो वा, तदीयः शिष्यः श्रीकणाद इत्यपि वदन्ति। अत्र मतान्तराणि निपुणदृशामुन्नेयानि।

ननु 'संक्षिप्य वितन्यत' इत्यसिद्धम्; तथाहि संक्षेपो नाम शब्दतो लाघवम्, वितननञ्च शब्दतो गौरवं विस्तरापरपर्य्यायम्; तदनयोरालोकतिमिरस्वभावयोरसम्भवमेकत्र समवधानमिति चेन्न वितन्यत इत्यस्य निरूपणमात्रपरत्वेन क्त्यभावात्। अथवा वितननमत्र अर्थतो गौरवरूपमभिप्रेतम्; तथाच सत्यपि शब्दतो लाघवे अर्थतो गौरवस्य सुसम्भवत्वेन नासिद्धिः। वस्तुतस्तु वितन्यत इत्यस्य विशिष्टरूपेण निरूप्यत इत्यर्थः। निरूपणस्य वैशिष्ट्यञ्च युक्तितर्कादुपपत्तिहितसिद्धान्तविषयकत्वम। एतेन सिद्धान्तमात्रप्रतिपादकग्रन्थान्तरेभ्यो ग्रन्थस्यास्य विशेषः प्रतिपत्तव्यः, संक्षेपोक्त्या च सविस्तरदुरूहतर्कबहुलग्रन्थाद् इति।

रत्नमिव रत्नं रत्नसदृशमित्यर्थः। भाषायाः पदार्थस्य सम्बन्धे रत्नं प्रकाशकत्वसाधर्म्येण रत्नसदृशमिति व्युत्पत्त्या ग्रन्थस्येदं नाम। तथाहि यथा हीरकादिकं रत्नं स्वीयज्योतिषा घटपटादीनि वस्तूनि प्रकाशयति, तथायं ग्रन्थोऽपि स्वीययुक्तितर्कादिभिः पदार्थानिति सादृश्यसिद्धिः।

वितन्यत इत्यत्र भविष्यत्सामीप्ये लटो विधानात् निरूपणे उत्तरकालीनत्वलाभेन निरुक्तवाक्यस्य प्रतिज्ञावाक्यत्वसिद्धिः, उत्तरकालकर्त्तव्यत्वप्रकारकबोधानुकूलव्यापारस्यैव प्रतिज्ञात्वात्, उच्चारणोच्चार्य्यमाणयोरैक्ये च शास्त्रकारीयविवक्षाविषयत्वस्य सर्व्वसिद्धत्वात्।

अत्र ग्रहणधारणपटुर्बालोऽधिकारी। वैशेषिकशास्त्रसिद्धभाषार्थौ विषयः। तद्विषयकं ज्ञानं प्रयोजनम्। विषयेण शास्त्रस्य प्रतिपाद्यप्रतिपादकभावः सम्बन्धः, प्रयोजनेन च शास्त्रस्य प्रयोज्यप्रयोजकभाव इत्यनुबन्धचतुष्टयी।

पदार्थो द्विविधः भावोऽभावश्च। तत्र भावपदार्थो वैशेषिकमते षड्विधः; द्रव्यगुणकर्म्मसामान्यविशेषसमवायभेदात्। द्रव्यत्वञ्च जातिविशेषः। न च तत्र मानाभावः; संयोगसमवायिकारणतावच्छेदकतया तत्सिद्धेः। न च सत्ताजातिरेव तत्समवायिकारणतावच्छेदिकेति वाच्यं; गुणादावपि संयोगोत्पादापत्तेः, तत्रापि सत्तासत्त्वात्।

पदार्थ इत्यादिः।—ननु लक्षणतः सामान्यमप्रतीतवतो विशेषजिज्ञासानुदयात् पदार्थसामान्यलक्षणमनभिधाय भावाभावभेदेन तद्वैविध्यकथनमसङ्गतमिति चेन्न पदार्थपदस्यैव पदार्थसामान्यलक्षणपरतया सर्व्वसामञ्जस्यात्। तथाहि पदप्रतिपाद्यत्वं पदार्थत्वमिति पदार्थसामान्यलक्षणम्। परमत्र पदार्थत्वरूपसामान्यधर्म्मस्य धर्म्मितावच्छेदकतया सन्निवेशमात्रं विशेषः। तथात्वञ्च ग्रन्थलाघवमभिप्रेत्येति ध्येयम्।

अथ सूत्रकारभाष्यकाराभ्यां पदार्थसमुद्देशप्रकरणे समवायान्तानां षण्णामेव भावपदार्थानां पदार्थतया समुद्देशात् अभावस्य तत्त्वेन समुद्देशो विरुद्ध इति चेन्न अभावस्य सूत्रकारैः पृथक्तया पदार्थसमुद्देशप्रकरणे अनुपदेशेऽपि किरणावलीन्यायकन्दल्यादिप्रामाणिकग्रन्थेषु तदभ्युपगमस्य सुसम्पादितत्वात्। तदिदं विस्तरेण प्रशस्तपादभाष्यस्य जगदीशसूक्तिटीकायां मत्कृतसूक्तिदीपिकायामनुसन्धेयम्। मीमांसकादिमते शक्तिसादृश्यादीनामप्यतिरिक्तपदार्थत्वेन तन्मतात्रयेण षड्विधत्वं बाधितमिति वैशेषिकमतस्य विशिष्योल्लेखः। भेदा-

दिति पञ्चम्यर्थो हेतुत्वं, प्रतियोगित्वञ्च प्रकृते तदवच्छेदकः सम्बन्ध इति नासिद्धिः।

'आश्रयैकरूपतया जातिप्रत्यक्षे कारणत्वावधृतेः प्रत्यक्षमात्रप्रमाणवादिनां तेजःसंयोगेन वैरूप्यमापन्नेषु घृतजतुप्रभृतिषु द्रव्यत्वजातेः प्रमातुमशक्यत्वेन सम्भाव्यमानां तदसिद्धिं निषेधति नचेत्यादिना। तथाहि नहि वयं प्रत्यक्षमात्रं प्रमाणमुपास्महे, येन तथा द्रव्यत्वजात्यसिद्धिः, परमनुमानमपि। तदत्र प्रयोगो यथा—संयोगसमवायिकारणत्वं किञ्चिद्धर्म्मावच्छिन्नं कारणतात्वात् दण्डस्य घटकारणत्ववदिति। धर्म्मस्य जातित्वे लाघवमिति लाघवज्ञानानुगृहीतेन सामान्यपरामर्शेनापि विशेषतो जात्यवच्छिन्नत्वसिद्ध्या द्रव्यत्वस्य जातित्वमायाति। निरुक्तस्थले संयोगस्य उपलक्षणतया विभागमादायापि द्रव्यत्वजातिरुक्तरीत्या शक्यसाधनेति बोध्यम्। अत एव सिद्धान्तमुक्तावल्यां विश्वनाथेन 'संयोगस्य विभागस्य वा समवायिकारणतावच्छेदकतये'त्यादि स्पष्टमेव निबद्धमुपलभ्यते।

ननु यस्य कस्यापि धर्म्मस्य तादृशकारणतावच्छेदकत्वेनैव निरुक्तमनुमानं गतार्थं, तदत्र सत्ताया जातेः कारणतावच्छेदकत्वसम्भवे द्रव्यत्वस्य अवच्छेदकत्वं जातित्वञ्चेति इयमेव नो सिध्येदित्याशङ्क्याह नचेत्यादि।

गुणादावपीत्यादिः।—तथाहि समवायेन संयोगत्वावच्छिन्नं प्रति तादात्म्येन सत्तावत्त्वेन कारणत्वमित्येव सत्ताया अवच्छेदकत्वकल्पे कल्पनीयम्। एवञ्च सत्ताया द्रव्यगुणकर्म्मवृत्तितया गुणकर्म्मणोरपि निर्गुणयोः संयोगात्मकगुणोत्पादः प्रसजतीति। इष्टापत्तिश्च गुणानां निर्गुणत्वसिद्धान्तविरोधिनीति भावः। तदेवं सत्ताया अवच्छेदकत्वे निर्व्वक्तुमशक्ये द्रव्यत्वमेव तदवच्छेदकमभ्युपेयं, लाघवेन च तस्य जातित्वमिति तात्पर्य्यम्।

तत्रापीति—गुणादावपीत्यर्थः। आदिपदात् कर्म्ममात्रोपग्रहः।

इतरेषु सत्ताभावात्, द्रव्ये च संयोगोत्पादस्य अबाधितत्वात् तत्रापत्त्य-सम्भवात्, बाधस्य आपत्त्यनुगुणत्वादिति ध्येयम् ।

---

[ द्रव्यलक्षणप्रकरणम् ]

द्रव्यलक्षणञ्च गुणाश्रयत्वम् ; भवति हि पृथिव्यादि द्रव्यं गुणाश्रय इति लक्षणसङ्गतिः ।

नचैवं प्रथमक्षणे घटादौ द्रव्यत्वं न स्यात् ; द्वितीयक्षण एव घटादौ गुणाद्युत्पादादिति वाच्यम् ; रूपासमवेतपृथिवीसमवेतजातिमत्त्वं हि द्रव्यलक्षणम् । अस्ति च रूपासमवेतं पृथिवीसमवेतं द्रव्यत्वं तद्वत्त्वञ्च उत्पत्तिक्षणे पृथिव्यादीनामिति लक्षणसङ्गतिः । पृथिवीसमवेतसत्तावति गुणादावतिव्याप्तिवारणाय रूपासमवेतेत्युक्तम् । तथा च सत्ताया रूपसमवेतत्वा-न्नातिव्याप्तिरिति भावः ।

पृथिवीत्वादिजातेरपि कालिकसम्बन्धेन रूप-वृत्तित्वादसम्भववारणाय रूपावृत्तीत्यपहाय रूपा-समवेतेत्युक्तम् । तथाच पृथिवीत्वादिजातेः समवायेन रूपवृत्तित्वाभावात् नासम्भवः । रूपासमवेत-रसत्वादिजातिमति रसादावतिव्याप्तिवारणाय पृथिवी-समवेतेत्युक्तम् । तथाच रसत्वादेः पृथिवीसमवेतत्वा-

भावात् नातिव्याप्तिः। रसत्वादेरपि कालिक-सम्बन्धेन पृथिवीवृत्तित्वात् तद्दोषतादवस्थ्यवारणाय पृथिवीवृत्तीत्यपहाय पृथिवीसमवेतेत्युक्तम्। तथाच रसत्वादेः समवायेन पृथिवीवृत्तित्वाभावात् नातिव्याप्तिः।

जातिपदं समवायेन तादृशसमवेतवत्तालाभाय, अन्यथा कालिकसम्बन्धेन द्रव्यत्वस्य गुणादावपि सत्त्वा-दतिव्याप्त्यापत्तेः॥

उद्देशानन्तरं यथोद्देशं लक्षणमारभते द्रव्येत्यादिना। गुणा-श्रयत्वं गुणसमवायित्वं गुणत्वावच्छिन्नसमवायसम्बन्धावच्छिन्नाधेयता-निरूपिताधिकरणतावत्त्वमिति यावत्। तेन कालिकादिसम्बन्धेन गुणादेरपि गुणाश्रयत्वान्नातिप्रसङ्गः; समवायेन गुणवत्ताया द्रव्यमात्र-वृत्तित्वादिति।

द्वितीयलक्षण एवेति।—तथाहि गुणादुत्पादे घटादेः समवायि-कारणतया तस्य गुणाद्यव्यवहितपूर्वसत्त्वस्य अपेक्षितत्वात् घटाद्युत्-पत्तिप्रथमक्षणे गुणोत्पादो नोपपद्यत इति भावः।

रूपासमवेतेत्यादिः।—रूपासमवेता पृथिवीसमवेता च या जातिः तद्वत्त्वमित्यर्थः। न तु रूपासमवेता या पृथिवी तत्समवेतजाति-मत्त्वमर्थः। तथात्वे सत्तामादाय गुणादावतिप्रसङ्गस्य तादवस्थ्यात् वैयर्थ्याच्च। इत्थं द्रव्यलक्षणाभ्युपगमे संयोगादिसमवायिकारणता-वच्छेदकतया सिद्धसामान्यभावस्य द्रव्यत्वस्य व्याप्यवृत्तितया प्रथम-क्षणेऽपि घटादौ तत्सत्ताया दुर्निवारत्वेन न तदापि तत्र द्रव्यत्व-सिद्ध्यनुपपत्तिरिति हृदयम्।

रूपासमवेतत्वं रूपनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तितायाः

स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकाभावः। तेन रूपसमवेतत्वप्रतियोगिकसंयोगसमवायादिसम्बन्धावच्छिन्नाभावस्य सत्तायां सत्त्वेऽपि नातिप्रसङ्गतादवस्थ्यम्।

रूपासमवेतेत्यत्र रूपनिरूपितसमवायसम्बन्धावच्छिन्नवृत्तित्वसामान्याभावो विवक्षणीयः, अन्यथा रूपत्वादिनिष्ठस्य रूपनिरूपितसमवेतत्वविशेषस्य सत्तायामपि विरहसत्त्वादतिप्रसङ्गस्य दुर्निवारत्वात्। व्यावर्त्तनीयं रूपावृत्तित्वमात्रमपि तथैवाभिप्रेतम्, अन्यथा विशेषाभावमादाय सम्भावितासम्भवदोषस्यैव निरसनीयत्वात्।

जातिपदमित्यादिः।—तथाहि प्रकृते नित्यत्वसमानाधिकरणमनेकसमवेतत्वरूपं जातित्वं न लक्षणघटकं समवायेन तादृशधर्म्मवत्त्वमात्रस्य लक्षणघटकत्वेनैवातिप्रसङ्गाप्रसङ्गादिदोषस्य निराससम्भवादितिभावः।

---

[ द्रव्यविभागप्रकरणम् ]

तच्च द्रव्यं नवविधमेव;—पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोभेदात्। ननु अन्धकारस्यापि द्रव्यान्तरत्वान्नवविधमेवेत्यसिद्धमिति चेन्न;—अन्धकारस्य तेजोऽभावरूपतया द्रव्यत्वासम्भवात्। न चैवं नीलं तमश्चलतीत्यादिप्रत्ययो न स्यात्, अभावे गुणकर्म्मणोरभावादिति वाच्यम्;—तादृशप्रतीतीनां भ्रमत्वात्। न च बाधकं विना प्रतीतेर्भ्रमत्वायोग इति वाच्यम्;—अतिरिक्तद्रव्य-तद्गुणादिकल्पनाया एव बाधकत्वादिति दिक्।

अथ उद्दिष्टस्य द्रव्यस्य विभागमाह तच्चेत्यादिना। नवविधमेवेति। यद्यपि उद्देश्यतावच्छेदकसमनियतवस्तुमदन्यसंख्यावत्त्वस्य विधप्रत्ययार्थत्वात् अधिकसंख्याव्यवच्छेदो विधप्रत्ययेनैव सुबोधस्तथापि विधप्रत्ययार्थस्य विशेषमविजानतामापाततो नवाधिकसंख्याप्रतिपत्तिवारणाय "एवे"ति अधिकसंख्याव्यवच्छेदप्रत्यायकमिति ध्येयम्।

ननु "तमः खलु चलं नीलं परापरविभागवत्। प्रसिद्धद्रव्यवैधर्म्यान्नवभ्यो भेत्तुमर्हती"ति प्राचीनप्रसिद्धेः अन्धकारस्यापि द्रव्यान्तरत्वस्य अपोहितुमशक्यतया द्रव्यस्य दशविधत्वमेव युक्तं वक्तुं इत्याशङ्कामुत्थाप्य समाधातुमुपक्रमते नन्वित्यादिना। तथाहि तमो न रूपवत् द्रव्यं तादृशस्य स्पर्शवत्त्वनियमात्, स्पर्शवताञ्च महत्त्वजुषां प्रतीघातस्वभावतया अन्धकारे सञ्चरतः प्रतीघातापत्तेः, रूपवताञ्च प्रत्यक्षस्य आलोकसाहायकमन्तरेण असम्भवात् तमसश्च आलोकाभावदशायामेव प्रत्यक्षस्य आवश्यकत्वात्। एवं गन्धवत्त्वाद्यभावतः पृथिवीभिन्नत्वादिकमपि निरपवादमनुमेयम्, दृश्यत्वादिभिश्च व्योमादिभिन्नत्वम्। तदिदमन्यादृशं द्रव्यमिति सिद्धे दशमद्रव्यत्वमेवास्य अनायत्या कल्पनीयमिति भावः। सविशेषमिदमस्मदीयसूक्तिदीपिकादावनुसन्धेयम्।

तेजोऽभावरूपतयेति।—तथाहि अन्धकारो न द्रव्यं परमावश्यक तेजोऽभावः। अत एव सूक्तौ जगदीशेन 'तथाच पृथिव्यादिभिन्न तमो न द्रव्यं, किन्तु महाप्रभात्वावच्छिन्नाभाव' इति प्रतिपादितम् अभाव इत्यादिः।—अभावस्य गुणाद्यन्तर्गततया गुणादेश्च निर्गुणक्रियत्वात् अभावरूपे तमसि रूपक्रियाप्रतीतेः प्रमात्वमसम्भवमेव। एवञ्च तादृशप्रतीतिप्रामाण्यमूला न तत्र द्रव्यत्वसिद्धिरिति भावः।

नचेत्यादिः।—प्रतीतेर्यत्र यत्र भ्रमत्वं, तत्र तत्रैव बाधकं किञ्चिदपेक्षणीयम्। तदत्रापि नीलरूपवत्त्वादिप्रतीतेर्भ्रमत्वे नीलरूपवत्त्वादौ किमपि बाधकं कल्पनीयम्, अत एवाह अतिरिक्तेत्यादि

तथाहि तमसोऽतिरिक्तद्रव्यत्वे तस्य नीलरूपवत्त्वे च नवद्रव्यातिरिक्तं धर्मिंतद्गतनीलरूपवत्त्वादिधर्मांश्च कल्पनीये; ते च गौरवदोषादशक्ये कल्पयितुमिति क्लप्तमभावस्वरूपमेव तदिति भावः। मुनिना कणादेन पृथिव्यादिसंज्ञाव्यतिरेकतः संज्ञान्तरेण द्रव्यस्य अविभाजनमपि तमसो द्रव्यत्वमपलपितुमीष्टे इति ध्येयम्। तदुक्तं भाष्ये 'तद्व्यतिरेकेण संज्ञान्तरानभिधाना'दिति। कन्दलीकारास्तु—"बाधकं विना उक्तप्रतीतेर्भ्रमत्वायोगात् नीलरूपवत्त्वेन तमः पृथिव्येव तस्य चालोकाभावव्यङ्ग्यत्वान्न प्रकाशे प्रत्यक्ष"मिति वदन्ति। अधिकमन्यत्र मृग्यम्। तमसोऽभावभिन्नत्वादिकल्पने तदीयप्रागभावध्वंसादिकल्पनगौरवमपि बाधकमुन्नेयम्।

---

[ पृथिवीलक्षणप्रकरणम् ]

"पृथिवीत्वाभिसम्बन्धात् पृथिवी"ति भाष्यम्। अभिसम्बन्धः समवायः। तथा च पृथिवीति संज्ञा साङ्केतिकी। जातिप्रवृत्तिनिमित्तिका हि संज्ञा साङ्केतिकी। जातिप्रवृत्तिनिमित्तिका जातिशक्यतावच्छेदिका। गोत्वादिजातिप्रवृत्तिनिमित्तकत्वात् यथा गवादिसंज्ञा साङ्केतिकी। प्रकृते च पृथिवीसंज्ञायाः पृथिवीत्वजातिप्रवृत्तिनिमित्तकत्वात् तत्संज्ञा साङ्केतिक्येव।

पृथिवीलक्षणञ्च गन्धवत्त्वम्। न च सुरभ्यसुरभिकपालारब्धघटस्य परस्परप्रतिबन्धेन निर्गन्धतया तवा-

व्याप्तिरिति वाच्यम्;—यत्किञ्चित्पृथिवीव्यक्तिमुपादाय एतद्व्यक्तिसमवेत-जलासमवेतधर्म्मसमवायित्वं पृथिवीत्वम् इत्यत्र तात्पर्य्यात्। तथाच एतद्व्यक्तिसमवेतजलासमवेतो धर्म्मः पृथिवीत्वम्; तद्वत्त्वञ्च निर्गन्धघटेऽप्यस्तीति नाव्याप्तिः।

जलासमवेतगुणत्वादिजातिमति रूपादावतिव्याप्तिवारणाय एतद्व्यक्तिसमवेतेत्युक्तम्। एतद्व्यक्तिसमवेत-द्रवत्वादिजातिमति जलादावतिव्याप्तिवारणाय जलासमवेतेत्युक्तम्। तथा च द्रव्यत्वादेर्जलासमवेतत्वाभावात् नातिव्याप्तिः (१)।

न च एतद्व्यक्तिसमवेत-जलासमवेतपृथिवीत्वजातिमादाय सकलपृथिव्यां लक्षणसमन्वयः कर्त्तव्यः, स च न सम्भवति,—पृथिवीत्वजातौ मानाभावादिति वाच्यम्;—गन्धसमवायिकारणतावच्छेदकतया तत्सिद्धेः। न च गन्धसमवायिकारणतावच्छेदकं द्रवत्वमेवास्ताम्, किं पृथिवीत्वजातिकल्पनेनेति वाच्यम्; जलादावपि गन्धोत्पादापत्तेः, तत्रापि द्रवत्वसत्त्वात्।

(१) 'नातिप्रसङ्ग' इति ख-पुस्तके पाठान्तरम्।

न च जलादौ विशेषसामग्रीविरहादेव न गन्धोत्पादः, विशेषसामग्रीसहितायाः एव सामान्यसामग्र्याः कार्य्यजनकत्वात् । तथा हि गन्धो द्विविधः ;—गन्धजः पाकजश्च । तथा च जलादाववयवगन्धाभावात् न गन्धजगन्धोत्पादः, विजातीयतेजःसंयोगस्य पाकजगन्धजनकतया (२) तदभावादेव न पाकजगन्धोत्पाद इति वाच्यम् ;—संयोगस्य द्विष्ठतया विजातीयतेजःसंयोगस्य पृथिव्यामिव तेजस्यपि सत्त्वेन तत्र पाकजगन्धोत्पत्तिवारणाय समवायेन विजातीयगन्धं प्रति तादात्म्यसम्बन्धेन पृथिवीत्वेन हेतुतायाः आवश्यकत्वात् पृथिवीत्वजातिसिद्धेः ॥

अथेदानीम् उद्देशक्रमप्राप्तां पृथिवीं निरूपयितुमाह पृथिवीत्वेत्यादि । ननु यदि पृथिवीत्वस्य अभिसम्बन्धात् पृथिवीति भाष्यनिरुक्तिरेव भवतामभिमता, तदा गुणादावपि पृथिवीत्वप्रतियोगिककालिकादिसम्बन्धस्य सत्त्वादतिप्रसङ्गो दुर्निवार इत्याशङ्क्याह अभिसम्बन्धः समवाय इति । समवायोऽपि शुद्ध एव ग्राह्यस्तेन एकार्थसमवायादेरपि समवायपदवाच्यतामभ्युपगच्छतां न क्षतिः । अतएवाचार्याः,—'पृथिवीत्वं नाम सामान्यविशेषः, तेनाभिमतः सम्बन्धः समवायलक्षणः, तस्मात् । न त्वेकार्थसमवायसंयुक्तसमवायादेरित्यर्थ' इत्याहुः ।

साङ्केतिकीति—जगदोशमतं नैमित्तिकीत्यर्थः । तदुक्तं जगदीशेन

(२) 'पाकजनकतया' इति ख-ग-पुस्तकयोः पाठान्तरम् ।

शब्दशक्तिप्रकाशिकायां 'जात्यवच्छिन्नसङ्केतवती नैमित्तिकी मता' इति। स्वमते तु नैमित्तिकीत्यनेन औपाधिकसंज्ञा व्याख्यास्यते। जातिप्रवृत्तिनिमित्तिकेति;—प्रवृत्तिनिमित्तत्वं नाम वाच्यत्वे सति वाच्यवृत्तित्वे सति वाचोपस्थितिप्रकारत्वमिति निरुक्तं शक्तिवादे गदाधरभट्टाचार्यैः। पृथिवीत्वस्य जातित्वं गन्धसमवायिकारणतावच्छेदकतया सिद्धमिति स्वयमेवाग्रे वक्ष्यते। तदस्याः पृथिवीसंज्ञायाः पृथिवीत्वजात्यवच्छिन्नसङ्केतवत्त्वेन तत्संज्ञा सांकेतिकी, न तु नैमित्तिकी, नापि पारिभाषिकीति सुस्थितम्।

अथ विशेषतः पृथिव्या लक्षणमाह पृथिवीलक्षणञ्चेत्यादिना। गन्धवत्त्वमिति समवायसम्बन्धेन गन्धाधिकरणत्वम्, तेन कालिकविशेषणतया गुणकर्मादेरपि गन्धवत्त्वेन नातिप्रसङ्गश्चेति।

एतद्व्यक्तीत्यादिः।—एतद्व्यक्तिसमवेतत्वं जलासमवेतधर्मविशेषणं समवाय्यंशे तस्य विशेषणत्वे एतद्व्यक्तिसमवेतान्यपृथिव्यामव्याप्तिप्रसङ्गस्य जलासमवेतत्वविशेषणवैयर्थ्यस्य च अशक्यनिरासत्वात्।

समवायित्वमिति—समवायानुयोगित्वमित्यर्थः। तेन तादृशधर्मप्रतियोगिनि पृथिवीत्वे नातिव्याप्तिः। निर्गन्धघट इत्यादिः।—सुरभ्यसुरभ्यवयवारब्धे तादृशघट इत्यर्थः। एतेन स्वमते तादृशघटादौ गन्धाभाववत्त्वमभ्युपगतमिति ध्येयम्। न च तादृशे घटे कथं गन्धप्रतीतिरिति वाच्यं; तत्र अवयवगन्धस्यैव प्रत्ययात्, न तु अवयविगन्धस्यापीति।

एतद्व्यक्तिसमवेतेतुरक्तामिति।—तथाहि एतद्व्यक्तिपदेन ग्रन्थोक्तदभिमतपृथिवीवयवे रेव उपादानात् गुणत्वादिजातेस्तत्रासमवेतत्वेन नातिप्रसङ्ग इति भावः।

गन्धसमवायीत्यादिः।—अत्रापि गन्धसमवायिकारणत्वं किञ्चिद्धर्मावच्छिन्नं कारणतात्वादित्यादिप्रयोगे अवच्छेदकधर्मस्य जातित्वे लाघव-

मिति लाघवज्ञानानुगृहीतसामानाधिकरण्येन निरुक्तसमवायिकारणतायाः पृथिवीत्वजात्यवच्छिन्नत्वं सिध्यतीति।

नचेत्यादिः।—सिद्धान्ते पृथिवीत्वस्य गन्धसमवायिकारणतावच्छेदकत्वपक्षे समवायेन गन्धत्वावच्छिन्नं प्रति तादात्म्येन पृथिवीत्वेन कारणत्वमिति कार्य्यकारणभावः कल्पः। द्रव्यस्य तत्कारणतावच्छेदकत्वपक्षाभ्युपगमे च समवायेन गन्धत्वावच्छिन्नं प्रति तादात्म्येन द्रव्यत्वेन कारणत्वमिति कार्य्यकारणभावः कल्पनीयः, तदेवं द्वितीये कल्पे जलादावपि गन्धोत्पादापत्तिः सुसङ्गच्छते।

गन्धज इति,—गन्धासमवायिकारणक इत्यर्थः। स च अवयवगन्धकारणकः अवयविगन्ध इति प्रतिपत्तव्यम्। पाकज इति पाकासमवायिकारणकः तेजःसंयोगासमवायिकारणक इति यावत्।

संयोगस्येत्यादिः।—तथाहि जलादौ गन्धोत्पादप्रसङ्गवचनं तेजसि गन्धोत्पादप्रसङ्गपरमवधेयमिति भावः। पृथिवीत्वस्य तादृशकारणतावच्छेदकत्वस्वीकारे तु तेजसि तदभावात् नापत्तिरिति।

---

[ पृथिवीगुणादिप्रकरणम् ]

**सा च पृथिवी द्विविधा, नित्या अनित्या च। तत्र परमाणुरूपा नित्या, द्व्यणुकाद्यन्त्यावयविपर्य्यन्ता अनित्या। तस्या गुणाश्चतुर्दश;—रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-परत्व-गुरुत्व-द्रवत्व-संस्कारभेदात्। रूपमनेकप्रकारं शुक्लादि। रसो मधुरादिभेदेन (१) षड्विधः। गन्धो द्विविधः**

---

(१) 'मधुरादिः षड्विध' इति ख-ग-पुस्तकयोः पाठान्तरम्।

सुरभिरसुरभिश्च। स्पर्शोऽनुष्णाशीतः। संख्या एकत्वादि परार्द्धपर्य्यन्ता (२)। परिमाणं द्विविधम्,—अणुत्वं महत्त्वञ्च। तत्र अणुत्वं परमाणुद्व्यणुकयोः, महत्त्वं तदितरेषाम्। अयमस्मात् पृथगिति प्रत्ययात् पृथक्त्वम्। संयुक्तत्वविभक्तत्वप्रत्ययात् (३) संयोगविभागौ। परापरप्रत्ययात् परत्वापरत्वे। ते च दैशिके कालिके च सम्भवतः। तत्र दैशिके एव परत्वापरत्वे परमाणोः, तस्य नित्यत्वात्; तद्भिन्नानां सर्व्वासां पृथिव्यादीनां दैशिके कालिके च। पतनाद् गुरुत्वम्। द्रुतमिति प्रत्ययात् द्रवत्वम्; तच्च नैमित्तिकमेव घृतादौ द्रष्टव्यम्।

उत्तरक्रियाजननात् वेगाख्यसंस्कारः। तथा हि नोदनाद्याभिघोः कर्म्म। नोदनञ्च प्रयत्नवदात्मसंयोगः। ततो विभागः। ततः पूर्व्वसंयोगनाशः। तत उत्तरसंयोगः, क्रियाजन्यवेगाख्यसंस्कारश्च। ततः क्रियानाशः। ततो वेगाख्यसंस्कारात् क्रियान्तरम्। तत्र नोदनाख्य-संयोगनाशात् संस्कारं विना क्रियोत्पादकाभावात् संस्कारस्वीकारस्य आवश्यकत्वात्।

---

(२) 'परार्द्धान्ता' इति ग-पुस्तके पाठान्तरम्।

(३) 'संयुक्तविभक्तप्रत्ययादिति' ख-पुस्तके पाठान्तरम्।

उद्देशादनन्तरं विभागमाह सा चेत्यादिना। नित्येति;—अत्र नित्यत्वं ध्वंसाप्रतियोगित्वम्, अनित्यत्वञ्च ध्वंसप्रतियोगित्वम्, प्रागभावप्रवेशे गौरवात् प्रयोजनविरहाच्च। परमाणित्यत्र द्व्यणुकव्यावृत्तये परमेति। द्व्यणुकेत्यादिः।—अन्त्यावयवित्वमत्र समवायसम्बन्धेन द्रव्यवद्भिन्नत्वं, द्रव्यसमवायिकारणभिन्नत्वं वा। द्व्यणुकादेः सर्वस्यैव अवयविनः अवयव संयोगरूपासमवायिकारणनाशादेव नाशेन अनित्यत्वमिति ध्येयम्। चतुर्दशेति।—रूपादीनां प्रतियोगमेव बहुव्यक्तिकत्वेऽपि गुणविभाजक-पृथिवीवृत्तितावच्छेदकरूपत्वादिधर्म्माणां चतुर्दशत्वमादाय चतुर्दशत्व-मुपपादयितव्यम्। रूपत्वादिरूपेण रूपादीनामेकत्वावधृतेः स्वार-सिकत्वाच्च तथा। अनेकप्रकारमिति सप्तप्रकारमित्यर्थः। शुक्लादीत्यादि-पदेन रक्त-पीत-हरित-कपिश-कृष्ण-चित्ररूपाणां षण्णामपि लाभात्। चित्रं रूपं विविधरूपसमवाय्यनेकावयवारब्धे सुतरामङ्गीक्रियते। न च तत्र अवयविनि रूपानङ्गीकारेऽपि अवयवरूपप्रतीत्यैव रूपानुभवस्य प्रकारोपपादनत्वमिति वाच्यं; अवयविनश्चित्ररूपवत्तयाभिमतस्य रूपवत्त्वानभ्युपगमे चाक्षुषप्रत्यक्षासम्भवात् द्रव्यचाक्षुषप्रत्यक्षे उद्भूत-रूपवत्तायाः कारणत्वस्य सिद्धान्तितत्वात्। न च तत्र उद्भूतरूप-वत्त्वस्य समवायेन कारणत्वमनङ्गीकृत्य स्वाश्रयसमवेतत्वसम्बन्धेन तत्कल्पने न क्षतिरिति वाच्यं; समवायमपेक्ष्य स्वाश्रयसमवेतत्वस्य गुरुतया समवायसम्बन्धेनैव लाघवतः कारणताकल्पनस्य युक्तत्वादिति। केचित्तु धर्म्मिकल्पनामपेक्ष्य कार्य्यकारणभावगौरवदोषस्याकिञ्चित्-करतया चित्रं रूपमनङ्गीकृत्य षड्विधमेव रूपमाहुः। तन्मते अनेक-प्रकारमितस्य षट्प्रकारमितार्थः। चित्रगन्धानङ्गीकारे युक्तिप्रमाण-विस्तरस्तु मत्कृतसूक्तिदीपिकायामनुसन्धेयः।

मधुरादीतयादिपदेन तिक्त-अम्ल-कटु-कषाय-लवणभेदेन षण्णामपि रसानां ग्रहणम्। क्षारस्तु रसो लवणप्रभेद एवेति न षड्विधत्व-

व्याघातः। अनुष्णाशीत इति पाकजोऽनुष्णाशीत इत्यर्थः। अन्यथा वायोरपि स्पर्शस्यानुष्णाशीतत्वेन अतिप्रसङ्गात्।

अणुत्वमित्यादिः।—इदमुपलक्षणम्; ह्रस्वत्वदीर्घत्वयोरपि परिमाणप्रभेदत्वस्य विश्वनाथाद्यैः प्राचीनैरभ्युपगमात्। तदुक्तं 'परिमाणं भवेन्मानव्यवहारस्य कारणम्। अणु दीर्घं महद् ह्रस्वमिति तद्भेद ईरितः' इति। परमाणुद्व्यणुकयोरणुपरिमाणम्, तत्रापि तयोर्द्वयोरणुपरिमाणस्य तारतम्यमिति। अत एव परमोऽणुरिति व्युत्पत्त्या परमत्वमणुपरिमाणविशेषणमिति सुसङ्गच्छते। तदितरेषामिति परमाणुद्व्यणुकभिन्नानां त्रसरेखादीनामित्यर्थः; तत एव महत्परिमाणारम्भात्। पृथक्त्वमिति,—एषोऽपि गुणभेद एव। शिरोमणयस्तु स्वीयपदार्थनिरूपणग्रन्थे पृथक्त्वमन्योन्याभावान्नातिरिच्यत इति प्राहुः। विश्वनाथादयस्तु 'अन्योन्याभावतो नास्य चरितार्थत्वमिष्यते। अस्मात् पृथगिदं नेति प्रतीतिर्हि विलक्षणे'त्युक्त्या उभयोर्भेदपक्षमुपपादितवन्तः।

ते चेत्यादिः।—दैशिके परत्वापरत्वे दूरत्वसन्निकृष्टत्वलक्षणे, कालिके परत्वापरत्वे ज्येष्ठत्वकनिष्ठत्वलक्षणे वेदितव्ये। पृथिव्यादीनामिति,—पृथिवीजलतेजोमरुतां चतुर्णामित्यर्थः, न तु व्योमादीनामपि; तेषु चतुर्णां विभुत्वात् नित्यत्वाच्च। मनसस्तु केवलं परिच्छिन्नतया दैशिके एव परत्वापरत्वे, नित्यत्वाच्च न कालिके अपीति।

नैमित्तिकमेवेति।—द्रवत्वं द्विविधं सांसिद्धिकं नैमित्तिकञ्च। तत्र सांसिद्धिकस्य जलमात्रवृत्तित्वात् क्षितौ तेजःसंयोगजमेव द्रवत्वमित्यर्थः।

---

[ जललक्षणादिप्रकरणम् ]

**जलत्वजातिप्रवृत्तिनिमित्तकत्वात् जलमिति संज्ञा साङ्केतिकी। ननु जलत्वजातौ मानाभाव इति;**

न च जलं जलमित्यनुगतबुद्धिजनकत्वात् तत्सिद्धिरिति वाच्यं ; लौकिकप्रत्यक्षं प्रत्येव विषयस्य हेतुतया अनुगतलौकिकप्रत्यक्षं प्रत्येव अनुगतधर्म्मस्य हेतुत्वं वाच्यम् ; इत्थञ्च परमाणुद्व्याणुकयोर्जलत्वं न सिध्येत् ; तयोरतीन्द्रियतया जलं जलमिति अनुगतलौकिकप्रत्यक्षस्य तयोरसम्भवादिति चेन्न ; अनुगतप्रतीतिबलेन सिद्धस्य हि जलत्वस्य परमाणुद्व्याणुकयोरपि सम्बन्धः कल्प्यते, अन्यथा तत्र खारसिकजलपदप्रयोगो न स्यात् ; जलपदस्य लघुधर्म्मजलत्वजातेरेव शक्यतावच्छेदकत्वात् ।

दीधितिकृतस्तु त्रसरेणुपर्य्यन्तं जलत्वजातिः प्रत्यक्षसिद्धैव । तदवच्छिन्नजनकतावच्छेदकञ्च जलत्वमनात् परमाणुसाधारणं स्वीकरणीयम्, अन्यथा प्रत्यक्षसिद्धं (१) यज्जलत्वं तदवच्छिन्नसाकस्मिकत्वापत्तेरिति संक्षेप इत्याहुः ।

जललक्षणञ्च न स्नेहवत्त्वं शीतस्पर्शवत्त्वं वा ; परमाणुभिन्नजले आद्यक्षणे जलत्वाभावापत्तेः ।

---

(१) प्रत्यक्षसिद्धमित्यत्र एतद्व्यक्तिसमवेतमिति क—पुस्तके पाठः ।

अपि तु यां काञ्चिज्जलव्यक्तिमादाय एतद्व्यक्तिसमवेत-पृथिव्यसमवेतधर्म्मसमवायित्वम्। अस्ति च सकलजले पृथिव्यसमवेतो जलसमवेतो जलत्वजातिरूपो यो धर्म्म-स्तद्वत्त्वमिति तु लक्षणसङ्गतिः। जलत्वरूप-तादृश-धर्म्मस्य आद्यक्षणेऽपि जले सत्त्वात् न उक्तदोषः।

जलसमवेतद्रव्यत्वादिजातिरूपधर्म्मवति पृथिव्यादा-वतिव्याप्तिवारणाय पृथिव्यसमवेतेतुक्तम्। तथा च द्रव्यत्वादिजातेः पृथिव्यसमवेतत्वाभावात् नातिव्याप्ति-रिति भावः। पृथिव्यसमवेततेजस्त्वादिमति(२)स्वर्णादा-वतिव्याप्तिवारणाय एतद्व्यक्तिसमवेतेतुक्तम् (३)। तथा च तेजस्त्वादेर्जलसमवेतत्वाभावात् नातिव्याप्तिः।

तच्च जलं द्विविधं; नित्यानित्यभेदात्। तत्र नित्यं परमाणुरूपं, तदितरत् सर्व्वं जलमनित्यम्। तस्य गुणाश्चतुर्दश; रूप-रस-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-परत्व-गुरुत्व-द्रवत्व-स्नेह-संस्कारभेदात्। अस्य रूपं शुक्लमेव। रसो मधुर एव। स्पर्शः शीत एव। संख्यादिगुरुत्वान्ता अष्टौ

(२) जलसमवेत—पृथिव्यसमवेतेति ख—ग-पुस्तकयोः पाठः।

(३) एतद्व्यक्तिसमवेतेतुक्तमित्यत्र जलसमवेतेतुक्तमिति ख—ग पुस्तकयोः पाठः।

पृथिवीवत्। द्रवत्वं स्वाभाविकमेव। संयुक्तसंयोगजनको गुणः स्नेहः। संस्कारो वेगाख्य एव उत्तरकर्म्मजननात् पृथिवीवत् सिद्धः(४)।

ननु पृथिवीतिसंज्ञायाः साङ्केतिकत्वमवधृतं, किं जलमिति संज्ञापि तादृशी, उत नेत्याशङ्कायामाह जलत्वे त्यादि।

जलत्वेत्यादिः।—यथा पृथिवीत्वजातिप्रवृत्तिनिमित्तकत्वात् पृथिवीति संज्ञा साङ्केतिकी तद्वदिति भावः। जलत्वजातावितिः,—जलत्वस्य जातित्वे मानाभाव इत्यर्थः; अन्यथा सिद्धसिद्धिव्याघातापत्तेः।

परमाणुद्व्यणुकयोरित्यादिः।—तथाहि परमाणुद्व्यणुकयोर्महत्त्वाभावात् महत्त्वस्य च लौकिकप्रत्यक्षमात्रे हेतुत्वात् जलमित्यनुगतलौकिकप्रत्यक्षस्य परमाणुद्व्यणुकावगाहित्वासम्भवेन तादृशलौकिकप्रत्यक्षं यद्यद्विषयकं तत्र तत्रैव जलत्वजातिः सिध्यति, नान्यत्रेति परमाणुद्व्यणुकयोरुक्तरीत्या जलत्वासिद्धिरिति। अत एवाह तयोरतीन्द्रियतयेत्यादि।

जलपदस्येत्यादिः।—तथाहि जलपदं जलत्वावच्छिन्नशक्यताकं तादृशपदत्वादितरादिप्रयोगेण जलत्वस्य जातित्वे लाघवमिति लाघवज्ञानसमवहितेन जलपदशक्यतावच्छेदकस्य जातित्वमेव सिद्धं भवतीति। शक्यतावच्छेदकलाघवमपि जातिसाधकमिति मतेनेदम्।

अथ जले जलत्वजातिं संसाध्य तदीयं लक्षणं वक्तुमुपक्रमते जललक्षणञ्चेत्यादिना। स्नेहवत्त्वमिति समवायेन स्नेहविशिष्टत्वमित्यर्थः। शीतस्पर्शवत्त्वमित्यत्रापि समवायेन शीतलस्पर्शाश्रयत्वमित्यर्थः। आद्यक्षण इति उत्पत्तिक्षण इत्यर्थः। जलत्वाभावापत्तेरिति।—जलीयस्नेहं प्रति जलस्य कारणतया तदव्यवहितपूर्ववर्त्तित्वस्य जले आवश्यकत्वा-

(४) सिद्ध इत्यत्र सिद्धेरिति ख—ग—पुस्तकयोः पाठः।

दुत्पत्तिक्षणात् पूर्वं जलस्याभावेन तदा तादृशलक्षणस्य जले सुतरामसम्भव इति भावः। सकलजल इत्यनेन लक्षणस्य अव्याप्तसम्भवदोषाभावः सूच्यते।

आद्यक्षणेऽपीति—तथाहि जलत्वधर्मस्य जातिस्वरूपस्य नित्यत्वेन तत्समवधाने जलस्य तत्पूर्ववर्त्तित्वानपेक्षणात् आद्यक्षणेऽपि तत्र तत्सत्त्वस्य अबाधितत्वमिति भावः।

पृथिव्यसमवेतेत्युक्तमिति।—पृथिव्यसमवेतत्वमपहाय पृथिव्यवृत्तित्वमात्रोक्तौ जलत्वस्यापि कालिकेन जन्यपृथिवीवृत्तित्वेनासम्भवः स्यादिति पृथिव्यसमवेतत्वपर्य्यन्तानुधावनम्। तेजस्त्वादेरपि कालिकविशेषणतया जलवृत्तित्वात्ततेः स्वर्णादावतिव्याप्तितादवस्थ्यप्रसङ्ग इति जलवृत्तित्वमात्रमपहाय जलसमवेतत्वपर्य्यन्तम्।

परमाणुरूपमिति—अनवस्थाभिया तत्कारणीभूतस्य जलान्तरस्यानभ्युपगमादिति भावः। तदितरदिति, तद्भिन्नं द्व्यणुकादिकमित्यर्थः।

शुक्लमेवेति—एव-शब्द इतरव्यवच्छेदार्थः। उत्तरत्रापि तथा। स्वाभाविकमेवेति,—न तु नैमित्तिकमपीत्यर्थः।

---

[ तेजोलक्षणादिप्रकरणम् ]

**तेजस्त्वरूपजातिप्रवृत्तिनिमित्तकत्वात् तेज इति संज्ञा साङ्केतिकी। अस्य लक्षणं नोष्णस्पर्शवत्त्वम्; अवयविनि उत्पत्तिक्षणे तदसम्भवात्। अपि तु यां काञ्चित् तेजोव्यक्तिमादाय एतद्व्यक्तिसमवेत-जलासमवेतधर्म्मसमवायित्वम्। पदव्यावृत्तिः पूर्वोक्तरीत्या प्रत्येतव्या।**

तदपि पूर्ववत् द्विविधम्। तस्य एकादश गुणाः ;—रूप-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-परत्व-द्रवत्व-संस्कारभेदात्। तस्य तु रूपं शुक्लभास्वरमेव। भास्वरत्वञ्च स्वपरप्रकाशकत्वं जातिविशेषो वा इत्यन्यदेतत्। स्पर्श उष्ण एव। संख्यादि परत्वापरत्वपर्य्यन्तं पृथिवीवत् सिद्धम्। द्रवत्वं नैमित्तिकमेव सुवर्णादौ प्रसिद्धम्। संस्कारो वेगाख्य एव पृथिवीवत् सिद्धः।

जलस्य स्वरूपादिकमुक्त्वा तेजःस्वरूपादिकं वक्तुमुपक्रमते तेजस्त्वे-त्यादिना। संज्ञासाङ्केतिकत्वादिकं प्रागुक्तरीत्या प्रतिपत्तव्यम्।

पूर्वोक्तरीत्येत्यादिः।—तथाहि पृथिवीत्वधर्म्मस्यापि जलासमवेतत्वात् तत्समवायित्वमादाय पृथिव्यामतिव्याप्तिवारणाय एतद्व्यक्तिसमवेतेति तेजोव्यक्तिसमवेतेत्यर्थकम्। वृत्तित्वमात्रोक्तावपि तथैवातिप्रसङ्ग इति समवायसम्बन्धावच्छिन्नवृत्तित्वपर्य्यन्तम्। तेजोव्यक्तिसमवेतं द्रव्यत्वा-दिकमादाय पुनः पृथिव्याद्यतिप्रसङ्गः स्यादिति जलासमवेतत्वमपि धर्म्मविशेषणम्। न च जलासमवेतत्वमिव पृथिवीसमवेतत्वस्यापि लक्षणघटकत्वसम्भवे जलासमवेतत्वमात्रघटितलक्षणे किं विनिगमकमिति वाच्यम्; सत्यपि पृथिवीसमवेतत्वघटितलक्षणस्य निर्दोषत्वे जलस्यैव अनन्तरपरिप्राप्तत्वेन तदेव प्रकृते विनिगमकमनुसन्धेयम्। वस्तुतस्तु जलासमवेतत्वघटितमिव पृथिवीसमवेतत्वघटितमपि लक्षणं प्रकृते शक्यसाधनमिति ध्येयम्।

पृथिवीत्वादेरपि कालिकविशेषणतया जन्यतेजोवृत्तित्वात् तेजस्त्व-स्यापि तेनैव सम्बन्धेन जन्यजलवृत्तित्वाच्च अतिप्रसङ्गाप्रसङ्गौ स्यातामिति

वृत्तित्वमात्रमपहाय उभयत्रैव समवेतत्वनिवेशः। समवायित्वमित्यपि पृथिवग्राद्यतिप्रसङ्गवारणप्रयोजनकमवधेयम्।

तदपीति तेजोऽपीत्यर्थः। पूर्ववदिति पृथिवीवत् जलवच्चेत्यर्थः। द्विविधमिति नित्यानित्यभेदादिति शेषः। शुक्लभास्वरमेवेति,—न तु अन्यविधमपीत्यर्थः। अतिप्रसङ्गवारणाय जलादिगतशुक्लरूपव्यावर्त्तकं भास्वरत्वं निर्वक्ति भास्वरत्वञ्चेत्यादिना। जलादिगतशुक्लरूपस्य स्वप्रकाशकत्वेऽपि परप्रकाशकत्वाभावात् तद्व्युदासः। जातिविशेषो वेति,—अत्र भगवदुदयनाचार्याः,—'भास्वरत्वञ्च सामान्यविशेषः, स च रूपान्तरप्रकाशकत्वेन व्याप्यते। तद्रूपं तेजस एव, तेन भास्वररूपं तेज इति लक्षणार्थ' इति प्राहुः। द्रव्यसूक्तौ जगदीशोऽपि तथैवाह,—'भास्वरत्वं तेजोमात्रगतो जातिप्रभेद' इत्यादिना। तदत्र भास्वरत्वं तेजोरूपमात्रगतो धर्म्म इत्यस्य सर्व्वमतसाधारण्यमेवेति भावः।

उष्ण एवेति,—न शीतो नाप्यनुष्णाशीत इत्यर्थः। एतेन जल-पृथिव्योरतिप्रसक्तिर्वारिता। नैमित्तिकमेवेति,—न तु सांसिद्धिकमपि, तस्य तथाविधस्य जलमात्रवृत्तित्वात्। ननु वह्निप्रभृतौ तेजसि नैमित्तिकं द्रवत्वं नोपलभ्यते, तत् कथमिदं सङ्गच्छत इति चेन्न; अनुमानप्रमाणेन सिद्धतेजोभावे सुवर्णादौ वह्निरूपतेजोऽन्तरसंसर्गेण समुपजातस्य द्रवत्वस्य प्रत्यक्षत एवोपलम्भात्। सुवर्णादेस्तेजस्त्वा-नुमानरीतिश्च—'सुवर्णं तैजसम् असति प्रतिबन्धके अत्यन्तानलसंयोगेऽपि अनुच्छिद्यमानद्रवत्वाधिकरणत्वा'दिति। परे तु अत्यन्ताग्नि-संयोगो पीतिमगुरुत्वाश्रयो विजातीयरूपप्रतिबन्धकद्रवद्रव्यान्तरसंयुक्तः अत्यन्ताग्निसंयोगे सत्यपि पूर्व्वरूपविजातीयरूपानधिकरणत्वादिति वदन्ति। अत एव किरणावल्यामुदयनाचार्य्याः—"तदिदं सुवर्णादि निरन्तरं ध्यायमानमपि न पूर्व्वरूपं जहाति, न च रूपान्तरमापद्यते। तेन जलवदपार्थिवत्वमवधार्य्यते। तेनैव च द्रव्यान्तरेण प्रतिबद्धत्वा-

दुपष्टम्भकोऽपि पार्थिवभागः सदृग्यरूप एवानुवर्त्तते। यत्तु पुटपाकादिना रक्तसारता दृश्यते तन्मिश्रीभूताभिभावकतत्तद्द्रव्योपगमादिति युक्तमुत्पश्यामः। तदयं प्रयोगः,—सुवर्णादि न पार्थिवम् अत्यन्तानलसंयोगेऽप्यपरावर्त्तमानरूपवत्त्वात् जलवत्। तैजसञ्चैतत् पार्थिवाप्याभ्यामन्यत्वे सति रूपवत्त्वात् सूर्य्यालोकवत्। एतेन पारदादि व्याख्यातम्"। इति प्राहुः। जगदीशभट्टाचार्य्यास्तु सुवर्णादेः पार्थिवत्वमेव तेजःप्रकरणे सूत्रौ प्रतिपादयन्ति,—'यद्यपि गुरोः पीतसुवर्णस्य पार्थिवत्वमेव' इत्यादिग्रन्थेन। पदार्थदीपिकाग्रन्थे च पृथिवीतेजोभिन्नद्रव्यान्तरत्वमपि सुवर्णादेः समर्थितमुपलभ्यते। तत् सर्व्वं सुवर्णादेस्तैजसत्वसाधकयुक्तिभिर्निराकार्य्यमिति।

---

[ वायुलक्षणादिप्रकरणम् ]

वायुत्वरूपजातिप्रवृत्तिनिमित्तकत्वात् वायुरिति संज्ञा साङ्केतिकी। अस्य तु लक्षणं यां काञ्चिद् वायुव्यक्तिमादाय एतद्व्यक्तिसमवेत-पृथिव्यसमवेत-धर्म्मसमवायित्वम्। भवति च एतद्व्यक्तिसमवेतः पृथिव्यसमवेतो धर्म्मः वायुत्वं, तद्वत्त्वञ्च सकलवायोरिति लक्षणसङ्गतिः। पदव्यावृत्तिः पूर्व्वरीत्या प्रत्येतव्या।

ननु वायौ किं मानम्, न च प्रत्यक्षमेव प्रमाणमिति वाच्यम्; लौकिकप्रत्यक्षस्यैव विषयसाधकत्वात्। वायोश्च लौकिकप्रत्यक्षं न सम्भवति; बहिर्द्रव्यलौकिक-

प्रत्यक्षं प्रति उद्भूतरूपस्य हेतुत्वात् ; वायोश्च रूपाभावात् ; उच्यते (१) ;—उपलभ्यमानस्पर्शं पक्षीकृत्य अयं द्रव्याश्रितः स्पर्शत्वात् इत्यनुमानात् पृथिव्याश्रितत्वादिरूपेतरबाधसहकृतात् (२) तत्सिद्धेः ।

तस्य गुणा नव ; स्पर्श-सङ्ख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-परत्व-संस्कारभेदात् । स्पर्शोऽस्य अपाकजोऽनुष्णाशीतः । संस्कारो वेगाख्य एव । वायोरेते गुणाः पृथिवीवत् सिद्धाः । स च वायुः नित्यानित्यभेदात् द्विविधः । नित्यः परमाणुरूपः, तद्भिन्नः अनित्यः ।

साङ्केतिकौति पृथिवी-जल-तेजसां संज्ञावदिति शेषः । न च वायुत्वजातौ मानाभावः ; अपाकजानुष्णाशीतस्य स्पर्शविशेषस्य वह्निमात्रस्य वा जनकतावच्छेदकत्वेन तत्सिद्धेः । तथाहि तादृश-स्पर्शविशेषजनकता किञ्चिद्धर्मावच्छिन्ना जनकतात्वात् दण्डादेर्घटादिकारणत्ववदित्यादिप्रयोगेण धर्म्मस्य जातित्वे लाघवमिति लाघवज्ञानानुगृहीतेन तत्सिद्धिरवसेया ।

लौकिकप्रत्यक्षस्यैवेति,—एवशब्दः अलौकिकप्रत्यक्षमात्रव्यवच्छेदार्थः, तदितरवस्तुमात्रव्यवच्छेदस्य सर्व्वथा बाधितत्वात् । तथा च अलौकिकप्रत्यक्षस्यापि विषयसाधकत्वे अलौकिकस्यापि पदार्थस्य सिद्धिप्रसङ्ग इति भावः ।

---

(१) वायोश्चेत्यादिः उच्यत इत्यन्तः पाठः ख-ग-पुस्तकयोः नास्ति ।

(२) पृथिव्याश्रितत्वाद्यभावेत्यादिः ख-ग-पुस्तकयोः पाठः ।

ननु अस्तु लौकिकप्रत्यक्षेणैव तत्सिद्धिरित्याशङ्क्याह वायोश्चेत्यादि। न च वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वात् घटवदित्याद्यनुमानेन वायोः प्रत्यक्षत्वं शक्यं साधयितुम्; उद्भूतरूपवत्त्वस्य तत्रोपाधित्वात् तादृशोपाध्यभावस्य प्रकृते साध्याभावानुमापकत्वात्।

अयमित्यादिः।—तथाहि प्रकृते द्रव्याश्रितत्वरूपसामान्यसाध्यसाधकपरामर्शस्यापि पृथिव्याश्रितत्वादिरूपेतरबाधसहकारेण पृथिव्यादिभिन्नद्रव्याश्रितत्वसाधकत्वमवसेयम्। यथा सामान्यवह्निसाधकपरामर्शस्यापि वह्निव्याप्यधूमवानित्यादिरूपस्य महानसीयवह्नीतरवह्न्यभाववानित्यादिबाधसहकारेण महानसीयवह्निसाधकत्वं तद्वदिति भावः। प्रकृते पृथिव्याश्रितत्वाद्यभावनिर्णयरीतिरित्थं सम्भवेत् यथा,—नायं स्पर्शः पृथिव्याश्रितः अपाकजस्पर्शत्वात्, नापि जलाश्रितः अशीतस्पर्शत्वात्, न तेजआश्रितः अनुष्णस्पर्शत्वात, न व्योमाद्याश्रितः मूर्त्तविशेषगुणत्वादेवं सत्यपि सिद्धे द्रव्याश्रितत्वे पृथिव्यादिभिन्नद्रव्याश्रितत्वमेवानायत्या कल्पनीयम्। तत्र आश्रयरूपद्रव्यमेव वायुरित्यभिधीयत इत्यनुमानबलादेव वायुसिद्धिरिति।

स्पर्शोऽस्येति।—अत्र अपाकज इत्यनेन पृथिव्याः स्पर्शो व्यवच्छिद्यते, अनुष्ण इत्यनेन तेजसः स्पर्शः, अशीत इत्यनेन च जलस्य स्पर्श इति। ननु अपाकजत्वं पाकाजन्यत्वं, तच्च वैशेषिकनये अवयविस्पर्शमात्रेष्वेव समापतति, तत्र अवयविनि पाकस्य अनङ्गीकारात् तज्जन्यस्पर्शस्य अवयविनि सम्पादयितुमशक्यत्वात्। यदुक्तं विश्वनाथेन 'एतेषां पाकजत्वन्तु क्षितौ नान्यत्र कुत्रचित्। तत्रापि परमाणौ स्यात् पाको वैशेषिके नये।' इति, तदिदमसङ्गतमिति चेन्न; अपाकजपदेन प्रकृते पृथिवयवृत्तित्वस्य विवक्षितत्वात्।

अन्ये तु अपाकजपदेन पाकजस्पर्शवदवृत्तिद्रव्यविभाजकधर्म्मसामानाधिकरण्यं व्याख्यातम्, तेन घटादिस्पर्शे तादृशधर्म्मसामानाधिकरण्या-

भावात् न क्षतिरिति वदन्ति। ये तु अपाकजानुष्णाशीतत्वं वायुस्पर्शमात्रगतं जातिभेदमाहुः तेषान्तु सुकरः समाधिरिति ध्येयम्।

---

[ पार्थिवशरीरादिप्रकरणम् ]

पृथिव्यादि वायुन्तचतुष्कं(१) शरीरेन्द्रियविषयरूपम्। तत्र पार्थिवशरीरं मनुष्यपशुपक्ष्यादिभेदात्(२) द्विविधं योनिजमयोनिजञ्च। तत्र योनिजं शुक्रशोणितसन्निपातजम्। तदपि द्विविधं जरायुजमण्डजञ्च। तत्र जरायुजं मनुष्यादीनाम्, अण्डजं सर्पादीनाम्। अयोनिजञ्च शरीरं देवर्षीणां कीटादीनाञ्च। तत्र देवर्षीणामयोनिजं शरीरं धर्म्मविशेषसहितेभ्यः परमाणुभ्यो द्व्यणुकादिक्रमेण जायते(३), कीटादीनाञ्च अधर्म्मसहितेभ्यः परमाणुभ्यो द्व्यणुकादिक्रमेण जायते। गन्धसाक्षात्कारजनकम् इन्द्रियं घ्राणाख्यं पार्थिवम्। विषयश्च मृत्पाषाणस्थावरादिरूपः।

आप्यशरीरं वरुणलोके प्रसिद्धम् जलावयवैरारब्धं अयोनिजमेव पार्थिवावयवोपष्टम्भादुपभोग-

---

(१) चतुष्टयमिति क-पुस्तके पाठः। (२) भेदादिति क-पुस्तके नास्ति।
(३) जायत इति क-पुस्तके नास्ति।

समर्थम्। आप्यमिन्द्रियं रसनं तच्च रसप्रत्यक्षजनकम्। विषयरूपं जलम् सरित्समुद्रहिमकरकादि।

तैजसं शरीरं सूर्य्यलोके प्रसिद्धम्। तच्च तेजोऽवयवैरारब्धं अयोनिजमेव (४)। पार्थिवावयवोपष्टम्भाच्च उपभोगसमर्थम्। तैजसमिन्द्रियं चक्षुः रूपप्रत्यक्षजनकम् (५)। विषयरूपं तेजश्च सुवर्णादि।

वायवीयशरीरं वायुवयवैरारब्धं वायुलोके प्रसिद्धम् अयोनिजमेव(६) पार्थिवावयवोपष्टम्भाच्च उपभोगसमर्थम्। वायवीयमिन्द्रियं त्वक् सर्व्वदेहव्यापि द्रव्यादिग्राहकम् (७)। विषयरूपो वायुश्च उपलभ्यमानस्पर्शाश्रयरूपो देहस्थप्राणाख्यवायुश्च। प्राणाख्यवायुश्च अन्तःशरीरे रसमलधातुप्रेरणाहेतुरेकः अपानादिक्रियाभेदात् अपानादिपञ्चसंज्ञकः।

ग्रन्थलाघवार्थमेकोक्त्या पृथिव्यादिचतुर्णां शरीरेन्द्रियविषयरूपत्वमाह पृथिव्यादीत्यादिना। पार्थिवशरीरमिति पृथिव्युपादानकं शरीरमित्यर्थः। न तु पृथिवीकारणकशरीरमिति; पञ्चानामेव भूतानां सर्व्वत्र शरीरे कारणतया अतिप्रसङ्गापातात्। शरीरत्वं चेष्टाश्रयत्वम्।

---

(४) अयोनिजमेवेति क-पुस्तके नास्ति। (५) रूपप्रत्यक्षजनकमिति क-पुस्तके नास्ति।

(६) अयोनिजमेवेति क-पुस्तके नास्ति।

(७) द्रव्यादिस्पर्शग्राहकमिति ख-पुस्तके पाठः।

न च मृतशरीरे चेष्टाभावादव्याप्तिरिति वाच्यं ; चेष्टावद्वृत्तिजातिमत्त्वस्य विवक्षितत्वात्। न च तथापि हस्ताद्यवयवमात्रे शरीरत्वापत्तिरिति वाच्यं ; इष्टत्वात् अन्त्यावयविमात्रवृत्तित्वस्य वा जातिविशेषणत्वादिति। तादृशी च जातिः शरीरवृत्तिचेतत्वमैतत्वादिरूपेति।

न च कथं एकैकशरीरमात्रवृत्तीनां चैत्रत्वादीनां जातित्वसम्भवः एकव्यक्तिकत्वस्य जातिबाधकत्वादिति वाच्यं ; बाल्यकौमारादिभेदेन उपचयापचयादिमत्त्वेन एकस्यापि चैत्रात्मनः अनेकशरीराङ्गीकारस्य कर्त्तव्यतया चैत्रत्वादिजातेः अनेकवृत्तित्वस्य सुसम्भवत्वात्। कल्पभेदेन नृसिंहशरीरस्यापि अनेकतया तद्वृत्तिनृसिंहत्वस्यापि जातित्वोपपादनेन तामेव जातिमादाय नृसिंहशरीरेऽपि लक्षणसमन्वयः सुशक इति ध्येयम्। शरीरत्वन्तु न जातिः पृथिवीत्वादिना साङ्कर्य्यादिति सुप्रतिपादितमस्माभिः सूक्तिदीपिकायाम्।

ननु योनिः कारणं तस्माज्जातं योनिजं तद्भिन्नमयोनिजमिति व्युत्पत्तिपरिग्रहे सर्व्वस्यैव शरीरस्य जन्यतया अयोनिजत्वं बाधितमिति शङ्कायामादौ योनिजशब्दव्युत्पत्तिमाह तत्रेत्यादिना। शुक्रशोणितयोः सन्निपातः मिलनं तज्जनितं शरीरं योनिजं तद्भिन्नञ्च अयोनिजमित्यर्थः। जरायुजमिति,—गर्भधारकं चर्म्मपुटकं जरायुः ततो जातं जरायुजमित्यर्थः।

गन्धेत्यादिः।—इन्द्रियत्वं न जातिः पृथिवीत्वादिना साङ्कर्य्यात्, किन्तु स्मृत्यजनकज्ञानजनकमनोवृत्तिसंयोगाश्रयत्वम्। सुषुप्तिमनुरुध्य त्वङ्मनोयोगस्य जन्यज्ञानसामान्यकारणत्वे तु स्मृत्यजनकत्वमपहाय आत्मवृत्तित्वं संयोगविशेषणमवगन्तव्यम्। व्यापारप्रत्यासत्त्या साक्षात्कारकारणत्वं वा इन्द्रियत्वम्। सिद्धान्तमुक्तावलीकारास्तु,—'शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिन्द्रियत्व'मित्याहुः। 'शरीराश्रयं ज्ञातुरपरोक्षप्रतीतिसाधनं द्रव्यमिन्द्रिय'मिति न्यायकन्दलीकाराः।

निरुक्तलक्षणयोः प्रथमस्य लक्षणस्य व्यावृत्तयः सिद्धान्तमुक्तावल्यां, द्वितीयस्य च सूक्तिदीपिकायां सविशेषमनुसन्धेयाः। गन्धसाक्षात्कारेति,—पार्थिवेन्द्रियस्य प्रयोजनकथनम्। घ्राणेति संज्ञानिरुक्तिः। तच्च नासाग्रे समवतिष्ठत इति तर्कसंग्रहकाराणामाशयः।

विषयश्चेति।—'शरीरेन्द्रियभिन्नकार्यद्रव्यत्वं विषयत्वम्।' इति जगदीशभट्टाचार्यः। 'शरीरेन्द्रियव्यतिरिक्तमात्मोपभोगसाधनं द्रव्यं विषय इति श्रीधराचार्याः। 'प्रतीयमानतया भोगसाधनं विषय' इति च किरणावलीकाराः। एतेषु द्वितीयतृतीययोर्विषयत्वं नित्यानित्यसाधारणं प्रथमस्य च जन्यमात्रवृत्तीति विशेषः प्रतिपत्तव्यः।

मृदित्यादिः। मृत्त्वपाषाणत्वे जातिभेदौ। स्थावरत्वञ्च क्षित्यवच्छेदकावृत्तिभोगावच्छेदकवृत्तिजातिमत्त्वम्। वृक्षत्वतृणत्वादिव्यापकपृथिवीत्वव्याप्यजातिभेदो वा इति प्राञ्चः॥

आप्येति,—जलोपादानकेत्यर्थः। पार्थिवावयवोपष्टम्भादिति-पार्थिवावयवसम्पर्कविशेषादित्यर्थः। रसनमिति,—रस्यते अनेनेति व्युत्पत्त्या करणे अनट् प्रत्ययसिद्धम्। एतेन संज्ञानिरुक्तिः। रसप्रत्यक्षेति प्रयोजनकथनम्। तदिदं पूर्ववदेव फलगर्भलक्षणं यथा रसप्रत्यक्षजनकेन्द्रियत्वं रसनत्वमिति।

तैजसमिति,—तेजःसमवायिकारणकमित्यर्थः। अयोनिजमेवेति न तु योनिजमपीति भावः। चक्षुरिति—संज्ञा। रूपप्रत्यक्षेति प्रयोजनकथनम्। रूपप्रत्यक्षजनकेन्द्रियत्वं चक्षुष्टमिति च लक्षणम्। सुवर्णादीति,—सुवर्णादीनां यथा तेजस्यन्तर्भावस्तथोक्तमधस्तात्।

वायवीयेति वायूपादानकेत्यर्थः। त्वगिति—वायवीयेन्द्रियस्य संज्ञा। सर्वदेहव्यापीति तत्स्थाननिरुक्तिः। यत्किञ्चिदवयवविशेषगतत्वे अवयवान्तरावच्छेदेन स्पर्शग्रहासम्भवात् सर्वदेहेति। द्रव्येत्यादिना प्रयोजनकथनं, तदेव च तस्य लक्षणमपि। उप-

लभ्यमानेत्यादिना तत्र प्रमाणप्रदर्शनम्। तच्च विशेषेण प्रपञ्चितमधस्तात्। अपानादीति—प्राणापानसमानोदानव्यानसंज्ञक इत्यर्थः।

---

[ आकाशकालदिशां गुणादिप्रकरणम् ]

आकाशकालदिशामेकैकत्वात् आकाशत्वादिजात्यभावात् द्रव्यत्वव्याप्यजात्यभावाच्च (१) आकाशादिसंज्ञा न साङ्केतिकी, अपि तु पारिभाषिकी। अत एव भाष्यकारेणोक्तम्—"आकाशकालदिशामेकैकत्वादपरजात्यभावात् पारिभाषिक्यस्तिस्रः संज्ञा भवन्ति आकाशं कालो दिगिति। अपरजात्यभावात् द्रव्यत्वव्याप्यजात्यभावात्"। पारिभाषिकी संज्ञा च शृङ्गग्राहिकान्यायेन व्यक्तिविशेषबोधिका(२)। संज्ञा तावत् त्रिविधा; साङ्केतिकी पारिभाषिकी नैमित्तिकी च। तत्र साङ्केतिकी पारिभाषिकी च व्याख्याता। नैमित्तिकी च उपाधिप्रवृत्तिनिमित्तिका संज्ञा; यथा पशुवादिसंज्ञा। तथाहि पशुपदशक्यतावच्छेदकं लोमवल्लाङ्गूलवत्त्वं, तच्च न जातिः; तेजस्त्वादिना साङ्कर्य्यात्। तच्च

---

(२) व्यक्तिबोधिकेति ख-पुस्तके पाठः।

(१) द्रव्यत्वव्याप्यजात्यभावाच्चेति क-पुस्तके नास्ति।

उपाधिरिति पशुसंज्ञाया उपाधिप्रवृत्तिनिमित्तकत्वम् । लोमवल्लाङ्गूलवत्त्वमित्यत्र लोमवत्त्वं लाङ्गूले विशेषणम्, न तु तद्वति, अतो न मूषिकादेः पशुत्वमिति ज्ञेयम् ।

आकाशस्य गुणाः षट् ; संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-शब्दभेदात् । शब्दस्तु अस्य विशेषगुणः । संख्यादिपञ्च तस्य सामान्यगुणाः (३) । अस्य परिमाणं परममहत्त्वम् । परमत्वञ्च अनवच्छिन्नत्वम् ।

काल एकः, वर्त्तमानत्वादिप्रत्ययश्च औपाधिकः । तस्य गुणाः पञ्च ; संख्या-परिमाण-पृथक्त्व-संयोग-विभागरूपाः । अस्य विशेषगुणो नास्ति । अस्यास्ति परिमाणं परममहत्त्वम् ।

दिगपि एकैव ; उपाधिभेदाच्च प्राच्यादिदशविधाः संज्ञा भवन्ति (४)। अस्या अपि विशेषगुणविरहः । सामान्यगुणाश्च पञ्च संख्या-परिमाण-पृथक्त्व-संयोग-विभागरूपाः सन्ति । अस्या अपि परिमाणं परम-महत्त्वम् ।

---

(२) तच्चेत्यादिः साङ्ख्यादित्यन्तः पाठः क-पुस्तके नास्ति ।

(३) 'संख्यादिपञ्चकस्तु सामान्यगुणः' इति ख-पुस्तके पाठः ।

(४) 'दशविधा संज्ञा भवति' इति ख-पुस्तके पाठः ।

अथेदानीमाकाशकालदिशां गुणादयो निरूप्यन्ते आकाशेत्यादिना। एकैकत्वादिति—प्रत्येकनिष्ठभेदाप्रतियोगित्वादित्यर्थः। आकाशस्य आकाशनिष्ठभेदाप्रतियोगित्वात्, कालस्य कालनिष्ठभेदाप्रतियोगित्वात्, दिशश्च दिङ्निष्ठभेदाप्रतियोगित्वादित्यर्थः। तथाहि आकाशादीनां प्रत्येकमेकव्यक्तितया आकाशादिनिष्ठभेदप्रतियोगित्वमाकाशादिभिन्नानामेव, न त्वाकाशादीनामित्येकैकत्वमुक्तरूपं तत्र तत्र सुसङ्गतमेवेति विशदार्थः। अत एव आकाशत्वादयो धर्म्मा न जातिरूपाः सिध्यन्ति; व्यक्त्यभेदस्य स्वाश्रयवृत्तिभेदाप्रतियोगित्वसामानाधिकरण्यादिलक्षणस्य जातित्वबाधकत्वात्। सविस्तरमिदं मदीयं 'जातिबाधकविचार' ग्रन्थे द्रष्टव्यम्।

निरुक्तमेकैकत्वम् आकाशादीनां आकाशत्वादिजात्यभावे द्रव्यत्वव्याप्यजात्यभावे च हेतुः, तौ च आकाशादिसंज्ञायाः साङ्केतिकत्वाभावे। एकैकत्वस्य द्रव्यत्वव्याप्यजात्यभावसाधकत्वे प्रयोगो यथा,—आकाशं न द्रव्यत्वव्याप्यजातिमत् आकाशनिष्ठभेदाप्रतियोगित्वात् यन्नैवं तन्नैवं यथा घट इत्यादिः। अत एव सिद्धान्तमुक्तावल्यां 'आकाशकालदिशामेकव्यक्तिकत्वादाकाशत्वादिकं न जातिः, किन्तु आकाशत्वं शब्दाश्रयत्व'मिति विश्वनाथः प्राह।

व्यक्तिविशेषबोधिकेति, एकैकव्यक्तिमात्रबोधिकेत्यर्थः। तदुक्तं जगदीशेन 'उभयावृत्तिधर्म्मेण संज्ञा स्यात् पारिभाषिकी'। इति।

साङ्केतिकीत्यादिः।—अत्र शब्दशक्तिप्रकाशिकायां जगदीशस्तु औपाधिकनैमित्तिकपारिभाषिकभेदेन त्रिविधसंज्ञां व्याचष्टे, तत्र तन्मतसिद्धा नैमित्तिकी एतन्मते साङ्केतिकी, औपाधिकी च नैमित्तिकीति परिगृहीता दृश्यते। तदत्र संज्ञाभेदे सतापि न वस्तुतत्त्वतिरिति ध्येयम्। उक्तत्रिविधसंज्ञानिरुक्तिः शब्दशक्तिप्रकाशिकायामनुसन्धेया।

सार्ङ्क्यादिति;—सार्ङ्क्यं नाम परस्परभावसामानाधिकरण्ये सति सामाधिकरण्यलक्षणम्। सूर्य्यलोकादिगतपशूनां तैजसत्वस्य अनायतया

कल्पनीयतया मतभेदे सुवर्णादिमयकृत्रिमपशूनामपि पशुत्वाभ्युपगमेन वा निरुक्तसाङ्कर्य्यमुपपादनीयम् ।

तद्वतीति लाङ्गूलवतीत्यर्थः । तथाहि मूषिकादेः लाङ्गूलस्य न लोमवत्त्वं, परं अवयवान्तरावच्छेदेन तस्य लोमवत्त्वमबाधितमेवेति तद्वति लोमवत्त्वविशेषणसत्त्वे मूषिकादिष्वपि पशुलक्षणातिप्रसक्तिप्रसङ्ग इति भावः ।

एक इति—कालनिष्ठभेदाप्रतियोगीत्यर्थः । वर्त्तमानत्वादीत्यादिपदात् अतीतत्वभविष्यत्त्वयोः परिग्रहः । वर्त्तमानत्वं प्रयोगाधिकरणकालत्वम् । अतीतत्वं वर्त्तमानकालवृत्तिध्वंसप्रतियोगिकालत्वम् । भविष्यत्त्वञ्च वर्त्तमानकालवृत्तिप्रागभावप्रतियोगिकालत्वम् । कालस्य नित्यत्वेऽपि औपाधिकध्वंसप्रागभावपरिग्रहेण औपचारिकमेव तथात्वमवधेयम् । अत एव स्वयमाह औपाधिक इति ।

एकैवेति ;—अत्रापि एकत्वं पूर्ववत् । प्राच्यादीत्यादिपदेन अवाचीप्रतीच्युदीचीप्रभृतीनामुपग्रहः । दशविधेति ।—सप्तपदार्थीकारास्तु रौद्रीं नाम एकादशीं दिशमपि निर्वर्णयन्ति ; तदुक्तं सप्तपदार्थ्यां,—'दिगैन्द्री आग्नेयी याम्या नैर्ऋती वारुणी वायवी कौबेरी ऐशानी नागी ब्राह्मी रौद्री चेतेकादशविधा' इति । 'रौद्री दशानामपि दिशां मध्यभाग' इति जिनवर्द्धनसूरिकृतसप्तपदार्थीटीका । 'रौद्री अन्तरिक्षप्रदेश' इति माधवसरस्वतीकृतसप्तपदार्थीमितभाषिणी ।

दीधितिकारास्तु कालं दिशञ्च ईश्वरानतिरिक्तपदार्थमाहुः । नव्यास्तु दिक्कालयोरीश्वररूपत्वं तत्तज्जीवरूपत्वं वेति विनिगमनाविरहेण तदतिरिक्ततामङ्गीकुर्व्वन्ति ।

आकाशकालदिशां सिद्धिरनुमानेन । तदिदं विस्तरभयान्नोपनिबध्यते । तत्सर्व्वमन्यत्र मृग्यम् ।

[ आत्मगुणादिप्रकरणम् ]

आत्मेति संज्ञा साङ्केतिकी आत्मत्वजातिप्रवृत्ति-निमित्तकत्वात्। न च आत्मत्वजातौ मानाभाव इति वाच्यं ; सुखसमवायिकारणतावच्छेदकतया तत्-सिद्धेः। न च ईश्वरात्मनि आत्मत्वजातौ माना-भावः तस्य सुखाभावात् ; तत्सुखस्य अङ्गीकारेऽपि तस्य नित्यत्वमेवेति वाच्यम् ; (१)सुखसमवायिकारणता-वच्छेदकतया सिद्धस्य आत्मत्वस्य ईश्वरात्मन्यपि सम्बन्धस्वीकारात् लाघवेन कल्पात्मत्वजातेरेव आत्म-पदशक्यतावच्छेदकत्वात्।

जीवात्मनश्चतुर्दश गुणाः ; संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-बुद्धि-सुख-दुःख-इच्छा-द्वेष-प्रयत्न-धर्मा-धर्म-संस्कारभेदात्। अस्य संस्कारो भावनाख्यः। स्मृतिं प्रति संस्कारस्य हेतुत्वेन तत्र तस्य अवश्यं स्वीकरणीयत्वात् (२)। अस्यापि परिमाणं परम-महत्त्वम्। जीवात्मानश्चानन्ताः।

---

(१) 'तन्नित्यमेव' इति क-पुस्तके पाठः।

(२) अवश्यमित्यत्र आवश्यकेति ख-पुस्तके पाठः।

अथात्मानं निरूपयति आत्मेतीत्यादिना। ज्ञानाश्रयत्वमात्मनः सामान्यलक्षणम्। तत्र जीवात्मनो जन्यज्ञानाश्रयत्वात् ईश्वरात्मनश्च नित्यज्ञानाश्रयत्वादुभयत्रैव लक्षणसमन्वयः। सुखेत्यादिः।—समवायेन सुखत्वावच्छिन्नं प्रति अभेदसम्बन्धेन आत्मत्वेन कारणत्वमिति कार्य्यकारणभावः। अत्र सुखेत्युपलक्षणम्, विनिगमनाविरहेण दुःखत्वद्वेषत्वादिना आत्मत्वेन च कार्य्यकारणभावस्यापि कल्पयितुं शक्यत्वात्।

तस्येत्यादिः।—तस्येति ईश्वरात्मन इत्यर्थः। तथाहि सुखत्वावच्छिन्नं प्रति धर्म्मत्वेन दुःखत्वावच्छिन्नं प्रति अधर्म्मत्वेन जन्यत्वावच्छिन्नं प्रति च अदृष्टत्वेन कारणत्वस्य कृप्तत्वतया ईश्वरात्मनि अदृष्टाभावेन सुखदुःखादिजन्यगुणासम्भवादिति भावः।

सम्बन्धस्वीकारादिति समवायस्वीकारादित्यर्थः। तथाहि यथा गन्धसमवायिकारणतावच्छेदकतया सिद्धस्य पृथिवीत्वस्य उत्पन्नविनष्टे गन्धशून्ये घटादावपि सत्त्वमङ्गीक्रियते, तथैव सुखादिशून्येऽपि परमात्मनि सुखादिसमवायिकारणतावच्छेदकतया सिद्धस्य आत्मत्वस्य अङ्गीकारे न क्षतिरिति भावः।

लाघवेनेत्यादिः।—तथाहि निरुक्तप्रकारेण आत्मत्वजातेः सिद्धतया तत्पदशक्यतावच्छेदकस्य आत्मशब्दस्य जात्यवच्छिन्नसङ्केतवत्त्वेन साङ्केतिकसंज्ञात्वं सर्व्वथा सोपपत्तिकमिति भावः।

स्मृतिं प्रतीत्यादिः।—अननुभूतस्य स्मृत्यभावात् स्मृतित्वेन अनुभवत्वेन कार्य्यकारणभावस्य अवश्यकल्पनात् कालान्तरजातस्य अनुभवस्य वर्त्तमानस्मृत्याव्यवहितपूर्व्ववर्त्तित्वासम्भवेन कारणत्वासम्भवात् तत्कारणतासम्पादनाय वर्त्तमानस्मृत्याव्यहितप्राक्क्षणपर्य्यन्तस्थायी व्यापारः कोऽपि कल्पनीयः, स एव भावनाख्यः संस्कार इति भावः। न च व्यापारेण तादृश्येन व्यापारिणोऽनुभवस्य अन्यथासिद्धत्वमिति वाच्यम्; व्यापारिणोऽनुभवस्य स्मृतिकारणत्वाभावे व्यापा-

रस्य संस्कारस्यैवासिद्धेः ॥ उक्तञ्च भाष्ये 'संस्कारः स्मृत्युत्पत्तौ कारणवचना'दिति। अत्र जगदीशः 'आत्ममनसोः संयोगात् संस्काराच्च स्मृतिरिति सूत्रम्। स्मृत्युत्पत्तौ संस्कारस्य हेतुत्वकथनात् संस्कारस्तद्वचनात् सिद्ध इत्यर्थः।

ननु आत्मनि किं मानम् इति चेत् अहं सुखीत्यादि प्रत्यक्षम्। तथाहि अहमिति प्रतीतिविषय एवात्मा इत्यर्थः। ननु अहमिति प्रतीतेर्देहविषयकत्वे किं बाधकमिति चेत् अहं देहीति भेदेन प्रतीतिरेव। न च पृथिव्यादिकमहमिति प्रतीतिविषयः अहं पृथिवीत्यभेदप्रतीतेः कुत्राप्यदृष्टत्वात्।

करणभूतैश्चक्षुरादिभिरनुमानेन शब्दप्रमाणेन च आत्मनः सिद्धिमुदाहरन्ति। प्रयोगो यथा श्रोत्रादीनि करणानि कर्त्तृव्यापार्याणि करणत्वात् कुठारादिवदिति। शब्दादिज्ञानं क्वचिदाश्रितं कार्य्यत्वात् गन्धवदित्यादिप्रयोगोऽपि आत्मानं साधयितुमीष्टे। आत्मसाधकप्रकारान्तराणि जगदीशसूक्त्यादिसमालोचनेनावगन्तव्यानि विस्तरभिया नेह प्रदर्श्यन्ते।

अनन्ता इति—असंख्या इत्यर्थः। अत्र 'नानात्मानो व्यवस्थात' इति सूत्रमुपजीव्यम्। तथाहि व्यवस्था प्रतिनियमः, यथा कश्चिदाढ्यः कश्चित् रङ्कः, कश्चित् सुखी, कश्चिद् दुःखी, कश्चिदुच्चाभिजनः, कश्चिन्नीचाभिजनः, कश्चिद् विद्वान्, कश्चिद् जाल्म इतीयं व्यवस्था आत्मभेदमन्तरेण अनुपपद्यमाना साधयत्यात्मनां भेदम् इत्युपस्कारकाराणामाशयः। एतेन अद्वैतिनामेकात्मवादो निरस्तः।

---

मनस्त्व-जाति-प्रवृत्तिनिमित्तकत्वात् मन इति संज्ञा साङ्केतिकी। न च मनस्त्व-जातौ मानाभाव इति वाच्यम् (१); मानसप्रत्यक्षजनकतावच्छेदकतया तत्सिद्धेः; मानसत्वावच्छिन्नं प्रति मनस्त्वेन हेतुत्वात्। मनश्च प्रतिशरीरं भिन्नम्।

तस्य चाष्टौ गुणाः; संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-परत्व-संस्कारभेदात्। अस्य अणुत्वं परिमाणम्, परत्वापरत्वे च दैशिके, न तु कालिके तस्य नित्यत्वात्। संस्कारश्च उत्तरक्रिया-जनकत्वात् वेगाख्य एव (२)।

उद्देशक्रमप्राप्तं मनो निरूपयितुमाह मनस्त्वेत्यादि। साङ्केतिकीति पृथिव्यादिसंज्ञावदिति भावः। ननु मनस्त्वस्य जातित्वमेवासिद्धं तत् कथं तन्मूलकं मनःसंज्ञायाः साङ्केतिकत्वमित्याशङ्क्याह नचेत्यादि। तत्सिद्धेरिति मनस्त्व-जातिसिद्धेरित्यर्थः। अत्रापि पूर्वोक्तरीत्या अनुमानप्रयोगः प्रतिपत्तव्यः। तथाहि मानसत्वावच्छिन्न-जनकतावच्छेदकस्य मनस्त्वस्य लाघवानुरोधेन जातिस्वरूपत्वमेवाङ्गीकर्त्तव्यमिति मनःसंज्ञायास्तन्मूलकसाङ्केतिकत्वमुपपद्यत एवेति भावः।

---

(१) 'इति वाच्य' मिति पाठः ख—ग-पुस्तकयोः नास्ति।

(२) 'क्रियाजनकवेगाख्य एव' इति पाठः ख—ग पुस्तकयोः।

ननु मनोरूपस्य धर्मिणः सिद्धावेव धर्मस्य मनस्त्वादेर्विचारस्तत् तस्यैव सिद्धिः कुत इति चेन्न अनुमानप्रमाणेन मनोरूपस्य धर्मिणः सिद्धेः। तदुक्तं भाष्ये 'सत्यप्यात्मेन्द्रियार्थसान्निध्ये ज्ञानसुखादीनामभूतत्वोत्पत्तिदर्शनात् करणान्तरमनुमीयते। श्रोत्राद्यव्यापारे स्मृत्युत्पत्तिदर्शनात् वाह्येन्द्रियैरगृहीतसुखादिग्राहकान्तराभावाच्च अन्तःकरण'मिति। 'आत्मेन्द्रियार्थसान्निध्ये कारणे सत्यपि ज्ञानसुखादीनां अभूतत्वं कारणान्तरविरहादेव, अनन्तरं तेषामुत्पत्तिश्च कारणान्तरप्राप्त्या इतरतस्तत्कारणमन्यासम्भवात् मन एव कल्प्यत इत्यर्थः। अन्यासम्भवस्तु अन्यस्मिन् समस्ते सत्यपि तदनुत्पत्तिदर्शनाद् बोध्य' इति जगदीशसूक्तिः। विस्तरस्तु सूक्तिग्रन्थादवधेयः।

ननु मनसः किमेकत्वमनेकत्वं वा? लाघवादेकत्वमेव युक्तमिताशङ्क्याह मनश्चेत्यादि। तथाहि शरीरभेदेन मनसोऽपि व्यक्तिभेदः कल्पनीय एव, अन्यथा सकलशरीरसाधारणस्य एकस्य मनसः स्वीकारे चैत्रात्मवृत्तिज्ञानसुखादीनां मैत्रात्मना ग्रहणप्रसङ्गः, एकस्य सुषुप्तौ सकलज्ञानाद्यभावप्रसङ्गश्च स्यादाम्। व्यक्तिभेदे च एकैकेन मनसा एकैकज्ञानसुखादिप्रयत्नस्य स्वीकारेण एकस्य मनसः पुरोतति प्रवेशेऽपि व्यक्त्यन्तरस्य अप्रवेशेन नानिष्टापत्तिरिति। ननु मनो भिन्नमेवास्तु प्रतिदेहम्, किन्तु प्रतिशरीरमपि तस्य अनेकत्वमास्तां, तत्र किं बाधकमिति चेन्न प्रतिशरीरमस्यानेकत्वे अनेकैरेव मनोभिः अनेकेषां विषयाणां योगसम्भवात् युगपदनेकप्रयत्ना अनेकज्ञानानि च उत्पद्येरन्, एकस्य मनसः पुरोतति प्रवेशेऽपि अपरस्य नियमेनाप्रवेशात् सुषुप्तिदशायां ज्ञानाभावस्य सर्वसिद्धस्यापि अपलापप्रसङ्गाच्च इत्यादिकं बहुतरमूहनीयम्।

मनसः परिमाणमाह अस्य चेत्यादिना। मनो न मध्यमपरिमाणं नापि विभुपरिमाणम्; मध्यमपरिमाणत्वे अनित्यत्वप्रसङ्गात् विभुपरिमाणत्वे एकदा सकलेन्द्रियसन्निकर्षे युगपदनेकज्ञानादिप्रसङ्गाच्च।

तदिदमणुपरिमाणमिति सिद्धम्। तदुक्तं सूत्रकृता 'तदभावादणु मन' इति। 'तत्पदेन वैभवं परामृष्टं वैभवाभावादणु इत्यर्थ' इति जगदीशसूक्तिरिति।

---

[ परमात्मगुणादिप्रकरणम् ]

परमात्मनश्च अष्टौ गुणाः; संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-बुद्धी-च्छा-प्रयत्नभेदात्। अस्यापि परिमाणम् परममहत्त्वम्। अस्य बुद्धीच्छाप्रयत्ना नित्याः। यदुक्तम्,

वायोर्नवैकादश तेजसो गुणा
जल-क्षिति-प्राणभृतां चतुर्दश।
दिक्-कालयोः पञ्च षड़ेव चाम्बरे।
महेश्वरेऽष्टौ मनसस्तथैव च॥

दीधितिकृन्मते तु परमात्मनो नव गुणाः; तेन तस्य नित्यसुखस्वीकारात्।

अथ क्षित्यादिकर्त्तृत्वेन सिद्धस्य परमात्मनो गुणानाह परमात्मनश्चेत्यादिना। संख्येति तस्य लाघवेन एकस्यैव कल्पनात् एकत्वमेव संख्येति भावः। तदुक्तं न्यायकन्दल्याम्—'स किमेकोऽनेको वा? एक इति वदामः। बहूनामसर्वज्ञत्वे अस्मदादिवदसामर्थ्यात् सर्वज्ञत्वे तु एकस्यैव सामर्थ्यादपरेषामनुपयोगात्', इति। भगवतः परमात्मनः अष्टगुणाधिकरणत्वं केचिदेवमुपपादयन्ति, तद्यथा—'कार्य्यविशेषेण सिद्धस्य कर्त्तृविशेषस्य सर्वज्ञत्वान्न कुत्रचिद्वस्तुनि विशेषानु-

पलम्भः, अतो न तन्निबन्धनं मिथ्याज्ञानम्, मिथ्याज्ञानाभावे च न तन्मूलौ रागद्वेषौ, तयोरभावान्न तत्पूर्विका प्रवृत्तिः, प्रवृत्त्यभावे च न तत्साध्यौ धर्माधर्मौ, तयोरभावात् तज्जयोरपि सुखदुःखयोरभावः, सर्व्वदैव चानुभवसद्भावात् स्मृतिसंस्कारावपि नास्तीत्यष्टगुणाधिकरणो भगवानीश्वर' इति। परे तु बुद्धिमेव भगवतोऽव्याहतां क्रियाशक्तिमुररीकुर्व्वाणा इच्छाप्रयत्नावपि गुणावस्वीकुर्व्वन्तः षडेव गुणास्तस्येत्याहुः।

तस्य च बन्धहेतुक्लेशाद्यभावेन नित्यमुक्तत्वमुदीरयन्ति। तदुक्तं पतञ्जलिनापि 'क्लेशकर्म्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वर' इति। 'सर्व्वज्ञता तत्रिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्ति' रित्यादिना परमेश्वराङ्गान्यपि प्राहुः।

---

[ गुणलक्षणादिप्रकरणम् ]

गुणत्वजातिप्रवृत्तिनिमित्तकत्वात् गुण इति संज्ञा साङ्केतिकी (१)। गुणलक्षणञ्च यत्किञ्चिद् गुणमादाय एतद्व्यक्तिसमवेत-द्रव्यासमवेतधर्म्मसमवायित्वम्। भवति च एतद्व्यक्तिसमवेता द्रव्यासमवेता गुणत्वजातिः तद्वत्त्वञ्च रूपादाविति लक्षणसङ्गतिः(२)।

द्रव्यासमवेतकर्म्मत्वजातिमति कर्म्मण्यतिव्याप्तिवारणाय एतद्व्यक्तिसमवेतेत्युक्तम्। तथाच कर्म्मत्वस्य

(१) 'साङ्केतिकेव' इति क—पुस्तके पाठः।

(२) 'भवन्ति च.....तद्वत्त्वञ्च रूपादय' इति ख—पुस्तके पाठः।

एतद्व्यक्तिसमवेतत्वाभावान्नातिव्याप्तिः। एतद्व्यक्तिसमवेतसत्तावति द्रव्ये कर्म्मणि चातिव्याप्तिवारणाय द्रव्यासमवेतेतुक्तम्। तथा च सत्ताया द्रव्यासमवेतत्वाभावान्नातिव्याप्तिः।

स च गुणश्चतुर्विंशतिविधः; रूप-रस-गन्ध-स्पर्श-संख्या-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वा-परत्व-बुद्धि-सुख-दुःखे-च्छा-द्वेष-यत्न-गुरुत्व-द्रवत्व-स्नेह-संस्कारा-दृष्ट-शब्दभेदात्। अदृष्टं द्विविधं; धर्म्मोऽधर्म्मश्च। अत एव चतुर्विंशतिः। न च रूपस्य (३) षड्विधत्वमुक्त्वा ऊनविंशत्प्रकारत्वं किं नोक्तमिति स्वतन्त्रेच्छस्य नियन्तुमशक्यत्वात्।

गुणत्वजातीत्यादिः।—एतन्मते रूपादिषु गुणत्वजातेः प्रत्यक्षसिद्धतया नासङ्गतिः। मीमांसकनये तु गुणत्वस्य जातित्वाभावात् गुणसंख्याया न साङ्केतिकत्वम्, परमुपाधिप्रवृत्तिनिमित्तकत्वादेतन्मतसिद्धं नैमित्तिकत्वमेवेति मन्तव्यम्।

रूपरसेत्यादिः।—न च शौर्य्यौदार्य्यकारुण्यदाक्षिण्यादीनामपि लोके गुणतया प्रसिद्धानामतिरिक्तानां सत्त्वात् कथं रूपादयः चतुर्विंशतिरेव गुणा इति चेन्न तेषामत्रैवान्तर्भावात्। तथाहि शौर्य्यं बलवतोऽपि पराजयाय प्रवृत्तसाहः, स च प्रयत्नविशेष एव। सतत सन्मार्गवर्त्तिनी बुद्धिरौदार्य्यं, तच्च बुद्धिविशेष एव। परदुःखप्रहाणेच्छा

(३) 'रसस्य' इति ख—पुस्तके पाठः।

कारणं, तच्च इच्छाविशेष एव। तत्त्वाभिनिवेशिनो बुद्धिर्दोषिणं, तदपि बुद्धिविशेष एव। आत्मन्युत्कर्षप्रत्ययादिरूपा अहङ्कारादयोऽपि यथायथमत्रैवान्तर्भावनीया इति न गुणानां संख्याधिक्यप्रसङ्गः।

अदृष्टमित्यादिः।—ननु गुणत्वसाक्षाद्व्याप्यजातिभिरेव गुणानां विभागस्य औचित्येन मिथ्याज्ञानवासनादिजन्यतावच्छेदकतया सिद्धेन अदृष्टत्वसामान्येनैव अदृष्टस्य विभजनीयतया धर्माधर्मयोरुपग्रहेण चतुर्विंशतिसंख्या गुणानां कथमुपपद्यत इति चेन्न गुणत्वसाक्षाद्व्याप्यजातिभिर्गुणानां विभाज्यत्वनियमे मानाभावात्, अत एव वेगस्थितिस्थापकभावनासु अनुगतसंस्कारत्वजातेर्निष्प्रमाणकत्वेऽपि संस्कारत्वेन रूपेण वेगादीनां विभागो नानुपपन्न इति भावः!

भगवदुदयनानुयायिनस्तु—'न त्वदृष्टत्वं नाम सामान्यमस्ति कार्यकारणलक्षणानां तद्व्यवस्थापकानामभावादिति किरणावली-सन्दर्भं प्रामाण्येन अदृष्टत्वस्य जातित्वं नाभ्युपगच्छन्ति। तन्मते धर्मत्वाधर्मत्वयोरपि गुणत्वसाक्षाद्व्याप्यसामान्यतया न दुष्करः समाधिः। तन्मते संस्कारविभागस्तु चिन्त्य एवेति समासः।

---

[ रूपलक्षणादिप्रकरणम् ]

**रूपत्वादिजातिप्रवृत्तिनिमित्तकत्वात् रूपादिसंज्ञाः साङ्केतिक्यः। रूपलक्षणञ्च चक्षुर्मात्रग्राह्यगुणत्वम्। भवति हि शुक्लादिरूपं चक्षुर्मात्रग्राह्यमिति लक्षण-सङ्गतिः।**

**संयोगादेरपि ग्राह्यगुणत्वात् तत्रातिव्याप्तिवारणाय मात्रपदम्। तथा च संयोगादेस्त्वचोऽपि ग्राह्यत्वेन**

चक्षुर्मात्रग्राह्यत्वाभावात् नातिव्याप्तिरिति। प्रभाया अपि चक्षुर्मात्रग्राह्यत्वात् तत्रातिव्याप्तिवारणाय गुण-पदम्।

ननु चक्षुर्मात्रग्राह्यत्वं चक्षुर्भिन्नाग्राह्यत्वे सति ग्राह्यत्वं, तच्चासिद्धम्; रूपादीनां चक्षुर्भिन्नमनो-ग्राह्यत्वात्। न च चक्षुर्भिन्नबहिरिन्द्रियाग्राह्यत्वे सति ग्राह्यत्वं चक्षुर्मात्रग्राह्यत्वं वाच्यम्; तथा च मनसो बहिरिन्द्रियत्वाभावात् तदादाय नासिद्धिरिति वाच्यम्; तथापि चक्षुर्मात्रेणैव यः संयोगो गृहीतः तत्रातिव्याप्तेः। मैवम्; त्वगग्राह्या सती चक्षुर्ग्राह्या या गुणत्वसाक्षाद्व्याप्यजातिः तद्वत्त्वमित्यत्र तात्-पर्य्यात्। भवति हि रूपत्वं त्वगग्राह्यम्, अथ च चक्षुर्ग्राह्यम् गुणत्वसाक्षाद्व्याप्यजातिश्च, तद्वत्त्वञ्च सर्व्वेष्वेव रूपेष्विति लक्षणसङ्गतिः। संयोगत्वादेस्त्व-गिन्द्रियग्राह्यत्वात् न तदादाय संयोगादावतिव्याप्तिः। त्वगग्राह्यगुरुत्वत्वादिजातिमति गुरुत्वादावतिव्याप्ति-वारणाय चक्षुर्ग्राह्यत्वं विशेषणम्। त्वगग्राह्य-ज्ञानत्वादिजातिमति ज्ञानादावतिव्याप्तिवारणाय चक्षुः-

पदम्। तथा च ज्ञानत्वादेश्चक्षुर्ग्राह्यत्वाभावात् न तदादाय अतिव्याप्तिः।

प्रभाजनकतावच्छेदकप्रभावयवसंयोगनिष्ठवैजात्यस्य त्वगग्राह्यत्वे सति चक्षुर्ग्राह्यत्वात् तदादाय संयोगे अतिव्याप्तिवारणाय साक्षात्पदम्। तथा च तद्वैजात्यस्य गुणत्वसाक्षाद्व्याप्यत्वाभावात् नातिव्याप्तिः। गुणत्वसाक्षाद्व्याप्यत्वं हि गुणत्वव्याप्यजात्यव्याप्यत्वे सति गुणत्वव्याप्यत्वम्। तच्च तद्वैजात्ये नास्ति; तस्य गुणत्वव्याप्या या संयोगत्वजातिस्तद्व्याप्यत्वात् (१)। उक्तादिशा रसादिलक्षणमप्यवसेयम्।

रूपं शुक्लादिभेदेन अनेकविधम् (२)।

रसोऽपि (३) मधुरादिभेदेन षड्विधः। गन्धो द्विविधः; सुरभिरसुरभिश्च। स्पर्शस्त्रिविधः; अनुष्णाशीतोष्णाशीतभेदात्। संख्या एकत्वादिपरार्द्धपर्य्यन्ता अनेकविधा। परिमाणं द्विविधम्; अणुत्वं महत्त्वञ्च। पृथक्त्वम् एकपृथक्त्व-द्विपृथक्त्वादि-

(१) गुणत्वव्याप्यसंयोगत्वजातेस्तद्व्याप्यत्वादिति ख—ग पुस्तक—पाठान्तरम्।

(२) षड्विधमिति पाठान्तरम् क-पुस्तके।

३) रसोऽपि इति पाठान्तरम् क-पुस्तके।

भेदेन अनेकविधम्। संयोगो द्विविधः; कर्म्मजः संयोगजश्च। तत्र घटादिक्रियया घटादीनां पटादिना (४) संयोगः कर्म्मजः कपालादिसंयोगात् घटादिसंयोगः संयोगजश्च। विभागोऽपि द्विविधः; कर्म्मजो विभागजश्च। तत्र घटादिक्रियाजन्यो घटादीनां भूतलादिना विभागः कर्म्मजः, कपालाकाशादिविभागात् घटाकाशादिविभागः विभागजः। परत्वापरत्वे द्विविधे दैशिके कालिके च।

बुद्धिर्द्विविधा; नित्या अनित्या च। तत्र नित्या भागवती बुद्धिः। अनित्या अस्मदादिबुद्धिः। इच्छापि द्विविधा नित्याऽनित्या च। तत्र नित्या भागवतीच्छा, अनित्या अस्मदादीच्छा। द्वेष एक एव; तत्र दुःखादौ द्वेषः तज्ज्ञानमात्रेण, अष्टमीमांसभोजनादौ द्वेषो द्विष्टसाधनताज्ञानात्।

प्रयत्नोऽपि द्विविधः; नित्योऽनित्यश्च। तत्र नित्यो भगवतः, अनित्योऽस्मदादीनाम्। अनित्यप्रयत्नश्च त्रिविधः, प्रवृत्त्याख्यः, निवृत्त्याख्यः, जीवन-

(४) घटादिना इति ख-ग-पुस्तकयोः पाठः।

योनिप्रयत्नश्च। तत्र प्रवृत्तिरिष्टसाधनताज्ञानात्, निवृत्तिरनिष्टसाधनताज्ञानात्, जीवनयोनिः जीवनाज्ज्ञायते। जीवनञ्च शरीरप्राणसंयोगः। द्रवत्वं द्विविधम्; स्वाभाविकं नैमित्तिकञ्च। संस्कारस्त्रिविधः; वेगः, स्थितिस्थापकः, भावना च। तत्र वेगात् गमनादिक्रिया। स्थितिस्थापकात् नमनोन्नमनं वंशादीनाम्। भावनातः स्मरणम्। अदृष्टं द्विविधम् धर्म्माधर्म्मरूपम्।

शब्दोऽपि द्विविधः; वर्णात्मको ध्वन्यात्मकश्च। तत्र ध्वन्यात्मकशब्दस्त्रिविधः; संयोगजः विभागजः, शब्दजश्च। तत्र आद्यो भेरीदण्डसंयोगादितः। द्वितीयो वंशदलद्वयविभागादितः। तृतीयो ध्वनिजः। वर्णात्मकशब्दश्च द्विविधः; संयोगजः, शब्दजश्च। तत्राद्यः कण्ठतालाद्यभिघातात्, द्वितीयः ककारादितः। तत्र कदाचित् ककारः कदाचित् अकारादिरिति नियमार्थं वायुसंयोगनिष्ठवैजात्यानाङ्गीकृत्य कत्वावच्छिन्नं प्रति विजातीयसंयोगत्वेन हेतुत्वमिति रीत्या कार्य्यकारणभावो बोद्धव्यः। तत्र च संयोग-विभाग-बुद्धि-

सुख-दुःख-इच्छा-द्वेष-यत्न-भावना-शब्दानां प्रादेशिकत्वम्। प्रादेशिकत्वञ्च अव्याप्यवृत्तित्वम्।

जन्यानामपेक्षाबुद्धिभिन्नज्ञानेच्छाकृतीनां द्वेष-सुख-दुःख-शब्दानाञ्च आशुविनाशित्वम्। आशुविनाशित्वञ्च तृतीयक्षणावृत्तिध्वंसप्रतियोगित्वम्। अपेक्षाबुद्धिश्च नानैकत्वगोचरज्ञानम्। तस्याश्च द्वौ इति लौकिकप्रत्यक्षानुरोधेन प्राचीनमते चतुर्थक्षणावृत्तिध्वंसप्रतियोगित्वम्। दीधितिकृतां मते तु तस्या अपि तृतीयक्षणावृत्तिध्वंसप्रतियोगित्वम्, द्वाविति-प्रत्यक्षञ्च तन्मते द्वित्वांशे अलौकिकमेवेति।

संयोगविभागयोर्द्विष्ठत्वम्। द्वित्वादीनां व्यासज्य-वृत्तित्वम्। तत्त्वञ्च अनेकपर्य्याप्तत्वम्। पर्य्याप्तिश्च स्वरूपसम्बन्धविशेष इति दिक्।

सामान्यतो गुणलक्षणादिकमुक्त्वा अवान्तरगुणलक्षणादिकं वक्तु-मुपक्रमते रूपत्वेत्यादिना। रूपत्वजातिः सकलरूपानुगता प्रत्यक्ष-सिद्धैव। प्रभाया इत्युपलक्षणम्; रूपत्वस्यापि स्वसंयुक्तसमवेतसमवाय-सम्बन्धेन चक्षुर्मात्रग्राह्यतया तत्रापि प्रसक्तायां अतिव्याप्तेरपोहनीय-त्वात् तदनुल्लेखेन न्यूनत्वापत्तेः।

चक्षुर्मात्रेणैवेति; न तु त्वचापि, सर्व्वस्यैव संयोगस्य चक्षुषा त्वचा च ग्रहणमिति नियमाभावादित्यर्थः। चक्षुर्ग्राह्येति; स्वसंयुक्तसमवेत-

समवायसम्बन्धेनेति शेषः। तदादायेति संयोगत्वादिकमादायेत्यर्थः।

गुरुत्वत्वादीत्यादिः।—तथाहि गुरुत्वस्य तद्गतगुरुत्वत्वजातेश्च अतीन्द्रियतया यथैव त्वगग्राह्यत्वं तथैव चक्षुरग्राह्यत्वमपीति तत्र विशेषदलाभावात् न तदादाय गुरुत्वाद्यतिप्रसङ्ग इति भावः।

त्वगग्राह्यज्ञानत्वादीत्यादिः।—अत्रादिपदेन रसत्वादिकमपि धर्त्तव्यम्; तस्यापि त्वगग्राह्यत्वे सति ग्राह्यत्वात्। निपुणास्तु प्रथमपरिप्राप्तरसाद्यतिप्रसङ्गप्रदर्शनसम्भवे बहिरिन्द्रियागोचरज्ञानाद्यतिप्रसङ्गप्रदर्शनस्य अन्याय्यतया रसाद्यतिप्रसङ्गवारणप्रयोजनकत्वमेव प्रकृते चक्षुःपदसन्निवेशस्य प्रतिपादनीयमिति वदन्ति।

तद्वैजात्यस्येति,—प्रभाजनकतावच्छेदकप्रभावयवसंयोगनिष्ठवैजात्यस्येत्यर्थः। तद्धि गुणत्वव्याप्यमिति साक्षात्पदेन तत्परीहारः।

ये तु गुणगुणिनोरभेदवादिनः रूपद्रव्ययोरभेदमभ्युपगच्छन्ति, तेषां न युक्तः पक्षः; द्रव्यरूपयोः पूर्व्वापरकालभावित्वस्य प्रमाणसिद्धत्वादभेदे तदनुपपत्तेः, यस्योत्पत्तौ यस्यानुत्पत्तिः यन्निवृत्तौ च यस्यानिवृत्तिस्तयोस्तादात्म्यस्य सर्व्वथा बाधितत्वाच्च। दृश्यते हि सत्येव घटादौ वह्निसंयोगादिना विनश्यन्ति तत्र रूपादयः, समुपजायन्ते चान्ये। तदनयो रूपद्रव्ययोरभेद इति न शक्यं वक्तुम्। नचैवं नियमेन अपृथगुपलम्भ एव तयोरभेदसाधक इति वाच्यम्; सर्व्वदैव रूपस्य द्रव्याश्रितत्वेन पृथक्तया अनुपलम्भो, न तु परस्परमभेदेनेत्यादिकमूहनीयम्।

उक्तादिशेति,—रूपलक्षणे चक्षुर्ग्राह्यत्वनिवेशवत् रसादिलक्षणे रसनग्राह्यत्वादिनिवेशेनेत्यर्थः। न तु तत्र तत्रापि मात्रशब्दपरिप्राप्तं त्वगग्राह्यत्वादिकं निवेश्यम्, संयोगादौ रसनग्राह्यत्वरूपविलक्षणधर्म्माभावादेवातिप्रसङ्गाभावादिति। स्पर्शलक्षणे तु त्वङ्मात्रग्राह्यत्वं देयमेव, संयोगादेरपि त्वचा ग्राह्यत्वात्। रसादीत्यादिपदेन शब्दगन्ध-

स्पर्शग्रहणम्, गुणान्तराणां निरुक्तरीत्या लक्षणस्याशक्यवचनत्वादिति। तथा च रसनग्राह्यगुणत्वं रसत्वमितिवत् घ्राणग्राह्यगुणत्वं गन्धत्वमिति लक्षणमवधेयम्। शब्दलक्षणमपि श्रोत्रग्राह्यगुणत्वमिति। स्पर्शलक्षणन्तु चक्षुरग्राह्यत्वे सति त्वग्ग्राह्यगुणत्वम्। रसलक्षणे रसत्वातिव्याप्तिवारणाय गुणपदम्। गन्धलक्षणे गन्धत्वातिप्रसङ्गवारणाय तत्। स्पर्शलक्षणे संयोगाद्यतिप्रसङ्गवारणाय सत्यन्तम्। तथाहि संयोगादिगुणानां चक्षुषापि ग्राह्यत्वात् सत्यन्तदलाभावेन नातिप्रसङ्ग इति भावः। स्पर्शत्वातिव्याप्तिवारणाय तत्र गुणपदम्। शब्दलक्षणे शब्दत्वातिव्याप्तिवारणाय गुणपदम्। न च अगृहीतविनष्टे रसादावव्याप्तिरिति वाच्यम्; रसादिलक्षणेषु ग्राह्यपदेन ग्राह्यतावच्छेदकजातिमतो विवक्षणात्। इत्थञ्च गुणपदमपि तथाविधार्थतात्पर्य्यकमिति मन्तव्यम्; रसत्वादिनात्यतिप्रसङ्गस्य ग्राह्यतावच्छेदकजातिनिवेशेनैव वारणादिति।

रस इत्यादिः।—चित्ररूपवत् अनेकरससमवाय्यवयवारब्धे अवयवेनि चित्ररसस्वीकारस्य अनावश्यकतया षड्विध एव रस इति भावः। गन्ध इत्यादिः।—अत्रापि पूर्ववरीत्या चित्रगन्धानङ्गीकारात् न गन्धस्य आधिक्यमिति।

दैशिके इति।—दिक्कृते दूरत्वसन्निकृष्टत्वलक्षणे। कालिके इति।—कालकृते ज्येष्ठत्वकनिष्ठत्वलक्षणे इत्यर्थः। भागवती परमात्मनि समवेता इत्यर्थः। जन्यमात्रं प्रति अदृष्टस्य कारणतया परमात्मनि अदृष्टाभावेन जन्यज्ञानासम्भवात् तज्ज्ञानस्य नित्यत्वमवधेयम्। तदीक्षणादिश्रुतयश्च तज्ज्ञानसत्त्वे मानम्। अस्मदादिबुद्धिरिति जीवगतं ज्ञानमित्यर्थः।

प्रवृत्तीत्यादिः।—इष्टं सुखं दुःखाभावश्च, तत्साधनता तत्प्रयोजकता। दुःखानुत्पादमुद्दिश्यापि तदुपाये प्रवृत्तिदर्शनेन कारणत्वार्थस्य प्रवृत्ते ग्रहीतुमशक्यत्वात्। बालादयो हि क्षीरपानादिकमिष्ट-

साधनं मत्वैव प्रवर्त्तन्ते, विशेषविदश्च विषपानमनिष्टसाधनं मत्वैव ततो निवर्त्तन्त इति।

अदृष्टमित्यादिः।—सुखकारणताच्छेदकं धर्म्मत्वं जातिः। दुःखकारणतावच्छेदकमधर्म्मत्वं च जातिरिति। अव्याप्यवृत्तित्वं स्वाधिकरणवृत्त्यभावप्रतियोगित्वम्। तथाहि यत्रैवाधिकरणे किञ्चिद्देशावच्छेदेन संयोगः तत्रैवाधिकरणे तटितरदेशावच्छेदेन तदभाव इति संयोगस्य निरुक्तमव्याप्यवृत्तित्वम् न विरुद्धम्। न ह्यस्ति तथा कश्चन संयोगो यः स्वाधिकरणमभिव्याप्य वर्त्तत इति। एवं विभागादयोऽपि बोद्धव्याः। जन्यानामित्यादिः।—ईश्वरीयज्ञानादीनामविनाशितया तत्रातिप्रसङ्गवारणाय जन्यत्वविशेषणम्।

लौकिकेत्यादिः।—तथाहि आदौ अयमेकः अयमेक इत्यपेक्षाबुद्धिः, ततो द्वितीयक्षणे द्वित्वोत्पादः, तृतीयक्षणे द्वित्वद्वित्वे इति निर्विकल्पकज्ञानम्, चतुर्थक्षणे द्वित्वस्य लौकिकप्रत्यक्षम्। यदि साधारणज्ञानवत् अपेक्षाबुद्धिरपि तृतीयक्षणे नश्येत्, तदा अपेक्षाबुद्धिनाशेन द्वित्वादीनामपि नाशात् चतुर्थक्षणे तदभावेन तद्विषयकलौकिकप्रत्यक्षं नोपपद्यते; लौकिकप्रत्यक्षे विषयस्य कार्य्यसहभावेन हेतुतायाः अवश्यमङ्गीकर्त्तव्यत्वादिति अपेक्षाबुद्धेस्तृतीयक्षणपर्य्यन्तस्थायित्वमावश्यकमेवेति भावः।

---

[ कर्म्मलक्षणादिप्रकरणम् ]

**कर्म्मत्वजातिप्रवृत्तिनिमित्तकत्वात् कर्म्मेति संज्ञा साङ्केतिकी। कर्म्मलक्षणञ्च यां काञ्चित् कर्म्मव्यक्तिमादाय एतद्व्यक्तिसमवेत-सत्तेतरधर्म्मसमवायित्वम्। एतद्व्यक्तिसमवेतं सत्तेतरत् कर्म्मत्वम्, तद्वत्त्वञ्च**

गमनादावस्तीति लक्षणसङ्गतिः। एतद्व्यक्तिसमवेतां सत्तामादाय द्रव्यादावतिव्याप्तिवारणाय सत्तेतरत्वं धर्म्मे विशेषणम्।

तच्च पञ्चविधम्; उत्क्षेपणावक्षेपणाकुञ्चनप्रसारण-गमनभेदात्। न च भ्रमणरेचनादिमादाय आधिक्य-मिति वाच्यम्; तेषामपि गमन एव अन्तर्भावात्। यदुक्तं भाष्यकृता(१);—'गमनग्रहणात् भ्रमण-रेचन-स्यदनो-र्द्ध्वज्वलन-तिर्य्यग्गमन-पतन-नमनो-न्नमनादयो गमनविशेषा एवे'ति॥

रूपादिगुण-लक्षणादिनिरूपणानन्तरं कर्म्मनिरूपणमुपक्रमते कर्म्मत्वे त्यादिना। चलतीत्यनुगतप्रतीतिसिद्धा खलु कर्म्मत्वजातिः सकल-कर्म्मसाधारणी। एतद्व्यक्तीत्यादिः,—सत्तेतरत् गुणत्वादिसामान्य-मादाय गुणादावतिव्याप्तिवारणाय एतद्व्यक्तीत्यादि धर्म्मविशेषणम्। तेन गुणत्वादेः एतद्व्यक्तित्वेनाभिमते कर्म्मणि अवृत्तित्वात् न तमादाय अतिव्याप्तिरिति।

उत्क्षेपणीत्यादिः,—उत्क्षेपणं ऊर्द्ध्वदेशगमनानुकूलव्यापारः। अव-क्षेपणं अधोदेशगमनानुकूलव्यापारः। आकुञ्चनं सत्स्वेव अवय-वानामारम्भकसंयोगेषु परस्परमवयवानामनारम्भकसंयोगोत्पादकं वस्त्राद्यवयविकौटिल्योत्पादकं कर्म्म। यतः किल पद्मं सङ्कुचति, वस्त्रं सङ्कुचति, चर्म्म सङ्कुचतीत्यादिप्रत्यया भवन्ति। अवयवानां पूर्व्वोत्पन्नानारम्भकसंयोगविनाशकं कर्म्म प्रसारणं, यतः किल प्रसरति

(१) 'तदुक्तं भाष्ये' इति क—पुस्तके पाठः।

वस्त्रं, प्रसरति चर्म्म, विकाशते पद्ममित्यादिप्रत्यया जायन्ते इति अङ्गरमिश्रमतम्। विषमक्षेपणस्य उत्क्षेपणावक्षेपनान्यतर-स्वरूपतया विषमक्षेपणमात्रस्यैव कर्म्मत्वोपपत्तावपि समक्षेपणस्य कर्म्मत्वोपपत्ता-वन्वेषणीयः समाधिरिति।

ननु उत्क्षेपणादेः गमनानन्तर्भावे कथं कर्म्ममात्रे गच्छतीति व्यवहार उपपद्यतामिति चेन्न कर्म्ममात्रे गच्छतीति व्यवहारस्य गौण-त्वात्। तद्व्यवहारप्रयोजको धर्म्मश्च गौणमुख्यसाधारणः स्वाश्रयसंयोग-विभागासमवायिकारणत्वमेव, तद्धर्म्ममुपादाय मुख्ये गौणे च गमने गच्छतीति व्यवहारोपपत्तिरिति ध्येयम्।

---

[ सामान्यलक्षणादिप्रकरणम् ]

**सामान्यं जातिः। तल्लक्षणञ्च नित्यत्वे सति अनेकसमवेतत्वम्। अनेककपालादिसमवेतघटादा-वतिव्याप्तिवारणाय सत्यन्तम्। गगनपरिमाणादा-वतिव्याप्तिवारणाय अनेकसमवेतेत्युक्तम्(१)। तथा च गगनस्य एकतया गगनपरिमाणादेरनेकसमवेतत्वा-भावात् नातिव्याप्तिरिति भावः(२)।**

**सामान्यं द्विविधं परमपरञ्च। तत्र परं सत्ता महाविषयत्वात्(३)। महाविषयत्वञ्च (४) द्रव्यादि-**

(१) 'अनेकसमवेतत्वमुक्तम्' इति क—पुस्तकपाठः।

(२) 'नातिव्याप्ति' रितेतदन्तः क—पुस्तकपाठः।

(३) 'महाविषयव्यापकत्वा' दिति ग—पुस्तकपाठः।

४) 'महाविषयव्यापकत्वञ्च' इति ग—पुस्तकपाठः

त्रिकवृत्तित्वम्। अपरं द्रव्यत्व-गुणत्व-कर्म्मत्वरूपम् अल्पविषयकत्वात्। अल्पविषयकत्वञ्च द्रव्यादौ कैकमात्रवृत्तित्वम्।

लक्षणतः सामान्यरूपेण अवगतस्यैव विशेषविभागस्य औचित्येन आदौ सामान्यलक्षणं निर्व्वक्ति नित्यत्व इत्यादिना। नित्यत्वमत्र ध्वंसाप्रतियोगित्वं प्रागभावाप्रतियोगित्वं वा, न तु तयोरेकविशिष्टमपरम् गौरवस्य प्रकृते वैयर्थ्यात्।

अत्यन्ताभावस्य नित्यतया अनेकवृत्तितया च तत्रातिव्याप्तिवारणाय वृत्तित्वमात्रमपहाय समवेतत्वपर्य्यन्तानुधावनम्।

अनेकेत्यादिः,—ननु अनेकत्वम् एकभिन्नत्वम्, तस्य च द्रव्यमात्रे अभावात् कथं द्रव्यत्वादेर्जातित्वमुपपद्यते; एकत्वस्य प्रत्येकद्रव्यवृत्तित्वेन कुत्रापि द्रव्ये एकभिन्नत्वस्य उपपादयितुमशक्यत्वादिति चेन्न; अनेकेत्यनेन समवेतत्वे भेदविशिष्टत्वस्य विवक्षितत्वात्। समवेतत्वे भेदविशिष्टत्वञ्च स्वानुयोगिनिरूपितत्व-स्वप्रतियोगिनिरूपितत्वोभयसम्बन्धेन। अनेकवृत्तित्वञ्च स्वाश्रयान्योन्याभावसामानाधिकरण्यमिति किरणावलीप्रकाशे वर्द्धमानोपाध्यायाः।

ननु निरुक्तलक्षणकं सामान्यं कतिविधमित्याकाङ्क्षायामाह सामान्यं द्विविधमिति। परं सत्तेति, मतान्तरे तु परत्वापरत्वयोरधिकदेशवृत्तित्वाल्पदेशवृत्तित्वलक्षणयोरापेक्षिकत्वस्मरणेन यदेव परं तदेव अपरजात्यपेक्षया अपरमपि सम्भवतीति परापरमपि सामान्यं तन्मतसिद्धं प्रतीयते। एतन्मते तु परत्वस्य द्रव्यादित्रिकवृत्तित्वलक्षणतायाः निरुक्तेः एका सत्ताजातिरेव परसामान्यं, न तु द्रव्यत्वादिरपि इति ध्येयम्। अत्र व्यक्तयभेदादीनां जातित्वबाधकतया आकाशत्वादीनां न जातित्वमिति सविस्तरमन्यत्र मृग्यम्।

[ विशेषलक्षणादिप्रकरणम् ]

विशेषपदार्था असंख्याः। ते च नित्यद्रव्यमात्रवृत्तयः। नित्यद्रव्याणि च परमाण्वाकाशकालदिगात्ममनांसि। ते च विशेषा अतीन्द्रियाः। तल्लक्षणञ्च सत्तावद्भिन्नत्वे सति उभयासमवेतत्वे च सति(१) समवेतत्वम्। भवन्ति च विशेषपदार्थाः सत्तावद्भिन्नाः; द्रव्यादीनां त्रयाणामेव सत्तावत्त्वात्, उभयासमवेताश्च(२); यन्नित्यद्रव्यसमवेतो यो विशेषः तस्य तद्व्यक्तिभिन्नासमवेतत्वात्। रूपादौ गुणे कर्म्मणि च उभयासमवेतत्वस्य सत्त्वात् तदतिव्याप्तिवारणाय सत्तावद्भिन्नत्वे सतीत्युक्तम्(३)। तेषां सत्तावत्त्वात् नातिव्याप्तिः। द्रव्यत्वादिजातिषु सत्तावद्भिन्नत्वस्य(४) समवेतत्वस्य च सत्त्वात् तदतिव्याप्तिवारणाय उभयासमवेतत्वे सतीत्युक्तम्(५)। असमवेतेषु अभावादिषु अतिव्याप्तिवारणाय समवेतेत्युक्तम्(६)।

---

(१) 'सद्भिन्नत्वे उभयासमवेतत्वे च सति' इति क—पुस्तकपाठः।

(२) 'उभयासमवेतश्च' इति ग—पुस्तकपाठः।

(३) 'सद्भिन्नत्वं विशेषणमुक्तम्' इति क—पुस्तकपाठः।

(४) 'सद्भिन्नत्वस्य' इति क—पुस्तकपाठः।

(५) 'उभयासमवेतेत्युक्तम्' इति क—पुस्तकपाठः।

(६) अत ऊर्ध्वं 'तेषां समवेतत्वाभावात् नातिव्याप्तिः। द्रव्यादिसमवेतं द्रव्यत्वादि' इति अधिकः पाठः ग—पुस्तके दृश्यते।

उद्देशक्रमप्राप्तं विशेषं निरूपयितुमुपक्रमते विशेषेत्यादिना। ननु विशेषपदार्थः सकलस्वाधिकरणसाधारण एकः अनेको वा इत्याकङ्क्षायामाह असंख्या इति। तथाहि विशेषपदार्थोऽयं प्रतिव्यक्ति भिद्यते, न तु जात्यादिवदेकोऽनेकवृत्तिरिति भावः। नित्यद्रव्याणां निरवयवानाम् अवयवादिना भेदस्य दुष्करत्वात् विशेषोऽयं भेदकः कल्प्यत इति मतम्। नव्यास्तु विशेषस्य कल्पितस्य अनायत्या स्वतोव्यावर्त्तकत्वकल्पनापेक्षया परमाण्वादिनित्यद्रव्याणां स्वतोव्यावर्त्तकत्वमुररीकृत्य विशेषमस्वीकुर्वन्तः पदार्थलाघवमभिप्रयन्ति।

असंख्या इति।—तदुक्तं किरणावल्यामुदयनाचार्यैः,—'विशेषा इति बहुवचनेन आनन्त्यं विवक्षितम्' इति। सेतुटीकायामपि पद्मनाभमिश्राः,—'अत्र विशेषा इति बहुवचनेन विना बाधकमसङ्कुचितेनानन्त्यं विवक्षितम्' इति प्राहुः।

तल्लक्षणञ्चेति।—लक्षणमिदं विशेषस्य परिचायकमात्रम्, प्रकृतलक्षणन्तु विशेषस्य स्वतोव्यावृत्तत्वम्। तच्च स्वभिन्नलिङ्गजन्य-स्वविशेष्यक-स्वसजातीयेतरभेदानुमित्यविषयत्वम्। साजात्यञ्च पदार्थविभाजकोपाधिरूपेण। लिङ्गांशे स्वभिन्नत्वनिवेशात् विशेषमात्रस्यैव-स्वलिङ्गक-स्वसजातीय-विशेषान्तरभेदानुमितिविषयत्वेऽपि नासम्भवः। अनुमितौ स्वविशेष्यकत्वनिवेशात् घटो विशेषाद् भिद्यते कपालसमवेतत्वादित्याद्यनुमितेरपि स्वभिन्नलिङ्गकत्वात् विशेषप्रतियोगिकभेदविधेयकत्वाच्च तादृशानुमितिविषयतायाः स्वस्मिन् सत्त्वेन नासम्भवतादवस्थ्यम्।

उभयासमवेतत्व इति।—तदिदमुभयासमवेतत्वं स्वप्रतियोगिसमवेतत्व—स्वानुयोगिसमवेतत्वोभयसम्बन्धेन भेदविशिष्टान्यत्वम्। विशेषस्य प्रत्येकमेकैकाधिकरणमात्रसमवेतत्वात् तथात्वमुचितमेव।

[ समवायलक्षणादिप्रकरणम् ]

तन्तुसमवेतः पट इत्यादिप्रतीतिसाक्षिकः समवायः। स च एकः। तल्लक्षणञ्च नित्यत्वे सति सम्बन्धत्वम्। भवति च घटादौ घटत्वादिसम्बन्धो नित्य इति लक्षणसङ्गतिः। संयोगस्यापि सम्बन्धत्वात् तत्रातिव्याप्तिवारणाय सत्यन्तम्। तथा च(१) संयोगस्य नित्यत्वाभावात् नातिव्याप्तिः। आकाशादावतिव्याप्तिवारणाय विशेष्यदलम्(२)।

सम्बन्धत्वञ्च अविशिष्टधीनिवर्त्तकत्वे(३)सति विशिष्टधीविषयत्वम्; तदर्थञ्च निर्विकल्पकाविषयत्वे सति विशिष्टज्ञानविषयत्वम्। विशिष्टज्ञानविषये घटादावतिव्याप्तिवारणाय सत्यन्तम्। तथाच तस्य निर्विकल्पकाविषयत्वात् नातिव्याप्तिः। समवायश्च घटघटत्वे इत्यादिनिर्विकल्पकस्य न विषय इति नाव्याप्तिः।

अथोद्देशक्रमप्राप्तं समवायं निरूपयति तन्तुसमवेत इत्यादिना। तथाहि तन्तुपटयोः विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षेण सम्बन्धस्यापि

(१) 'तथाच' इति पाठः क-पुस्तके नास्ति।

(२) 'विशेष्यम्' इति क-पुस्तकपाठः।

(३) 'अविशिष्टधीव्यावृत्तत्वे' इति क-पुस्तकपाठः।

विषयीकरणात् समवायः प्रत्यक्षेणैव प्रमाणेन सिद्ध इत्यायाति। वस्तुतस्तु वैशेषिकनये समवायस्य अतीन्द्रियताया अभ्युपगमात् न तस्य प्रत्यक्षमानसिद्धत्वम्, परमनुमानेनैव तस्य सिद्धिः। तन्मते समवायस्य अतीन्द्रियत्वमित्थमनुमेयं यथा,—समवायोऽतीन्द्रियः नित्यत्वे सति चेतनान्यासमवेतभावत्वादाकाशादिवदिति।

नैयायिकानान्तु मते इन्द्रियसम्बद्धविशेषणतासन्निकर्षेण समवायस्य प्रत्यक्षं भवत्येव वैशेषिकमतसिद्धनिरुक्तातीन्द्रियत्वसाधकानुमानस्य अप्रयोजकत्वात्। समवायो लौकिकप्रत्यक्षविषयः योग्यप्रतियोगिकत्वे सति विशेषणतया योग्यवृत्तित्वात् भूतलादिवृत्तिघटात्यन्ताभावादिवदित्यादेः प्रत्यक्षत्वसाधकानुमानस्य सत्त्वाच्च।

समवायस्य संसर्गतायां 'गुणक्रियादिविशिष्टबुद्धिर्विशेष्यविशेषणसम्बन्धविषया विशिष्टबुद्धित्वात् दण्डी पुरुष इति विशिष्टबुद्धिवत् इत्यनुमानं मानम्। गुणादौ गुणानङ्गीकारेण संयोगस्य द्विष्ठतया तत्र संयोगसंसर्गकल्पनाया एकान्ततोऽसम्भवात्।

स च एक इति।—समवायस्य निरुक्तानुमानेन सिद्धसत्ताकस्य एकत्वे लाघवमेव विनिगमकम्। ननु यदि लाघवादेक एव समवायः, तदा य एव वायौ स्पर्शप्रतियोगिकः समवायः, तस्य एव रूपप्रतियोगिकतया स्पर्शप्रतियोगिकस्य समवायस्य वायौ स्पर्शवत्त्वप्रतीत्यनुरोधेन आवश्यकत्वात् रूपवत्ताप्रतीतिरपि तत्र प्रमा स्यात् इति चेन्न; तत्तत्प्रतियोगिनिरूपितत्वविशिष्टसमवायत्वेन समवायस्य संसर्गताङ्गीकारेण समवायस्य एकत्वेऽपि क्षत्यभावात्।

ननु निरुक्तसमवायलक्षणस्य नित्याभावादिस्वरूपसम्बन्धे अतिव्याप्तिः; तस्य नित्यत्वात् सम्बन्धत्वाच्च इति चेन्न; सम्बन्धांशे नित्यत्वविशेषणवत् नित्याभावादिस्वरूपसम्बन्धातिव्याप्तिवारणाय सम्बन्धप्रतियोग्यनुयोगिभिन्नत्वपर्य्यवसितस्य सम्बन्धिभिन्नत्वविशेषणस्यापि निवेश्य-

त्वात्। नित्याभावादिस्वरूपसम्बन्धस्य लाघवतः प्रतियोग्यनुयोग्यन्तरस्वरूपताया एव कल्पनीयतया निरुक्तातिप्रसङ्गभङ्गात्।

किरणावलीप्रकाशे वर्द्धमानोपाध्यायास्तु, 'जातिशून्यत्वे सति सामान्यत्वविशेषत्वशून्यभावत्वं समवायत्व'मिति लक्षणमभिप्रयन्ति। भगवदुदयनाचार्यास्तु, 'अत एव नित्या प्राप्तिः समवाय इति लक्षणं सूचितं भवतो'ति किरणावलीसन्दर्भेण नित्यत्वादिघटितं निरुक्तं मूललक्षणमेव व्यवस्थापयन्ति।

दीधितिकृतः पुनः स्वीयपदार्थतत्त्वनिरूपणे समवायपदार्थस्य अनेकत्वमेवाङ्गीकुर्वते। अन्यथा जलादौ गन्धादिमत्त्वप्रसङ्गात् एकस्यैव समवायस्य पृथिव्यां जले च सत्त्वात् सम्बन्धसत्त्वस्य च सम्बन्धि सत्त्वनियामकत्वादिति। समवायत्वञ्च सकलसमवायसाधारणमखण्डोपाधिरिति च व्याचक्षते। तदिदमुक्तसमाधानमधस्तादेवेति।

---

[ साधर्म्यवैधर्म्यप्रकरणम् ]

द्रव्यादीनां षण्णां साधर्म्यम् अस्तित्वाभिधेयत्वज्ञेयत्ववाच्यत्वानि। अस्तित्वं विधिमुखप्रत्ययविषयत्वम्, अभावाभावत्वेन प्रतीयमानत्वमिति यावत्(१)। अभिधेयत्वं शाब्दबोधविषयत्वम्। ज्ञेयत्वं ज्ञानविषयत्वम्। वाच्यत्वं अस्माच्छब्दादयमर्थो बोद्धव्य एतादृशेच्छाविषयत्वम् (२)।

---

(१) 'अभावत्वेनाप्रमीयमाणत्वमिति यावत्' इति क-पुस्तकपाठः।

(२) 'एतादृशेच्छाविषयत्व'मिति क-पुस्तकपाठः।

नित्यद्रव्येतराणां षण्णामाश्रितत्वम्। नित्यद्रव्याणामवृत्तित्वात् तदितरत्वं विशेषणम्। द्रव्यादीनां पञ्चानां समवेतत्वम् अनेकत्वञ्च। गुणादीनां पञ्चानां निर्गुणत्वं निष्क्रियत्वञ्च। निर्गुणत्वञ्च गुणवद्वृत्तिरूपावृत्तिजातिशून्यत्वम्। निष्क्रियत्वञ्च क्रियावद्वृत्तिरूपावृत्तिजातिशून्यत्वम्, अत उत्पत्तिकालावच्छिन्ने(३)द्रव्ये नातिव्याप्तिः। सामान्यादीनां त्रयाणां जातिशून्यत्वम्।

द्रव्यादीनां त्रयाणां सत्तावत्त्वम्, अपरसामान्यवत्त्वञ्च। अर्थाभिधेयत्वं अर्थपदबोध्यत्वेन वैशेषिकपरिभाषाविषयत्वं तदर्थः।

पृथिव्यादीनां नवानां द्रव्यत्वजातिमत्त्वम्। पृथिव्यप्तेजोवायुमनसां मूर्त्तत्वं परत्वापरत्वे च। मूर्त्तत्वञ्च अवच्छिन्नपरिमाणवत्त्वम्, क्रियासमवायिकारणतावच्छेदकतया सिद्धो जातिविशेष इति नव्याः।

पृथिव्यप्तेजोवायवाकाशानां भूतत्वं इन्द्रियात्मकत्वं बहिरिन्द्रियग्राह्यविशेषगुणवत्त्वञ्च(४)। तत्र भूतत्वं

(३) 'उत्पत्तिकालावच्छेदेन' इति क-पुस्तकपाठः।
(४) 'विभिन्नबहिरिन्द्रिये'त्यादिः क-पुस्तकपाठः।

न जातिः ; मूर्त्तत्वेन साङ्कर्य्यात् । तथाहि भूतत्वाभाववति मूर्त्तत्वं मनसि, मूर्त्तत्वाभाववति भूतत्वमाकाशे, तदुभयसामानाधिकरण्यञ्च पृथिव्यादाविति

साङ्कर्य्यलक्षणं हि परस्परात्यन्ताभावसमानाधिकरणत्वे सति परस्परसामानाधिकरण्यम् ।

अपि तु भूतपदशक्यत्वम् (५)। पृथिव्या घ्राणेन्द्रियस्वरूपत्वम् । जलस्य रसनेन्द्रियस्वरूपत्वम् । तेजसश्चक्षुरिन्द्रियस्वरूपत्वम् । वायोस्त्वगिन्द्रियस्वरूपत्वम् । आकाशस्य श्रोत्रेन्द्रियस्वरूपत्वम् । श्रोत्रत्वञ्च कर्णशष्कुल्यवच्छिन्ननभोभागत्वम्(६)। पृथिव्या घ्राणस्वरूपबहिरिन्द्रियग्राह्यगन्धरूपविशेषगुणवत्त्वम् । जलस्य रसनारूपबहिरिन्द्रियग्राह्यरसस्वरूपविशेषगुणवत्त्वम् । तेजसश्चक्षुःस्वरूपबहिरिन्द्रियग्राह्यरूपस्वरूपविशेषगुणवत्त्वम् । वायोस्त्वगिन्द्रियस्वरूपबहिरिन्द्रियग्राह्यस्पर्शरूपविशेषगुणवत्त्वम् । आकाशस्य श्रोत्ररूपबहिरिन्द्रियग्राह्यशब्दरूपविशेषगुणवत्त्वम् ।

---

(५) 'भूतपदशक्यतावच्छेदकत्वम्' इति ग-पुस्तकपाठः ।

(६) 'कर्णशष्कुल्यवच्छिन्नाकाशत्वम्' इति क-पुस्तकपाठः ।

पृथिव्यप्तेजसां वहिरिन्द्रियग्राह्यत्वम्। पृथिवाप्-तेजोवायवाकाशात्मनां विशेषगुणवत्त्वम्। कालदिङ्-मनसां विशेषगुणशून्यत्वम्। पृथिवीजलयोर्गुरुत्वं रसवत्त्वञ्च।

पृथिव्यामेव गन्धः। स्नेहोऽम्भस्येव। एवमनात् स्वयमूहनीयम्।

यस्य यत् साधर्म्यम्, तदभावः तस्य वैधर्म्यम्। एवं यस्य यत् नास्ति, तत्तस्य वैधर्म्यम्।

इति भावपदार्थनिरूपणम्।

अथ समवायान्तभावपदार्थनिरूपणं कृत्वा सम्प्रति तेषां भाव-पदार्थानां विशेषधर्म्मप्रतिपत्तये साधर्म्यवैधर्म्यनिरूपणमुपक्रमते द्रव्या-दीनामित्यादिना।

अस्तित्वमित्यादिः।—ननु अस्तित्वं यदि विधिमुखप्रत्ययविषयत्वं, तदा अभावस्य अधिकरणस्वरूपतानये अभावस्यापि तथाप्रत्यय-विषयत्वस्य अक्षतनतया अभावातिप्रसङ्गः कया रीत्या वारणीय इति चेन्न; तन्मते अभावस्य भावानतिरिक्ततया अतिप्रसङ्गस्यैवाभावात्।

सूत्रिकारास्तु, षष्ठामित्यस्य उपलक्षणतया अभावस्यापि अस्ति-त्वादिकं साधर्म्यमङ्गीकुर्व्वाणाः अस्तित्वं स्वरूपसत्त्वं तच्चोभयावृत्ति-धर्म्मवत्त्वमित्याहुः। वस्तुतस्तु, उद्दिष्टानामेव साधर्म्यकथनस्य औचि-त्येन अभावस्य अनुद्दिष्टस्य साधर्म्यकथनमसङ्गतमिति भावमात्रस्य साधर्म्यमेव विधिमुखप्रत्ययविषयत्वलक्षणमस्तित्वमभ्युपेयमिति भावः।

नित्यद्रव्येतराणामिति।—नित्यद्रव्येतराणि परमाणवाकाशादि-

भिन्नानि। आश्रितत्वमिति कालिकसम्बन्धभिन्नसम्बन्धेन वृत्तित्वम् अन्यथा कालस्य जगदाधारतया नित्यद्रव्याणामपि कालिकेन वृत्तेरति प्रसङ्गस्य दुर्वारत्वात्। अवृत्तित्वादिति निरुक्तसम्बन्धेन वृत्तित्वविरह दित्यर्थः।

समवेतत्वमिति समवेतवृत्तिपदार्थविभाजकोपाधिमत्त्वमित्यर्थः अन्यथा द्रव्यान्तर्गतस्य परमाण्वादेरसमवेतत्वेन अव्याप्तिप्रसङ्गात् अनेकत्वञ्चेति।—अत्र भाववृत्तित्वं विशेषणमुपादेयम्; अन्यथा अभाव स्यापि अनेकत्वेनातिप्रसङ्गात्। निष्कर्षे तु अनेकभाववृत्तिपदार्थ विभाजकोपाधिमत्त्वम् साधर्म्यं, तेन एकैकस्य घटादेः भाववृत्त्यनेकत्व भावेऽपि तादृशस्य द्रव्यत्वादेस्तत्र सत्त्वेन नाव्याप्तिरिति।

गुणवदित्यादिः।—अत्रापि अभावातिप्रसङ्गभङ्गाय तादृशजाति शून्यभावत्वमर्थः। जातिशून्यत्वमात्रोक्तौ गुणकर्म्मणोरव्याप्तिः। रूप वृत्तिजातिशून्यत्वोक्तौ रसादौ गुणे कर्म्मणि चाव्याप्तिरिति गुणवदित्यादौ गौरवानुसरणमावश्यकमेव। गुणवद्वृत्तिजातिः सत्ता, तच्छून्यत्व गुणकर्म्मणोरभावादव्याप्तिवारणाय रूपावृत्तोरपि। तथाच गुण वद्वृत्तिः रूपावृत्तिश्च जातिः द्रव्यत्वघटत्वादिः तच्छून्यत्वस्य गुणाद वच्चततया साधर्म्यसङ्गतिः।

क्रियावदित्यत्रापि तथा समनुसन्धेयम्। अत इत्यादिः।—उत्पत्ति कालावच्छेदेन द्रव्ये घटादौ यथाश्रुतनिर्गुणत्वनिष्क्रियत्वयोः गुणाभाव वत्त्वक्रियाभाववत्त्वलक्षणयोः सत्त्वेऽपि तादृशजातेर्द्रव्यत्वस्य अपोहिर मग्रक्यतया नातिप्रसङ्ग इति भावः।

जातिशून्यत्वमित्यस्य जातिशून्यभावत्वमर्थः। अन्यथा पूर्ववद भावेष्वतिप्रसङ्गापत्तेः। जातिशून्यत्वञ्च समवायसम्बन्धावच्छिन्नप्रति योगिताकजातिसामान्याभाववत्त्वम्; अन्यथा स्वरूपादिसम्बन्धावच्छिन्न प्रतियोगिताकजात्यभावस्य समवायेन जातिविशेषाभावस्य वा द्रव्यादावपि सत्त्वेन अतिप्रसङ्गस्य दुर्निवारत्वात्।

सत्तावत्त्वमिति ।—सत्तावत्त्वमपरसामान्यवत्त्वमपि द्रव्यादीनां समवायेन बोध्यम् ; अन्यथा कालिकेन ध्वंसातिव्याप्तेः । भावत्वोपादाने तु सम्बन्धविशेषो न निवेश्यः । सत्तावत्त्वमित्यस्य सत्तासम्बन्धित्वार्थकत्वे पुनर्भावत्वोपादानेऽपि अभेदादिसम्बन्धेन सत्ताद्यतिप्रसङ्गवारणाय सम्बन्धविशेषः सन्निवेश्य एवेति ध्येयम् ।

वहिरिन्द्रियेतरादिः ।—विशेषगुणवत्त्वमात्रस्य ग्राह्यविशेषगुणवत्त्वमात्रस्य वा आत्मनि अतिव्यापकतया वहिरिन्द्रियग्राह्येति विशेषगुणविशेषणम् ।

सार्ङ्क्यादिति ।—सार्ङ्क्यस्य वक्ष्यमाणलक्षणस्य व्यक्त्यभेदादेश्च जातिवाधकत्वमभ्युपगच्छन्ति प्राञ्चः । तदुक्तं 'व्यक्तेरभेदस्तुल्यत्वं सङ्करोऽथानवस्थितिः । रूपहानिरसम्बन्धो जातिवाधकसंग्रहः' । इति । तद्विवृतिस्तु अस्मदीयजातिवाधकविचारग्रन्थे द्रष्टव्या ।

घ्राणस्वरूपेतरादिः ।—इदं स्वरूपकथनमात्रम् ।

पृथिव्यामेवेतरादिः ।—अत्र एवशब्दस्य इतरव्यावर्त्तकत्वार्थकत्वेन गन्धः पृथिवीतरावृत्तित्वे सति पृथिवीवृत्तिरित्यर्थलाभात् स्नेह इतरादावपि स्नेहः अम्भोभिन्नावृत्तित्वे सति अम्भोवृत्तिरित्यर्थलाभात् वैधर्म्यप्रकथनमपि प्रकृते ग्रन्थकृदभिमतं प्रतिभाति । वस्तुतस्तु 'यदेव यस्य साधर्म्यं तदेव तदितरावृत्तित्वेन वैधर्म्यमपि' इति जगदीशादिस्वरसेन एवशब्दानुपादानेऽपि प्रकृतवैधर्म्यलाभसम्भवे व्यर्थमेवशब्दोपादानमिति, परन्तु इतरव्यावर्त्तकस्य सकलतद्वृत्तिधर्म्यस्य लक्षणत्वेन एवशब्दवशात् गन्धस्य इतरव्यावर्त्तकतायाः पृथिवीपदेन च सकलपृथिव्या लाभेन गन्धादेः लक्षणपरत्वमुदीरयन्ति ।

[ अभावलक्षणादिप्रकरणम् ]

अभावत्वञ्च द्रव्यादिषट्कभिन्नत्वम्(१)अखण्डोपाधिर्वा। अभावो द्विविधः संसर्गाभावोऽन्योन्याभावश्च। तत्र तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगिताकाभावत्वं संसर्गाभावत्वम्। भवति च संयोगादिसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावादिः(२)तादात्म्यसम्बन्धानवच्छिन्नप्रतियोगिताक इति लक्षणसङ्गतिः।

स च संसर्गाभावस्त्रिविधः, अत्यन्ताभावः ध्वंसः प्रागभावश्च। तत्र त्रैकालिकसंसर्गाभावोऽत्यन्ताभावः। यथा घटादौ पटत्वाद्यभावः (३)। तन्मते यत्किञ्चिद्रक्ताध्वंसवति यत्किञ्चिद्रक्तप्रागभाववति (४) श्यामघटादौ न रक्तात्यन्ताभावः; त्रैकालिकत्वाभावात्। न चैवं तद्घटे श्यामत्वदशायां (५) इदानीं रक्तं रूपं नास्तीति प्रतीतिः प्रमा न स्यात् (६) इति वाच्यम्;

---

(१) 'षड्भिन्नत्व'मिति क—पुस्तकपाठः।

(२) 'प्रतियोगिघटाभावादिः' इति ग—पुस्तकपाठः।

(३) 'पटत्वाभाव' इति ग—पुस्तकपाठः।

(४) 'यत्किञ्चित्प्रागभावे'ति ग—पुस्तकपाठः।

(५) 'श्यामरूपदशाया'मिति क—पुस्तकपाठः।

(६) 'प्रत्ययो न स्यात्' इति क—पुस्तकपाठः।

इष्टत्वात्। तत्र तादृशप्रतीतेर्भ्रमत्वात्। प्रतियोगिन इव ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वेन तत्र रक्तात्यन्ताभावाभावादिति प्राञ्चः।

दीधितिकृतस्तु ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वे मानाभावात् तत्र रक्तात्यन्ताभावसत्त्वात् तादृशप्रतीतिः प्रमा एव। न च तस्य त्रैकालिकत्वाभावात् कथमत्यन्ताभावत्वम् इति वाच्यम्; त्रैकालिकाभावोऽपि नात्यन्ताभावः, अपि तु तादात्म्येतरसम्बन्धावच्छिन्नप्रतियोगिताकाभावः। न चैवं रक्तदशायामपि रक्तरूपं नास्तीति प्रतीतिः प्रमा स्यात्, तदापि रक्तात्यन्ताभावसत्त्वादिति वाच्यम्; तस्य सामयिकात्यन्ताभावत्वात्। सामयिकात्यन्ताभावश्च नातिरिक्तः, किन्तु अत्यन्ताभावस्य समयावच्छिन्नत्वमेव (७) स्वीक्रियत इति।

ध्वंसप्रागभावप्रतियोगितयोश्च न सम्बन्धावच्छिन्नत्वं मानाभावादिति न ध्वंसप्रागभावयोरतिव्याप्तिः।

ध्वंसप्रतियोग्यभावः प्रागभावः। ध्वंसात्यन्तान्योन्याभावानां ध्वंसविरहादेव न तत्रातिव्याप्तिः।

---

(७) 'समयविशेषावच्छिन्नमेव' इति ग—पुस्तकपाठः।

प्रागभाव एव ध्वंसप्रतियोगी। प्रागभाव एव नष्ट इति प्रतीतेः तत्र लक्षणसङ्गतिः। (८)

नष्ट इति प्रतीतिसाक्षिकोऽभावो ध्वंसः। तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावोऽन्योन्याभावः; घटः पटो न इत्याकारप्रतीतिसाक्षिकः। तादात्म्यञ्च तद्वृत्तिरसाधारणो धर्म्मः।

प्राभाकरास्तु—नातिरिक्ताभावं स्वीकुर्व्वन्ति, वदन्ति च अधिकरणस्वरूपम्। भूतले घटो नास्तीति प्रतीतिस्तु भूतलाधिकरणमेव विषयीकरोति इति वदन्ति। तदसत् अधिकरणानामननुगतत्वात् पटो नास्तीत्यननुगतप्रतीत्यनुपपत्तेः, मुक्तेश्च तत्त्वज्ञानजन्यत्वं न स्यात्; चरमदुःखध्वंसरूपमुक्तेरात्मस्वरूपत्वात्, आत्मनश्च नित्यत्वादिति दिक्।

भावपदार्थान् निरूप्य अभावं निरूपयितुमाह अभावत्वञ्चेत्यादि। अभावोऽपि यथा वैशेषिकाणामभिमतः पदार्थस्तथोक्तमधस्तात्।

तत्र तादात्म्येत्यादिः।—संसर्गाभावत्वं संसर्गारोपजन्यप्रतीतिविषयाभावत्वमिति केचिदाहुः।

प्रतियोगिन इत्येवादिः।—इममेव विरोधमधिकृत्य अत्यन्ताभावस्य ध्वंस-प्रागभाव-स्वप्रतियोगित्रितयप्रतियोगिकत्वमभ्युपयन्ति। अत एव

(८) 'ध्वंसात्यन्तान्योन्याभावाना'मित्यत आरभ्य 'लक्षणसङ्गति'रित्यन्तग्रन्थः क—पुस्तके नास्ति।

रक्तरूपप्रागभावदशायां श्यामरूपध्वंसदशायाञ्च घटादौ न रक्तश्यामयोरत्यन्ताभावः। तदानीं प्रतीयमानस्य च रक्तं नास्ति इत्याद्यभावस्य रक्तप्रागभावश्यामध्वंसावगाहित्वमेवेति वदन्ति।

न सम्बन्धावच्छिन्नत्वमिति।—अत एव ध्वंसप्रतियोगितायाः प्रागभावप्रतियोगितायाश्च अवच्छेदकसम्बन्धाभावात्, तादात्म्येतरसम्बन्धावच्छिन्नत्वविरहेण नातिप्रसङ्ग इत्यर्थः। ये तु ध्वंसप्रागभावयोरुत्तरकालपूर्वकालावेव प्रतियोगितावच्छेदकसम्बन्धाविति वदन्तः संसर्गारोपजन्यप्रतीतिविषयाभावत्वं संसर्गाभावत्वमिति लक्षणमुपपादयन्ति, तेषां नित्यसंसर्गाभावत्वमत्यन्ताभावत्वमित्यत्यन्ताभावलक्षणे निर्भर इति मन्तव्यम्।

ध्वंसप्रतियोग्यभाव इति।—ननु ध्वंसत्वं जन्याभावत्वं, जन्यत्वं प्रागभावप्रतियोगित्वम्, प्रागभावत्वञ्च विनाश्यभावत्वम्; तदेवमन्योन्याश्रयदोषः कथं वार्य्यतामिति चेन्न प्रकृते ध्वंसत्वस्य अन्यथा निर्व्वच्यमाणत्वात्। जन्यत्वस्य वा प्रागभावप्रतियोगित्वलक्षणस्य अनुपादानेन स्वरूपसम्बन्धविशेषरूपस्याभ्युपगमादिति ध्येयम्।

अधिकरणानामित्यादिः।—अभावस्य तत्तदधिकरणस्वरूपत्वे गौरवात् तदपेक्षया एकस्य अतिरिक्तस्य अभावस्य स्वीकार एव लाघवम्। किञ्च रूपादौ वर्त्तमानस्य गन्धाद्यभावस्य रूपादिस्वरूपत्वे घ्राणादिना तत्प्रत्यक्षमपि नोपपद्यते; रूपादीनां घ्राणाद्यग्राह्यत्वात्। अतिरिक्तस्य अभावस्य अङ्गीकारे तु यः प्रतियोगी यदिन्द्रियग्राह्यः तदभावोऽपि तदिन्द्रियग्राह्य इति नियमेन घ्राणादिना गन्धाभावादेर्ग्रहणमुपपन्नं भवतीति भावः।

मुक्तेश्चेत्यादिः।—चरमदुःखध्वंसस्य स्वाधिकरणानात्मकत्वे ध्वंसाभावस्य जन्याभावरूपत्वेन तत्त्वज्ञानजन्यत्वमुपपद्यत एवेति भावः। चरमदुःखध्वंसश्च स्वसमानाधिकरण-दुःखप्रागभावासमानकालीन-दुःखध्वंस इत्यभियुक्ताः।

[ प्रमाणसामान्यप्रकरणम् ]

प्रेक्षावतां शास्त्रप्रवृत्तिर्मुक्तिरूपेष्टसाधनताज्ञानात्। शास्त्रस्य मुक्तिसाधनत्वं तत्त्वज्ञानप्रतिपादनद्वारा। तच्च तत्त्वज्ञानं प्रमाणाधीनमिति प्रमाणं निरूप्यते।

तल्लक्षणञ्च प्रमायाः करणत्वमिति (१)। भवति च इन्द्रियादिः घटादिप्रमायाः करणमिति लक्षण-समन्वयः।

ननु प्रमैव न ज्ञायते कथं प्रमाकरणत्वं (२) ज्ञातव्यम्; विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात्? उच्यते;—यथार्थानुभवः प्रमा। यथार्थत्वञ्च तद्वति तद्वगाहित्वम्। अनुभवत्वञ्च स्मृतिभिन्न-ज्ञानत्वं, जातिविशेषो वा। तथा च तद्वति तद्व-गाहित्वे सति अनुभवत्वं प्रमात्वमिति फलितार्थः। भवति च रजते रजतत्वज्ञानं(३)रजतत्ववति रजतत्वा-वगाहीति लक्षणसङ्गतिः। शुक्तौ रजतत्वमिति भ्रमस्य अनुभवतया तदतिव्याप्तिवारणाय सत्यन्तम्। तथाहि

---

(१) 'प्रमाकरणत्व'मिति क—पुस्तकपाठः।

(२) 'प्रमाकरण'मिति ग—पुस्तकपाठः।

(३) रजतमितिज्ञान'मिति क—पुस्तकपाठ'।

उक्तभ्रमस्य रजतत्ववति (४) रजतत्वावगाहित्वाभावात् न तत्रातिव्याप्तिः ।

नचैवं मूले वृक्षः कपिसंयोगीति प्रतीतिः प्रमा स्यात्, तस्याः कपिसंयोगवति वृक्षे कपिसंयोगावगाहित्वादिति वाच्यम् ; दृष्टत्वात् । तत्र कपिसंयोगनिष्ठमूलावच्छेद्यत्वप्रतीतिर्न प्रमा (५) कपिसंयोगे मूलावच्छेद्यत्वविरहेण मूलावच्छेद्यत्ववति मूलावच्छेद्यत्वप्रकारकत्वाभावात् । रजतमिति स्मरणस्यापि रजतत्ववति रजतत्वप्रकारकत्वात् तत्रातिव्याप्तिवारणाय अनुभवपदम् । तथाच स्मृतिभिन्नज्ञानत्वरूपानुभवत्वस्य स्मृतावभावात् नातिव्याप्तिः (६) ।

ननु किं नाम करणत्वम् ? उच्यते ;—व्यापारवत्कारणत्वं करणत्वम् । व्यापारत्वञ्च तज्जन्यत्वे सति तज्जन्यजनकत्वम् । भवति च भ्रमिर्दण्डजन्या(७) दण्डजन्यघटजनिका च इति दण्डस्य व्यापारो भ्रमिः,

---

(४) 'रजतत्वानवगाहित्वात्' इति क—पुस्तकपाठः ।

(५) 'मूलनिष्ठकपिसंयोगावच्छेद्यत्वप्रतीतिस्तु न प्रमा' इति क-पुस्तकपाठः ।

(६) 'न तत्रातिव्याप्ति'रिति क-पुस्तकपाठः ।

(७) 'दण्डजन्या सती इति' क-पुस्तकपाठः ।

तद्वत् कारणं दण्डो घटस्य करणमिति। घटं प्रति कपालसंयोगस्य हेतुत्वात् तत्रातिव्याप्तिवारणाय व्यापारवत्त्वं विशेषणम्(८); तथाच तस्य चरमकारणतया व्यापाराभावात् न तत्रातिव्याप्तिः।

करणत्वञ्च द्विविधं फलोपधायकत्वं स्वरूपयोग्यत्वञ्च। तत्र फलोपधायकत्वम् अव्यवहितपूर्ववर्त्तितासम्बन्धेन फलवत्त्वम्। तच्च येन दण्डेन घटो जनितः, तत्रैवास्ति, नत्वरण्यस्थदण्डादौ।

स्वरूपयोग्यत्वञ्च करणतावच्छेदकधर्म्मवत्त्वम्, तच्च अरण्यस्थदण्डादावपि; तत्र करणतावच्छेदकस्य (९) दण्डत्वस्य सत्त्वात्।

फलायोगानवच्छिन्नत्वमेव(१०)करणत्वम्, तच्च येन येन फलमुत्पाद्यते(११) तत्रैव तिष्ठति इति मीमांसकाः। शिवादित्यमिश्रास्तु करणत्वमखण्डोपाधि (१२) मङ्गौ चक्रुः।

---

(८) 'कारणविशेषणम्' इति क-पुस्तकपाठः।

(९) 'करणतावच्छेदकधर्म्मस्य' इति क-पुस्तकपाठः।

(१०) 'फलायोगव्यवच्छिन्नत्वमेव' इति क-पुस्तकपाठः।

(११) 'फलमुत्पद्यते' इति ग-पुस्तकपाठः।

(१२) 'करणत्वमखण्डोपाधिकमङ्गीचक्रु'रिति ग-पुस्तकपाठः।

अथ अभावान्तान् पदार्थान् निरूप्य सामान्यतः प्रमाणनिरूपणमुपक्रमते प्रेक्षावतामित्यादिना। प्रेक्षावताम् 'यस्यामुत्पद्यमानायामविद्या नाशमश्नुते। विवेककारिणी बुद्धिः सा प्रेक्षेत्यभिधीयते'। इत्युक्तलक्षणबुद्धिविशेषशालिनामित्यर्थः।

मुक्तीति—साचेयं चरमदुःखध्वंसरूपेति निरुक्तमधस्तात्।

इन्द्रियादिरित्यादिपदात् व्याप्तिज्ञानमात्रपरिग्रहः; वैशेषिकमते शब्दादीनामतिरिक्तप्रमाणताविरहेण शब्दादीनां प्रमाणपदाप्रतिपाद्यत्वात्। अथवा तच्च प्रमाणं चतुर्विधमिति वक्ष्यमाणाभ्युपगमवादमधिकृत्य आदिपदेन अनुमानोपमानशब्दरूपाणां त्रयाणामेव उपादानमिति वदन्ति।

तद्वतीत्यादिः।—तद्वतीति सप्तम्यर्थौ विशेष्यत्वं, तदवगाहित्वमिति तत्प्रकारकत्वमित्यर्थः। तथाच तद्वद्विशेष्यकतत्प्रकारकत्वमेव यथार्थत्वमिति फलितम्। अस्यानुगमस्तु प्रकारतावैशिष्टविशेष्यताकत्वम्, विशेष्यतायां प्रकारतावैशिष्ट्यञ्च स्वनिरूपकज्ञानीयत्वस्वविशिष्टनिरूपकतानिरूपिताधिकरणतावद्वृत्तित्वे तदुभयसम्बन्धेन। निरूपकतायां स्ववैशिष्ट्यञ्च स्वमामानाधिकरण्य-स्वानवच्छेदकानवच्छिन्नत्व-स्वानवच्छेदकानवच्छिन्नत्वसम्बन्धावच्छिन्नाधेयत्व-स्वावच्छेदकसम्बन्धावच्छिन्नत्वे तच्चतुष्टयसम्बन्धेन।

स्मृतिभिन्नेति।—स्मृतिकरणस्य अनुभवस्य प्रसक्तेन प्रमाणान्तरत्वेन प्रमाणसंख्याधिक्यवारणाय ज्ञाने स्मृतिभिन्नत्वविशेषणम्।

शुक्ताविति।—ननु रजतभिन्नसामान्यविशेषकेष्वेव रजतत्वप्रकारकानुभवेष्वतिव्याप्तिसम्भवे शुक्ताविति विशेषेण विशेषोपादानाद् प्रन्थस्य न्यूनत्वमिति चेन्न तत्र शुक्तिपदस्यैव रजतभिन्नमात्रोपलक्षणत्वाद् इति।

भ्रमस्येति।—भ्रमत्वञ्च तदभाववति तत्प्रकारकज्ञानत्वम्; प्रकृते अनुभवत्वनिवेशे प्रयोजनाभावात्। सामान्यतः प्रमालक्षणे-

ऽपि इत्यमेव अनुभवत्वमनिवेश्य ज्ञानत्वमात्रं निवेशनीयमिति ध्येयम्

चरमकारणतयेति ।—स्वीयचरमकारणत्वञ्च स्वकारणविशिष्टान कारणत्वम् । वैशिष्ट्यञ्च पूर्व्वत्वसम्बन्धेन । तथा च निरुक्तसंयोगस अनन्तरं कस्यापि घटकारणस्यानुत्पत्त्या तादृशं चरमकारणत्वमक्ष मेवेति भावः ।

अव्यवहितपूर्व्ववर्त्तितेति ।—तादृशसम्बन्धश्च स्वप्रागभावाधिकरण समयप्रागभावानधिकरणत्वे सति स्वप्रागभावाधिकरणक्षणवृत्तित लक्षणः ।

---

[ कारणलक्षणादिप्रकरणम् ]

ननु किं नाम कारणत्वमिति चेत्; उच्यते;— अनन्याथासिद्धनियतपूर्व्ववर्त्तित्वम् । अनन्याथासिद्ध सन् यः कार्य्यस्य नियतपूर्व्ववर्त्ती तत्त्वं कारणत्व मित्यर्थः । भवति च दण्डादिर्घटं प्रति अनन्याथा सिद्धः घटस्य नियतपूर्व्ववर्त्ती च इति दण्डादिर्घट कारणमिति । दण्डरूपस्यापि घटनियतपूर्व्ववर्त्तित्वात तत्रातिव्याप्तिवारणाय अनन्याथासिद्धत्वमिति विशेषण

तथाच दण्डरूपस्य घटं प्रति अनन्याथासिद्धत्वात

न तत्रातिव्याप्तिः। घटस्यापि स्वं प्रति अनन्याथासिद्धत्वात् तत्रातिव्याप्तिवारणाय विशेष्यपदम्। तथाच घटस्य स्वं प्रति नियतपूर्ववर्त्तित्वाभावात् न तत्रातिव्याप्तिः।

नचोक्तातिव्याप्तिवारणाय पूर्ववर्त्तित्वमेवास्तां, किं नियतपदेनेति वाच्यम्;—रासभादेरपि क्वचित् घटपूर्ववर्त्तित्वसम्भवात् तत्रातिव्याप्त्यापत्तेः। तथाच अस्य नियतपूर्ववर्त्तित्वाभावात् न तत्रातिव्याप्तिः।

अनन्याथासिद्धत्वञ्च अन्याथासिद्धिरहितत्वम्। अन्याथासिद्धिस्तु पञ्चविधा (१);—

एका कल्पितनियतपूर्ववर्त्तिन एव कार्य्यसम्भवे तत्सहभूतत्वरूपा; अस्ति च घटं प्रति दण्डरूपादेः तथात्वम्। घटं प्रति कल्पितनियतपूर्ववर्त्तित्वात् दण्डादेः घटरूपकार्य्योत्पत्तिसम्भवात् दण्डसहभूतत्वस्य दण्डकालीनत्वरूपस्य (२) दण्डरूपादौ सत्त्वात्।

अपरा च अन्यं प्रति पूर्ववर्त्तित्वं गृहीत्वा एव यं प्रति यस्य पूर्ववर्त्तित्वं गृह्यते, तं प्रति तस्य

(१) 'पञ्चधा' इति ग-पुस्तकपाठः।

(२) 'दण्डकालीनत्वरूपस्य' इति ग-पुस्तके नास्ति।

अनन्यथासिद्धत्वम् (३)। यथा घटं प्रति आकाशस्य शब्दजनकत्वेन अनन्यथासिद्धत्वम्; शब्दरूपमनां प्रति आकाशस्य पूर्ववर्त्तित्वं गृहीत्वैव घटं प्रति पूर्ववर्त्तित्वग्रहात्।

अन्या च अनन्यथासिद्धिः जनकजनकत्वेन (४); यथा घटं प्रति कुलालपितुः।

अन्या च अनन्यथासिद्धिः कारणतावच्छेदकत्वेन; यथा घटं प्रति दण्डत्वादेः।

अन्या च व्यापकधर्म्मवत्त्वेन (५); यथा घट प्रति कपालस्य द्रव्यत्वेन; द्रव्यत्वस्य कपालत्वव्यापकत्वादिति।

ननु घटम्प्रति दण्डस्य कारणत्वं न स्यात्; घटनियतपूर्ववर्त्तित्वं हि घटाव्यवहितप्राक्क्षणवृत्त्यत्यन्ताभावाप्रतियोगित्वम्। तच्च दण्डादौ नास्ति, सर्व्वेषामेव दण्डादीनां चालनीन्यायेन घटाव्यवहितप्राक्क्षणवृत्त्यत्यन्ताभावप्रतियोगित्वाद् इति चेन्न; अनवच्छेदकगर्भलक्षणे तात्पर्य्यात्; तथाच अनन्यथा-

(३) 'पूर्ववर्त्तित्वमन्यथासिद्धत्वम्' इति ख-पुस्तके पाठः।

(४) 'अन्यथासिद्धिजनकत्वेन' इति क-पुस्तके पाठः।

सिद्धनिरूपकत्वे सति कार्य्याव्यवहितप्राक्क्षणवृत्त्य-त्यन्ताभावप्रतियोगितानवच्छेदको यो धर्म्मः तद्वत्त्वं कारणत्वमिति फलितार्थः। तत्तद्दण्डत्वस्यैव घटा-व्यवहितपूर्व्वक्षणवृत्त्यत्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि दण्डत्वस्य तादृशप्रतियोगितानवच्छेदकत्वात् तद्वत्त्वञ्च सर्व्वेष्वेव दण्डेष्वस्तीति नाव्याप्तिः।

तव कारणतायां दैशिकव्याप्तिरपि निवेश्या। सा च कारणतावच्छेदकसम्बन्धेन कार्य्यतावच्छेदक-सम्बन्धेन कार्य्यतावच्छेदकावच्छिन्नवन्निष्ठात्यन्ताभाव-प्रतियोगितानवच्छेदकधर्म्मवत्त्वरूपा। न च दैशिक-व्याप्तिः कथं निवेश्येति वाचाम्; कार्य्यतावच्छेदका-वच्छिन्नं कार्यतावच्छेदकसम्बन्धेन क्वचिदेव जायते, क्वचिन्न इति नियमार्थं तन्निवेशस्यावश्यकत्वात्।

अथ कारणत्वं निर्वक्तुं तदुपयोगिनोमाकाङ्क्षामुत्थापयति नन्वित्यादिना। घटनियतपूर्व्ववर्त्तित्वादिति—स्वाश्रयाश्रयत्वसम्बन्धेनेति शेषः। दण्डरूपस्येत्यादिः।—तथाहि तस्य वक्ष्यमाणप्रथमान्यथा-सिद्धिमत्त्वमवसेयम्। स्वं प्रतीति—घटं प्रतीत्यर्थः। अन्यथासिद्धत्वा-दिति वक्ष्यमाणेष्वन्यथासिद्धिपञ्चकेषु कस्यापि तत्राभावादित्यर्थः। अश्वेति रासभादेरित्यर्थः।

आकाशस्येत्यादिः।—आकाशत्वं हि शब्दसमवायिकारणत्वं, आकाशस्य तादृप्येण ग्रहे शब्दं प्रति जनकत्वग्रह आवश्यक एव,

अनन्तरं च घटपूर्ववर्त्तित्वग्रहेण निरुक्तमन्यथासिद्धत्वमाकाशस्येति भावः।

व्यापकेत्यादिः।—तथाहि व्याप्यधर्म्मेण कारणत्वसम्भवे व्यापकधर्म्मरूपेण वस्तुनः अन्यथासिद्धत्वमिति न तादृप्येण कारणतेति भावः।

घटाव्यवहितेत्यादिः।—घटाव्यवहितप्राक्क्षणत्वञ्च घटप्रागभावाधिकरणसमयप्रागभावानधिकरणत्वे सति घटप्रागभावाधिकरणक्षणत्वम्। एतच्च प्रागभावस्य प्रतियोगिसामग्रीनाश्यत्वमतमुपादाय निर्वक्तव्यम्। प्रतियोगिसामग्री च प्रागभावातिरिक्तकारणकूटरूपा बोध्या; स्वघटितसामग्राः स्वनाश्यत्वस्य अन्याय्यत्वात्।

कारणतावच्छेदकसम्बन्धेनेत्यस्य प्रतियोगितायां, कार्य्यतावच्छेदकसम्बन्धेनेत्यस्य च कार्य्यतावच्छेदकावच्छिन्ननिरूपकतायाम् अन्वयः प्रतिपत्तव्यः।

---

[ कारणावान्तरभेदप्रकरणम् ]

तच्च कारणं विविधं समवाय्यसमवायिनिमित्तभेदात्। तत्र यत्र समवेतं कार्य्यमुत्पद्यते, तत् समवायिकारणम्; यथा पटं प्रति तन्तुः; तन्तुसमवेतीभूयैव पटस्य उत्पादात्। एवं घटादिकम्प्रति कपालादीनां समवायिकारणत्वं बोध्यम्।

ननु पटं प्रति तन्तोरेव कथं समवायिकारणत्वम् ? तन्तुसम्बन्धीभूयेव तुर्य्यादिसम्बन्धीभूयापि पटजनना-दिति चेत् न ; तुर्य्यादौ पटसम्बन्धित्वेऽपि समवाया-भावात्। अयुतसिद्धयोरेव हि सम्बन्धः समवायः, अयुतसिद्धौ च तावेव ययोर्द्वयोर्मध्ये एकमविनश्यद्-वस्थं सत् अपराश्रितमेव तिष्ठति। यथा तन्तुपटौ। तयोर्द्वयोर्मध्ये पटरूपो य एकः, स तन्त्वाश्रित एवाव-तिष्ठत इति तयोः सम्बन्धः समवायः। तुरीपटयोस्तु सम्बन्धो न समवायः, तयोरयुतसिद्धत्वाभावात्। नहि तयोर्द्वयोर्मध्ये तुरी पटो वा अविनश्यद्वस्थः सन् अपराश्रित एवावतिष्ठत इति पटं विना तुर्य्यादेः तुरीं विना पटस्यावस्थानात्। तन्तुनाशरूपविनाश-सामग्रीदशायां विनापि क्षणमेकं पटस्यावस्थानात् अवि-नश्यद्वस्थं सदित्युक्तम्। तथाच तन्तुनाशदशायां पटो विनश्यद्वस्थ इति न दोषः। तदुक्तं 'तावेवायुत-सिद्धौ विज्ञातव्यौ ययोर्द्वयोः अविनश्यदेकम् अनाश्रित-मेवावतिष्ठत' इति।

तदयं संक्षेपः ;—अवयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषपदार्थं नित्यद्रव्या-

दीन्ययुतसिद्धानि । अवयव्यादयो हि क्रममविनश्यन्तो अपराश्रिता एवावतिष्ठन्ते (१)।

असमवायिकारणन्तु तत्, यत् समवायस्वसमवायिसमवेतत्वान्यतरप्रत्यासत्त्या कारणम्। यथा कपालद्वयसयोग-तन्तुद्वयसंयोगौ घटपटौ प्रति समवायेन; घटं प्रति समवायेन कपालद्वयसंयोगसा, पटं प्रति समवायेन तन्तुद्वयसंयोगसा हेतुत्वात्। यथा वा पटरूपं प्रति तन्तुरूपम्। पटरूपं हि पटे जायते, तत्र स्वसमवायिसमवेतत्वसम्बन्धेन तन्तुरूपमस्ति। स्वं तन्तुरूपं, तत्समवायो तन्तुः, तत्समवेतत्वस्य पटे सत्त्वात्। एवं घटरूपादिस्थले द्रष्टव्यम्।

समवायिकारणत्वभिन्नं सत् असमवायिकारणत्वभिन्नं सत् यत् कारणत्वं तन्निमित्तकारणत्वं; यथा पटं प्रति तुरीवेमादीनाम्, घटं प्रति चक्रसलिलसूत्रादीनां कारणत्वम्।

भावकार्य्यस्य कारणं त्रयमेव; यथा भावकार्य्यस्य घटस्य समवायिकारणं कपालं, असमवायिकारणं कपालद्वयसंयोगः; तस्य कपालद्वयसंयोगत्वेन न

(१) 'अपराश्रितमेवावतिष्ठत' इति ग पुस्तके पाठः।

कारणत्वम् ; यथाकथञ्चित् कपालद्वयसंयोगादपि घटोत्पादापत्तेः ; अपि तु विजातीयसंयोगत्वेन। वैजात्यञ्च फलबलकल्प्यम्। एवं पटाद्यसमवायिकारणसंयोगादीनामपि विजातीयसंयोगत्वेन हेतुत्वं बोध्यम्।

निमित्तकारणं दण्डचक्रादि। एवमन्यभावकार्यस्यापि बोध्यम्।

अभावस्य तु निमित्तकारणमात्रम् ; तस्य क्वचिदप्यसमवेतत्वेन समवायिकारणाभावात्। अत एव असमवायिकारणत्वमपि नास्ति ; समवायिप्रत्यासन्नस्यैव असमवायिकारणत्वादिति।

अथ कारणस्यावान्तरभेदं वक्तुमारभते तच्चेत्यादिना। यत्समवेतमित्यादिः।—अत्र तादात्म्यसमवायावेव कारणतावच्छेदक—कार्य्यतावच्छेदकसम्बन्धौ ; नन्वित्यादिना वक्ष्यमाणसमवायाभावादित्यन्तग्रन्थेन तादृशार्थस्य संसूचनात्। अयुतसिद्धौ चेत्यादिः।—पृथग्भूतत्वरूपार्थकस्य युधातोः क्तप्रत्ययेन निष्पन्नस्य युतशब्दस्य नञा समासे अयुतशब्दः सम्पन्नः अपृथग्भूतमेवार्थं प्रतिपादयति, अत एव तादृशविवृतिः सङ्गच्छते।

विशेषपदार्थं नित्यद्रव्यादीनीति।—अत्र आदिपदार्थोऽविवक्षितः, अयुतसिद्धत्वेनाभिमतानां अवयव्यादीनां सर्व्वेषामेव विशेषतः समुल्लिखितत्वाद्विशेषपदार्थं नित्यद्रव्यमात्रयोरेव च अन्ते वक्तव्यत्वादिति।

आदिपदेन स्वत्वादीनामुपग्रह इति शिरोमणिमतानुयायिनां पक्षः शिरोमणिमते स्वत्वादीनामतिरिक्तपदार्थत्वात् तेषाञ्च समवायेन वृत्तित्वाभ्युपगमादिति ।

असमवायिकारणन्तु इत्यादिः ।—अत्र कार्य्यतावच्छेदकः सम्बन्धः समवाय एव । कारणतावच्छेदकसम्बन्धश्च यथायथं समवायः स्वसमवायिसमवेतत्वञ्चेति ।

घटरूपादीत्यादिः ।—एवमिति पूर्व्वनिरुक्तप्रकारेण इत्यर्थः तथाहि घटरूपं प्रति कपालरूपं स्वसमवायिसमवेतत्वसम्बन्धेन कारणम् इति भावः ।

समवायिकारणत्वभिन्नमित्यादिः ।—अत एव 'आभ्यां परं तृतीयस्या'दिति विश्वनाथवचनं सङ्गच्छते । त्वयमेवेति—समवायिकारणमसमवायिकारणं निमित्तकारणञ्चेति ।

यथाकथञ्चिदिति एकघटावयवभूतकपालेन घटान्तरावयवभूतकपालसंयोगविशेषादितोऽपीत्यर्थः । विजातीयसंयोगत्वेन कारणत्वे तादृशकपालद्वयसंयोगे स्वाभिमतवैजात्यविरहेण नातिप्रसङ्गश्चङ्कापीति भावः ।

अभावस्येत्यादिः ।—ननु कथमभावं प्रति कारणस्य निमित्तकारणत्वम् तल्लक्षणगर्भप्रविष्टस्य समवायिकारणत्वादेः कार्य्यविशेषनियन्त्रणाया अत्यावश्यकतया प्रकृतकार्य्यस्थले तादृशप्रतियोग्यप्रसिद्धा असम्भवादिति चेन्न ; यद्यपि निरुक्तपूर्व्वं निमित्तकारणत्वं, तद् भावकार्य्यस्थल एव बोध्यम् । अभावरूपकार्य्यस्थले निमित्तकारणत्वन्तु कारणत्वमात्रमेव, अतो नासम्भवः, तत्र समवाय्यसमवायिकारणयोरेकान्ततोऽसम्भवेन नाप्यतिप्रसङ्गावकाश इति ध्येयम् । भेदकूटद्वयनिवेशाद्वा न दोषः कोऽपि ।

तच्च प्रमाणं चतुर्विधम् ; प्रत्यक्षानुमानोपमान-शब्दभेदात् । तथाच न्यायसूत्रम् 'प्रत्यक्षानुमानोप-मानशब्दाः प्रमाणानि' इति ।

तत्र च प्रत्यक्षमितिकरणं प्रत्यक्षम् । भवति च चक्षुरादीन्द्रियं चाक्षुषादिप्रत्यक्षमितिकरणम् ; तेषां चाक्षुषादिकं प्रति करणत्वात् चक्षुःसंयोगरूपव्यापार-वत्त्वाच्च (१) इति लक्षणसङ्गतिः । प्रत्यक्षमितित्वञ्च साक्षात्करोमीति प्रतीतिनियामको जातिविशेषः ।

ननु प्रत्यक्षमितेः किं लक्षणम् ? न च इन्द्रि-यार्थसन्निकर्षोत्पन्नज्ञानत्वं तल्लक्षणम् । भवति च घटचाक्षुषादिकं तथा ; घटादिरूपोऽर्थः, चक्षुरादि-रूपं यदिन्द्रियम्, तयोर्यः सन्निकर्षः चक्षुःसंयोगरूपः तज्जन्यत्वाच्चाक्षुषादेरिति वाच्यम् ; कार्य्यमात्रं प्रति कालस्य हेतुतया स्मृतिं प्रति अपि चक्षुःसंयोगादेः कालोपाधितया हेतुत्वात् स्मृतावतिव्याप्तेः । न च इन्द्रियार्थसन्निकर्षत्वावच्छिन्न-कारणतानिरूपितकार्य्यता-शालित्वं (२) लक्षणं करणीयमिति नोक्तदोषः ।

---

(१) 'रूपव्यापकत्वाच्च' इति ग—पुस्तकपाठः ।

(२) 'कारणताप्रतियोगिककार्य्यता' इति क—पुस्तकपाठः ।

कालोपाधेः कालत्वेनैव हेतुत्वम्, न तु इन्द्रियार्थसन्निकर्षत्वेनेति वाच्यम्; इन्द्रियत्वार्थत्वयोरननुगतत्वात्(३)। मैवम्; प्रत्यक्षत्वजातिरेव हि तल्लक्षणम्।

न च लक्षणमात्रस्य(४) इतरभेदानुमापकतया प्रत्यक्षमितरेभ्यो भिद्यत(५) इत्यनुमानं न स्यात्; (६) प्रत्यक्षत्वस्य पक्षतावच्छेदकतया तस्य हेतुत्वासम्भवात्; आचार्य्येण पक्षतावच्छेदकस्य हेतुत्वानङ्गीकारादिति वाच्यम्; प्रत्यक्षातिरिक्तज्ञानभिन्नत्वादिहेतुना(७) इतरभेदानुमानसम्भवात्। पक्षतावच्छेदकस्य हेतुत्वे हि अनुमित्यनुत्पादो दोषः; हेतुसाध्यसामानाधिकरण्यज्ञानस्य अनुमितिहेतुतया पक्षतावच्छेदकरूपहेतुमति (८) साध्यज्ञानस्य सिद्धिरूपतया अनुमितिप्रतिबन्धकत्वात्।

स च दोषः(९) सामानाधिकरण्येनानुमितिं प्रत्येव,

---

(३) 'इन्द्रियार्थयोरननुगतत्वात्' इति ग—पुस्तकपाठः।

(४) 'न च लक्षणस्य' इति क—पुस्तकपाठः।

(५) 'प्रत्यक्षमितिरितरेभ्य' इति क—पुस्तकपाठः।

(६) 'इत्यनुमानं स्यात्' इति ग—पुस्तकपाठः।

(७) प्रत्यक्षानतिरिक्तज्ञानत्वादिहेतुना' इति क—पुस्तकपाठः।

(८) 'पक्षतावच्छेदकरूपहेतुमिति साध्यज्ञानस्य' इति ग—पुस्तकपाठः।

(९) 'न च दोषः' इति ग—पुस्तकपाठः।

नत्ववच्छेदावच्छेदेनानुमितिं प्रति; अवच्छेदावच्छेदेनानुमितिं प्रति अवच्छेदावच्छेदेन सिद्धेरेव प्रतिबन्धकत्वात्। साध्यसाधनसामानाधिकरण्यग्रहात्मिका सिद्धिश्च नावच्छेदावच्छेदेन, अपि तु अवच्छेदकसामानाधिकरण्येनैवेति। अपि च समानाकारकसिद्धिरेव अनुमितिप्रतिबन्धिका; तथा च प्रत्यक्षमितित्ववान् इतरभेदवान् इत्याकारकहेतुसाध्यसामानाधिकरण्यग्रहात्मिका सिद्धिः प्रत्यक्षमितिरितरेभ्यो भिद्यत इत्यनुमितेर्न प्रतिबन्धिका; हेतुसाध्यसामानाधिकरण्यग्रहे प्रत्यक्षमितित्वत्वेन प्रत्यक्षमितित्वं भासते, अनुमितौ च निरवच्छिन्नप्रत्यक्षमितित्वमिति समानाकारकत्वाभावात्।

यद्वा यत्किञ्चित् प्रत्यक्षमितिमादाय एतद्व्यक्तिसमवेतानुमित्यसमवेत-धर्म्मसमवायित्वं तल्लक्षणम्। अस्ति च एतद्व्यक्तिसमवेतोऽनुमित्यसमवेतश्च धर्म्मः प्रत्यक्षत्वम् जातिः, तद्वत्त्वञ्च सर्व्वासु प्रत्यक्षमितिव्यक्तिषु इति लक्षणसङ्गतिः।

ज्ञानत्वादिजातेरपि एतद्व्यक्तिसमवेतत्वात् तामादाय अनुमित्यादावतिव्याप्तिवारणाय अनुमित्यसमवेते-

तुक्तम्। तथा च ज्ञानत्वादेरनुमितासमवेतत्वाभावात् नातिव्याप्तिरिति।

प्रमाणसामान्यं निरूप्य प्रमाणविभागं वक्तुमुपक्रमते तच्चेत्यादिना। तच्चेति निरुक्तलक्षणकमित्यर्थः। एतेन प्रमाणलक्षणसम्पत्तिर्विभागोपयुक्तोपपादिता। चतुर्विधमिति न तदधिकसंख्याकं तन्न्यूनसंख्याकं वेत्यर्थः। मतान्तरे तु प्रमाणानां भूयस्त्वाल्पीयस्त्वे समभ्युपगम्येते, तद् यथा;—

'प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः।
अनुमानञ्च तच्चाथ सांख्याः शब्दञ्च ते अपि।
न्यायैकदेशिनोऽप्येवमुपमानञ्च केचन।
अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः।
अभावषष्ठान्येतानि भाट्टा वेदान्तिनस्तथा।
सम्भवैतिह्ययुक्तानि तानि पौराणिका जगुः'। इति

तार्किकरक्षायां वरदराजेनोक्तम्।

यद्यपि काणादानां प्रत्यक्षमनुमानञ्चेति प्रमाणद्वयमेव निरुक्तप्रमाणादिभिरभ्युपगतमनुमन्यते, तथापि न्यायमताभ्युपगमेन तथोक्तिर्नासङ्गता प्रतिभाति। अथवा नव्यन्यायमतप्रतिपादकमेवेदं प्रकरणमिति तदनुरोधात् प्रमाणचतुष्टयं प्रतिपादितमिति ध्येयम्। यच्च पदार्थनिरूपणप्रकरणे षोड़शपदार्थनिरुक्तिर्नाभिनन्दितेति तदपि षोड़शपदार्थानां सर्वेषां सप्तपदार्थेष्वन्तर्भावमुपगम्य लाघवाभिप्रायेणेति समासः।

प्रमाणचातुर्विध्ये प्रमाणभूतं न्यायसूत्रमुदाहरति प्रत्यक्षेत्यादि।

व्यापारेति,—व्यापारत्वञ्च तज्जन्यत्वे सति तज्जन्यजनकत्वमिति। भवन्ति किल चक्षुःसंयोगादयो व्यापाराः चक्षुरादीन्द्रियजन्याः चक्षुरादीन्द्रियजन्यचाक्षुषादिप्रत्यक्षजनकाश्चेति तेषां व्यापारत्वं

समञ्जसम्। तथाहि व्यापारवत्कारणत्वस्य करणलक्षणतया चक्षुरादौ चक्षुःसंयोगादिरूपव्यापारवत्कारणत्वरूपं करणत्वमिति भावः।

कालोपाधितयेति,—जन्यमात्रस्य कालोपाधित्वात् चक्षुःसंयोगादिरूपजन्यपदार्थानामपि तथात्वमिति भावः।

नचेत्यादिः।—तथाहि लक्ष्ये लक्ष्येतरभेदानुमाने हि लक्षणमेव हेतुः, प्रकृते च प्रत्यक्षे लक्ष्ये प्रत्यक्षेतरभेदानुमाने प्रत्यक्षत्वजातिरूपं प्रत्यक्षलक्षणमेव लिङ्गमाख्येयम्, तच्च तस्यैव पक्षतावच्छेदकतया प्रकृते नोपपद्यत इति वाच्यमित्यन्तग्रन्थाभिप्रायः।

स च दोष इत्यादिः।—तथाहि पर्व्वतत्वेन रूपेण यत्किञ्चित्पर्व्वते वह्नेः सिद्धावपि पर्व्वतत्वावच्छेदेन वह्न्यनुमितेरावश्यकतया सामानाधिकरण्यमात्रेण सिद्धेः सामानाधिकरण्यमात्रेणानुमितिविरोधित्वं कल्प्यते, नत्ववच्छेदावच्छेदेनापि, अतः प्रकृते प्रत्यक्षत्वस्य हेतोः यत्किञ्चित्प्रत्यक्षान्तर्भावेण प्रत्यक्षेतरभेदरूपसाध्यसामानाधिकरण्यग्रहानुरोधेन सत्यामपि सामानाधिकरण्येन प्रकृतसाध्यसिद्धौ नावच्छेदावच्छेदेनानुमितिप्रतिरोध इत्यदोषः। प्रत्यक्षत्वादेर्धर्म्मस्य कालिकेन प्रत्यक्षातिरिक्तजन्यवृत्तित्वेनातिप्रसङ्गवारणाय धर्म्मवत्त्वमात्रमपहाय धर्म्मसमवायित्वपर्य्यन्तानुधावनम्। तद्दक्षश्चेति तत्समवायित्वमित्यर्थः, तस्यैव लक्षणे प्रकृतत्वात्।

---

[ प्रत्यक्षप्रमाणभेदप्रकरणम् ]

**प्रत्यक्षमिति करणं यदिन्द्रियमुक्तं, तत् षड्-विधम्; चक्षु-स्त्वग्-घ्राण-रसना-श्रोत्र-(१) मनो-भेदात्। तद्व्यापारश्च सन्निकर्षो द्विविधः (२);**

(१) श्रोत्रेत्यत्र 'शब्दे' ति गपुस्तकपाठः। (२) 'सन्निकर्षः, स च द्विविध' इति ग—पुस्तकपाठः।

लौकिकोऽलौकिकश्च। तत्र लौकिकः सन्निकर्षः षड्विधः; संयोग-संयुक्तसमवाय-संयुक्तसमवेतसमवाय—समवाय—समवेतसमवाय-विशेषणताभेदात्।

अलौकिकः सन्निकर्षश्च त्रिविधः;—सामान्यलक्षण-ज्ञानलक्षण-योगजधर्मभेदात्।

तत्र संयोगसन्निकर्षेण द्रव्यप्रत्यक्षम्। संयुक्तसमवायसन्निकर्षेण रूपादि-द्रव्यत्वादिप्रत्यक्षम्। संयुक्तसमवेतसमवायसन्निकर्षेण रूपत्वादिप्रत्यक्षम्। समवायसन्निकर्षेण शब्दप्रत्यक्षम्। समवेतसमवायसन्निकर्षेण शब्दत्वादिप्रत्यक्षम्। विशेषणतासन्निकर्षेण अभाव-समवाययोः प्रत्यक्षं जन्यते (३)।

अत्र इत्थं कार्यकारणभावाः (४)।—द्रव्यत्वविशिष्टलौकिकविषयतासम्बन्धेन चाक्षुषं प्रति समवायसम्बन्धेन चक्षुःसंयोगो हेतुः। एवं समवेतत्वविशिष्टलौकिकविषयतासम्बन्धेन चाक्षुषं प्रति चक्षुः संयुक्तसमवायो विशेषणतासम्बन्धेन हेतुः। द्रव्यसमवेतसमवेतत्वविशिष्टलौकिकविषयतासम्बन्धेन

---

(३) 'प्रत्यक्ष'मिति गपुस्तके नास्ति। (४) 'कार्यकारणभाव' इति ग—पुस्तकपाठः।

चाक्षुषं प्रति विशेषणतासम्बन्धेन चक्षुःसंयुक्तसमवेत-समवायो हेतुः, एवं ज्ञातव्यम् । (५)

भवति च द्रव्यत्वविशिष्टलौकिकविषयतासम्बन्धेन चाक्षुषं घटादौ, तत्र समवायसम्बन्धेन चक्षुःसंयोगोऽस्तीति (६)। लौकिकविषयतासम्बन्धेन चाक्षुषं रूपादावपि भवति ; तत्र समवायसम्बन्धेन चक्षुःसंयोगो नास्तीति व्यभिचारवारणाय द्रव्यत्वविशिष्टे त्युक्तम् । तथाच तत्र गुणत्वादिविशिष्टलौकिकविषयता-सम्बन्धेनैव चाक्षुषं भवति, न तु द्रव्यत्वविशिष्ट-लौकिकविषयतयेति न व्यभिचारः ।

घटत्वादिसामान्यलक्षणप्रत्यासत्तिजन्यचाक्षुषम् असन्निकृष्टघटादावपि (७) जायते, तत्र चक्षुःसंयोगो-नास्तीति व्यभिचारवारणाय लौकिकत्वं विषयतायां विशेषणम् । तथा च तत्र द्रव्यत्वविशिष्टालौकिक-विषयतासम्बन्धेनैव चाक्षुषं भवति, न तु लौकिक-विषयतयेति न व्यभिचारः ।

---

(५) 'एवं समवेतत्वेत्यारभ्य एवं ज्ञातव्य' मित्यन्तसन्दर्भः क—पुस्तके नास्ति ।

(६) 'संयोगोऽप्यस्तीति' इति क—पुस्तकपाठः ।

(७) 'जन्यासन्निकृष्टघटादा'विति क—पुस्तकपाठः ।

एकपुरुषीय-चक्षुःसंयोगादपरपुरुषीयचाक्षुषवारणाय एतत्पुरुषीयत्वं कारणतावच्छेदके कार्य्यतावच्छेदके च निवेश्यम्। तथा च द्रव्यत्वविशिष्टलौकिकविषयतासम्बन्धेनैव एतत्पुरुषीयचाक्षुषत्वेन कार्य्यता, समवायसम्बन्धेन एतत्पुरुषीयचक्षुःसंयोगत्वेन कारणता इति पर्य्यवसितः कार्य्यकारणभावः।

न च पिशाचस्यापि चाक्षुषं स्यात्; तत्रापि चक्षुःसंयोगसत्त्वादिति वाच्यम्; बहिर्द्रव्यप्रत्यक्षं प्रति उद्भूतरूपस्यापि हेतुत्वात्। तथा च पिशाचस्य अनुद्भूतरूपवत्त्वेन उद्भूतरूपाभावात् न तच्चाक्षुषम्। उद्भूतरूपं विनापि आत्मनः प्रत्यक्षोदयात् तत्र व्यभिचारवारणाय द्रव्ये (८) बहिष्ठम् विशेषणम्। बहिष्ठत्वञ्च आत्मानात्वम्। न चैवमपि परमाणोश्चाक्षुषं स्यात् (९), तत्रापि उद्भूतरूपचक्षुःसंयोगयोः सत्त्वादिति वाच्यम्; द्रव्यप्रत्यक्षं प्रति महत्त्वस्यापि हेतुत्वात्। तथाच परमाणोर्महत्त्वाभावात् न प्रत्यक्षम्।

---

(८) ग—पुस्तके 'द्रव्य' इत्यंशो नास्ति।

(९) 'स्या'दित्यत्र 'भवतु' इति ग—पुस्तकपाठः।

ननु अन्धकारे घटादेश्चाक्षुषं स्यात् ; अन्धकारेऽपि तत्र (१०) चक्षुःसंयोगसत्त्वात् । न च अन्धकारे घटादौ (११) चक्षुःसंयोगे मानाभाव इति वाच्यम् ; अन्धकारचाक्षुषानुरोधेन तत्रापि (१२) चक्षुः-संयोगस्यावश्यकत्वात्, द्रव्यत्वत्यभावचाक्षुषं प्रति चक्षुः-संयुक्तविशेषणतायां हेतुत्वात् । चक्षुःसंयुक्तघटे विशेषणताप्रत्यासत्त्या अन्धकारस्य प्रत्यक्षं जायत इति (१३) अन्धकारे घटेऽपि चक्षुःसंयोग आवश्यक इति चेन्न ; द्रव्यत्वविशिष्टलौकिकविषयतासम्बन्धेन चाक्षुषं प्रति आलोकसंयोगस्यापि (१४) हेतुत्वात् । आलोकत्वञ्च उद्भूतानभिभूतरूपवन्महातेजस्त्वम् । चक्षुषोऽपि अनभिभूतरूपमहातेजस्त्वात् अन्धकारेऽपि चक्षुःसंयोगात् घटादिचाक्षुषवारणाय उद्भूतरूप-वत्त्वं विशेषणमुपात्तम् (१५) । तथा च चक्षुष (१६)

---

(१०) 'अन्धकारेऽपि चक्षु स योगसत्त्वात्' इति ग—पुस्तकपाठ ।

(११) 'घटादा'विति ग—पुस्तके नास्ति । (१२) 'तदापि' इति ग—पुस्तकपाठ. ।

(१३) 'तथाच चक्षुःसयुक्तघटघटितविशेषणताप्रत्यासत्त्या अन्धकारस्य चाक्षुषं जायते' इति क—पुस्तकपाठ' ।

(१४) 'समवायेन आलोकसंयोगस्यापि' इति क—पुस्तकपाठ' ।

(१५) 'उद्भूतरूपविशेषण'मिति क—पुस्तकपाठः ।

(१६) 'चक्षुरुद्भूते'ति क—पुस्तकपाठः ।

उद्भूतरूपवत्त्वाभावात् नोक्तदोषः । सुवर्णस्यापि उद्भूतरूपवन्महातेजस्त्वात् सुवर्णसंयोगसत्त्वे अन्धकारे घटादिचाक्षुषवारणाय अनभिभूतरूपवत्त्वं विशेषणम्। तथा च स्वर्णरूपस्य पार्थिवपीतरूपेण अभिभूतत्वात् न दोषः । परमाणुद्व्यणुकरूप-तादृशतेजःसंयोगात् अन्धकारे घटादिचाक्षुषवारणाय महत्त्वं विशेषणम् । तथा च परमाणुद्व्यणुकयोर्महत्त्वाभावात् न दोषः ।

गुरुचरणास्तु,—आलोकत्वं महाप्रभात्वम् (१७)। प्रभात्वञ्च तेजस्त्वव्याप्यजातिविशेषः । तथा च द्रव्यचाक्षुषं प्रति महत्[हा]प्रभासंयोगत्वेन हेतुत्वमिति प्राहुः । न चैवमालोकस्यापि चाक्षुषं न स्यात् ; तत्र(१८) आलोकसंयोगाभावादिति वाच्यम् ; संयोगस्य द्विष्ठतया घटालोकसंयोगस्य घट इव आलोकेऽपि सत्त्वात् । न हि वयम् आलोकप्रतियोगिकत्वविशिष्टसंयोगत्वेन हेतुत्वं ब्रूमः, येन (१९) आलोके तदभावेन आलोकप्रत्यक्षं न स्यात् । न च द्रव्यचाक्षुषं प्रति आलोक-

---

(१७) 'महाप्रभात्व'मित्यत्र 'प्रभात्व'मित्ये तन्नास्ति क—पुस्तके दृश्यते ।

(१८) 'तत्रे'त्यत्र 'आलोके' इति क—पुस्तके पाठः ।

(१९) 'येन' इत्यनन्तरं 'उक्तदोषः स्यात्' इति ग—पुस्तकपाठः ।

संयोगत्वेन न हेतुत्वम्; विनाप्यालोकसंयोगं विड़ालादेस्तमसि द्रव्यचाक्षुषोदयादिति वाच्यम्; नारद्रव्यचाक्षुषं प्रति (२०) आलोकसंयोगस्य हेतुत्वात्। न च मानुषस्यापि विनाप्यालोकसंयोगं अञ्जनविशेषादिना द्रव्यचाक्षुषोदयात् तथापि व्यभिचार इति वाच्यम्; तादृशाञ्जनादौ मानाभावात्। भावे वा अञ्जनसंयोगाभावविशिष्टालोकसंयोगाभावाभावत्वेन हेतुत्वं वाच्यमिति न दोषः। अञ्जनसंयोगाभावविशिष्टो य आलोकसंयोगाभावः तदभावस्य विशिष्टाभावतया आलोकसंयोगाभावविशिष्टाञ्जनसंयोगसत्त्वे अञ्जनसंयोगाभावविशिष्टालोकसंयोग सत्त्वेऽपि सत्त्वात्। आद्ये अञ्जनसंयोगाभावरूपं यद् विशेषणं तदभावकृतो विशिष्टाभावः, द्वितीये तु आलोकसंयागाभावरूपं यद्विशेष्यं तदभावकृत इति प्राचीनमते।

विशिष्टाभावस्य अतिरिक्तत्वादिमणिकृन्मते तु तादृशविशिष्टाभावोऽञ्जनसंयोगसत्त्वे आलोकसंयोगसा

---

(२०) 'नरद्रव्यचाक्षुष'मिति ग—पुस्तकपाठः।

चासत्त्वे आलोकसंयोगसत्त्वे अञ्जनसंयोगसा चासत्त्वे तिष्ठति। उभयत्रैव अञ्जनसंयोगाभाव-विशिष्टालोकसंयोगाभावो (२१) नास्तीति प्रतीतेः।

ननु घटादौ एकावच्छेदेन आलोकसंयोगसत्त्व अन्यावच्छेदेन चक्षुःसंयोगसा सत्त्वेऽपि द्रव्यचाक्षुष सात्; घटादौ समवायसम्बन्धेन चक्षुःसंयोगसा आलोकसंयोगसा च सत्त्वात्. न च यदवच्छेदेन आलोकसंयोगः तदवच्छेदेन चक्षुःसंयोगत्वेन हेतुत्वं वाच्यमिति नोक्तदोष इति वाच्यम्; यत्त्वतत्त्वयो रननुगमात् (२२) इति चेन्न; चक्षुःसंयोगावच्छिन्ना लोकसंयोगत्वेन हेतुत्वात्। चक्षुःसंयोगावच्छिन्न-त्वञ्च चक्षुःसंयोगावच्छेदकं यत् तदवच्छेदत्वम्(२३)। एतच्च एकावच्छेदेन चक्षुःसंयोगालोकसंयोगयोः सत्त्व एव सम्भवति, विभिन्नावच्छेदेन तदुभयमादाय न दोष इति दिक्।

न च चक्षुःसंयोगावच्छिन्नालोकसंयोगत्वेन हेतु

---

(२१) 'भ्संयोगो नास्तीति' इति ग—पुस्तकपाठः।

(२२) 'यत्तु द्वयोरननुगतत्वात' इति क—पुस्तकपाठ'।

(२३) 'तदवच्छेदकत्वम्' इति क—पुस्तकपाठ'।

त्वम्, आलोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन वा इति (२४) विशेषणविशेष्यभावभेदेन विनिगमनाविरह इति वाच्यम्; विनिगमनाविरहेण उभयरूपेणैव हेतुत्वमिति प्राञ्चः।

गुरुचरणास्तु,—चक्षुःसंयोगावच्छिन्नालोकसंयोगत्वेनैव हेतुत्वं; न तु आलोकसंयोगावच्छिन्नचक्षुःसंयोगत्वेन; चक्षुःसंयोगे एतत्पुरुषीयत्वस्य उक्तयुक्त्या अवश्यविनिवेश्यतया आलोकसंयोगावच्छिन्नैतत्पुरुषीय-चक्षुःसंयोगत्वेन हेतुत्वोक्तौ एतत्पुरुषीयत्वालोकसंयोगावच्छिन्नत्वयोरेकत्र निवेशितयोः (२५) विशेषणविशेष्यभावविनिगमनाविरहेण प्रतिपुरुषं गुरुतरकार्य्यकारणभावद्वयस्य कल्पनापत्तेरित्याहुः।

ननु परमाणुवच्छेदेन घटादौ चक्षुःसंयोगादपि घटादिचाक्षुष स्यात् न च स्थूलावयवावच्छिन्नचक्षुःसंयोगो हेतुर्वाच्यः; अवयवनिष्ठस्थौल्यञ्च महत्त्वम्। तथा च नोक्तदोषः; परमाणोः स्थूलत्वा-

(२४) 'चक्षुःसंयोगावच्छिन्नालोकसंयोगत्वेन हेतुत्व आलोकसंयोगावाच्छिन्नचक्षुःसंयोगत्वेन वा इति विनिगमनाविरह' इति पाठो ग—पुस्तके वर्त्तते।

(२५) 'एकतरनिवेशितयोः' इति क—पुस्तकपाठः।

भावादिति (२६) वाच्यम्; तथा सति त्रसरेणो-रचाक्षुषत्वापत्तेः (२७); त्रसरेणवयवसा द्व्यणुकस्या-स्थूलत्वादिति चेन्न; विजातीयचक्षुःसंयोगत्वेन हेतु-त्वात्। वैजात्यञ्च संयोगत्वव्याप्यजातिविशेषः। न च तत्र मानाभाव इति वाच्यम्; द्रव्यचाक्षुषजनकतावच्छेदकतया तत्सिद्धेः। तथा च परमाणुवच्छेदेन चक्षुःसंयोगो न विजातीय इति नोक्तदोषः; वैजात्यस्य चाक्षुषरूपफलवलकल्पात्वात्।

न चैवं द्रव्यचाक्षुषं प्रति आलोकसंयोगस्य हेतुत्व न स्यात्; अन्धकारे घटादौ चक्षुःसंयोगसत्त्वेऽपि तस्य विजातीयत्वाभावादेव चाक्षुषवारणसम्भवात्, वैजात्यस्य फलवलकल्पात्वादिति वाच्यम्; यत्र आलोकसंयोगदशायां अन्धकारकालीनचक्षुःसंयोगा-देरेव घटादिचाक्षुषम्, तत्र अन्धकारकालीनचक्षुः-संयोगेऽपि (२८) वैजात्यस्य आवश्यकतया अन्धकारे

---

(२६) 'परमाणोरस्थूलत्वादिति' इति क—पुस्तकपाठः।

(२७) 'त्रसरेणोश्चाक्षुषत्वाभावापत्तेः' इति क—पुस्तकपाठः।

(२८) 'तस्य' इत्यत आरभ्य 'अन्धकारकालीनचक्षुःसंयोगेऽपि' इत्यन्तसन्दर्भः क—पुस्तके नास्ति।

घटादिचाक्षुषवारणाय आलोकसंयोगस्य हेतुतायाः आवश्यकत्वात्।

न च उक्तस्थाने आलोकसमवधानदशायां चक्षुः-संयोगान्तरोत्पत्त्या एव चाक्षुषं, नत्ववस्थितचक्षुः-संयोगादिति अन्धकारकालीनचक्षुःसंयोगे वैजात्यमेव नास्तीति कथमालोकसंयोगस्य हेतुत्वं वाच्यमिति वाच्यम् (२९); अनन्तसंयोगव्यक्तिकल्पनापत्तेः। अपि च क्रियाजन्यसंयोगः क्वचिदेव जायते, क्वचिन्नेति नियमार्थं क्रियाजन्यसंयोगं प्रति उत्तरदेशस्य तत्त्वेन हेतुत्वं वाच्यं; तथा चैतद्व्यक्ति-संयोगं प्रति एतत्त्वेन हेतुत्वमिति रीत्या कार्य्यकारणभावः कल्पनीयः। इत्थञ्च यत्र यत्र एवंरीत्या चाक्षुषं, तत्र तत्र संयोगान्तर-कल्पने तत्तत्संयोगं प्रति तत्तद्व्यक्तित्वेन हेतुत्वस्य कल्पनीयतया अनन्तकार्य्यकारणभावकल्पनापत्तेः।

ननु चक्षुःसंयोगनिष्ठं वैजात्यं न जातिः; क्रियाजन्यतावच्छेदकजात्या साङ्कर्य्यात्। तथाहि क्रियाजन्यतावच्छेदकजातिं विहाय चाक्षुषजनकता-वच्छेदिका जातिः चक्षुरवयवसंयोगाधीन-चक्षुर्घटादि-

(२९) 'हेतुत्वं वाच्य'मित्यं तन्मात्रं ग—पुस्तके दृश्यते।

संयोगे, चाक्षुषजनकतावच्छेदकजातिं विहाय क्रिया-जन्यतावच्छेदिका जातिः अङ्गुल्यादिक्रियाजन्यसंयोगे, तदुभयसामानाधिकरण्यञ्च (३०) चक्षुःक्रियाजन्य-चक्षुर्घटादिसंयोग इति।

न च क्रियाजन्यतावच्छेदिका जातिर्नाना, एका चाक्षुषजनकतावच्छेदकजातिव्याप्या, अपरा तद्विरुद्धा, तथाच न सांङ्कर्य्यं ; चाक्षुषजनकतावच्छेदकजाति-व्याप्यायां तदभावसामानाधिकरण्याभावात्, तद्विरुद्धा-याञ्च तेन सह सामानाधिकरण्यादिति(३१) वाच्यम् ; क्रियाजन्यतावच्छेदिका जातिर्नाना, चाक्षुषजनकता-वच्छेदिका वेत्यत्र विनिगमनाभावात्, उभयथैव सांङ्कर्य्यवारणसम्भवात्।

अत्रोच्यते ;—क्रियाजन्यतावच्छेदिकैव जाति-र्नाना, तस्या नानात्वे कार्य्यकारणभावद्वयकल्पनमेव ; (३२) तथाहि कदाचित् चाक्षुषजनकतावच्छेदक-जातिव्याप्यजात्यवच्छिन्नं जायते, कदाचित् तद्विरुद्ध-

---

(३०) 'तदुभयसमानाधिकरणचक्षुःक्रिया' इति ग—पुस्तकपाठः।

(३१) 'सामानाधिकरण्याभाव'दिति क—पुस्तकपाठः।

(३२) 'नानात्वे कारणाभावात् कल्पनाद्वयमेव' इति ग—पुस्तकपाठः।

जात्यवच्छिन्नमिति (३३) नियमार्थम् एकवैजात्यमन्तर्भाव्य विजातीयसंयोगं प्रति विजातीयक्रियात्वेन अपरवैजात्यमन्तर्भाव्य विजातीयसंयोगं प्रति विजातीयाक्रियात्वेन हेतुत्वं क्रियानिष्ठं वैजात्यद्वयं स्वीकृत्य वाच्यम्। चक्षुःसंयोगनिष्ठवैजात्यस्य नानात्वे अनन्तकार्य्यकारणभावकल्पनापत्तेः। चक्षुःसंयोगनिष्ठकारणतायाः पुरुषभेदेन भिन्नतया प्रतिपुरुषं कार्य्यकारणभावद्वयकल्पनापत्तेः। तथाहि चक्षुःसंयोगनिष्ठवैजात्यस्य नानात्वे चाक्षुषनिष्ठमपि (३४) नाना वैजात्यं स्वीकार्य्यम्; अन्यथा व्यभिचारापत्तेः। क्रियाजन्यतावच्छेदकजातिव्याप्या या जातिः तदवच्छिन्नं विनापि तद्विरुद्धजात्यवच्छिन्नादपि (३५) चाक्षुषोत्पादादिति दिक्।

प्रत्यक्षकरणानामिन्द्रियाणां भेदानाह प्रत्यक्षमितीत्यादिना। प्रत्यक्षमितित्वं नाम जातिभेद इत्युक्तमधस्तात्। विशेषणतेति,—संयुक्तविशेषणता—संयुक्तसमवेतविशेषणतादिभेदात् सत्यपि विशेषणतायाः प्रकारभेदे विशेषणतात्वेन ऐक्यमादाय षड्विधत्वं लौकिकसन्निकर्षाणामुपपादनीयमिति धेयम्।

(३३) 'कदाचित् विरुद्धजात्यवच्छिन्नं तत्र नियमार्थम्' इति ग—पुस्तकपाठः।

(३४) 'तथाहि चक्षुःसंयोगनिष्ठमपि नाना' इति ग—पुस्तकपाठः।

(३५) 'तद्विरुद्धजातीयादपि' इति ग—पुस्तकपाठः।

अलौकिक इति।—तदुक्तं विश्वनाथेन 'अलौकिकः सन्निकर्षः स्त्रिविधः परिकीर्त्तितः। सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा।' इति।

रूपादीत्यादिपदात् योग्यगुणानां द्रव्यत्वादीत्यादिपदाच्च योग्यवृत्तिजातीनामुपग्रहः, न तु गुणांशेऽपि योग्यवृत्तित्वं विशेषणं; वायौ वर्त्तमानस्य स्पर्शस्य त्वाचप्रत्यक्षानुपपत्तेः।

द्रव्यत्वविशिष्टेत्यत्र वैशिष्ट्यं समवाय-स्वरूपघटितसामानाधिकरण्यसम्बन्धेन। समवेतत्वविशिष्टेत्यादौ च सामानाधिकरण्यनिरूपकतावच्छेदकसम्बन्ध उभयत्र विशेषणतैव।

असन्निकृष्टघटादावपीति।—तथाहि यत्किञ्चिद्घटादौ चक्षुःसंयोगादिरूप-लौकिकप्रत्यक्षसामग्रीसत्त्वेन यत्किञ्चिद्घटादेः यदि लौकिकप्रत्यक्षं, तदैव तत्प्रत्यक्षविषयीभूतघटत्वादिमतां यावतामसन्निकृष्टानामपि अलौकिकप्रत्यक्षमिति स्थितिरुन्नेया।

वह्निर्द्रव्येत्यादिः।—तथाहि उद्भूतरूपवत्त्वस्य प्रत्यक्षं प्रत्यकारणत्वे वायोरपि त्वक्संयोगादिरूपेन्द्रियसन्निकर्षादिसत्त्वेन प्रत्यक्षमापद्येत इति उद्भूतरूपवत्त्वमपि कारणं वाच्यम्; इत्थञ्च पिशाचप्रत्यक्षप्रसङ्गो न भवतीति भावः।

द्रव्यवृत्त्यभावेति।—अन्धकारस्य तेजोऽभावरूपतायाः सिद्धान्तित्वात् अन्धकारोऽपि प्रकृते द्रव्यवृत्त्यभाव एव, अनुभवसिद्धस्य तदीयचाक्षुषस्य उत्पत्त्यनुरोधेन अन्धकारविशिष्टे भूतलादौ चक्षुःसंयोगमवश्यमभ्युपगन्तव्यतया निरुक्तापत्तिः सङ्गच्छत इति भावः।

तदभावेनेति।—आलोकप्रतियोगिकत्वविशिष्टसंयोगत्वेन रूपेण तादृशसंयोगस्य आलोकसंयोगानुयोगिनि घटादावेव सत्त्वेन तदभाव आलोके सुसङ्गच्छते।

उभयत्रैवेति।—निरुक्तस्थलद्वय इत्यर्थः। प्रतीतेरिति।—तथाहि प्रतियोगितावच्छेदकावच्छिन्नाधिकरणतया सममेव अभावस्यत् विरोधा

तत्र उभयत्रैव अञ्जनसंयोगाभावविशिष्टालोकसंयोगाभावत्वावच्छिन्नाधिकरणतायां असत्त्वेन तादृशाभावप्रतीतिरविरुद्धेति भावः। चक्षुःसंयोगावच्छेदकमित्यादौ अवच्छेदकत्वं स्वरूपसम्बन्धविशेषः। तदवच्छेद्यत्वमित्यत्र अवच्छेद्यत्वमपि तथा।

गुरुतरेत्यादिः।—तथाहि आलोकसंयोगावच्छिन्नत्वविशिष्टैतत्पुरुषीयत्वविशिष्टचक्षुःसंयोगत्वेन रूपेण एकं कारणत्वं, एतत्पुरुषीयत्वविशिष्टालोकसंयोगावच्छिन्नत्वविशिष्टचक्षुःसंयोगत्वेन च अपरं कारणत्वमिति तथाभूतकारणताद्वयौ। एतत्पुरुषीयत्वविशिष्टचक्षुःसंयोगा-वच्छिन्नालोकसंयोगत्वेन तथात्वे तु एकमेव कारणत्वमिति भावः।

ननु आलोकसंयोगस्य द्रव्यचाक्षुषं प्रत्यकारणत्वे अन्धकारे घटादिचाक्षुषप्रसङ्ग इत्याशङ्क्य समाधत्ते अन्धकार इत्यादिना। ननु तत्रापि चक्षुःसंयोगे वैजात्यविरहः कथमित्याशङ्क्याह वैजात्यस्येत्यादि। तथाहि अन्धकारे सत्यपि घटादौ चक्षुःसंयोगे तच्चाक्षुषरूपफलाभावात् न वैजात्यं शक्यकल्पनमिति भावः।

आलोकसंयोगदशायामिति,—आलोकसंयोगस्य हेतुत्वमतेऽपि तत्र चाक्षुषसम्भित्सूचनाय। अन्धकारकालीनेति,—आलोकसंयोगासत्त्वदशोत्पन्नालोकसंयोगकालपर्यन्तस्थायितादृशसंयोगेऽपीत्यर्थः। वैजात्यस्येति द्रव्यचाक्षुषजनकतावच्छेदकनिरुक्तवैजात्यस्येत्यर्थः।

अनन्तेत्यादिः।—संयोगपदं संयोगप्रागभावध्वंसयोरपि उपलक्षकम्। तथाहि तत्र अन्धकारकालीनसंयोगादन्यस्य संयोगस्य तदीयप्रागभावध्वंसयोरपि कल्पनागौरवात् अन्धकारकालीनसंयोगव्यक्तेरेव चाक्षुषसम्पादकत्वे लाघवमिति निरुक्तापत्तिवारणाय आलोकसंयोगस्य हेतुत्वमवश्यमेव वक्तव्यमिति भावः।

साङ्कर्यमुपपादयति तथाहीत्यादिना।—क्रियाजन्यतावच्छेदकजातिं विहायेत्यादि साङ्कर्यघटकस्वाव्याप्यत्वदलसम्पादनाय। चाक्षुष-

जनकतावच्छेदकजातिं विहायेत्यादि स्वाव्यापकत्वदलसम्पादनाय इति बोध्यम् ।

उभयथैवेति ।—क्रियाजन्यतावच्छेदकजातेर्नानात्वे चाक्षुषजनकतावच्छेदकजातेर्नानात्वे वेत्यर्थः ।

[ रूपादिप्रत्यक्ष प्रकरणम् ]

एवं रूपादि-द्रव्यत्वादि-चाक्षुषसम्पादनाय द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायत्वेन हेतुत्वम् ; चक्षुःसंयुक्ते घटादौ द्रव्यत्वादे रूपादेश्च (१) समवायसत्त्वात् । एवं रूपत्वादि-चाक्षुषसम्पादनाय द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायत्वेन हेतुत्वम् । भवति च रूपत्वादिकं द्रव्यसमवेतसमवेतं घटादिस्वरूपद्रव्यसमवेते रूपादौ रूपत्वादिसमवायात्, तत्र चक्षुःसंयुक्तसमवेतसमवायोऽप्यस्ति ; चक्षुःसंयुक्तो घटः, तत्समवेतं रूपादि, तत्र रूपत्वादेः समवायात् । रूपत्वादीत्यादिपदात् (२) नीलत्वादिपरिग्रहः ।

ननु द्रव्यचाक्षुषं प्रति चक्षुःसंयोगस्य द्रव्यसमवेत-

---

(१) 'रूपत्वादेश्च' इति क—पुस्तकपाठः ।

(२) 'रूपादीत्यादिपदात् संख्यादिपरिग्रहः रूपत्वादीत्यादिपदात्' इति क—पुस्तकपाठः ।

चाक्षुषं प्रति चक्षुःसंयुक्तसमवायस्य हेतुत्वे मानाभावः ; द्रव्यसमवेतसमवेतचाक्षुषं प्रति अवश्यकल्प्तकारणताक-(३) चक्षुःसंयुक्तसमवेतसमवायादेव द्रव्यचाक्षुष-द्रव्यसमवेतचाक्षुषयोरुत्पादसम्भवात्। तथाहि कपालिकात्मकं यत् द्रव्यं, तत्समवेतं कपालं, तत्समवेतत्वस्य घटे सत्त्वेन घटस्य द्रव्यसमवेत-(४) समवेतत्वात् भवति घटचाक्षुषं द्रव्यसमवेतसमवेतचाक्षुषम्। तच्च चक्षुःसंयुक्ता या कपालिका, तत्समवेतं यत् कपालं, तत्समवेतत्वस्य घटे सत्त्वेन चक्षुःसंयुक्त-समवेतसमवायादेव तदुत्पादसम्भवः। एवं कपाल-रूपद्रव्यसमवेतघटे रूपादेः समवायसत्त्वात् रूपादि-चाक्षुषमपि चक्षुःसंयुक्त-समवेतसमवायादेव भविष्यति। एवं सर्व्वत्र अवयव-(५) मादाय कारणसम्पत्तिरवसेया।

अत्रोच्यते ;—द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तमहत्-(६) समवेतसमवायत्वेनैव हेतुत्व-मवश्यं वाच्यम् ; इतरथा परमाणुमात्रचक्षुःसंयोगा-

(३) 'कल्प्तकारणकात्' इति ग—पुस्तकपाठः।

(४) 'द्रव्यसमवेतत्वात्' इति क—पुस्तकपाठः।

(५) 'अवयवावयवसादाय' इति ग—पुस्तकपाठः।

(६) 'महत्' इति ग—पुस्तके नास्ति।

दपि रूपत्वादिचाक्षुषापत्तेः। चक्षुःसंयुक्तो यः परमाणुः, तत्समवेतं यत् रूपादि, तत्समवायस्य रूपत्वादौ सत्त्वात्। कारणतावच्छेदके महत्त्वनिवेशे तु नायं दोषः; चक्षुःसंयुक्तस्य परमाणोर्महत्त्वाभावात्। इत्थञ्च चक्षुःसंयुक्तमहत्समवेतसमवायस्य कार्य्यतावच्छेदकं न द्रव्यसमवेतसमवेतचाक्षुषत्वम्; त्रसरेणोस्तद्रूपस्य चाक्षुषे व्यभिचारात्; त्रसरेणोः परमाणुरूपद्रव्यसमवेत-द्व्यणुकसमवेतत्वात् त्रसरेणुरूपस्य द्व्यणुकरूपद्रव्यसमवेत-त्रसरेणुसमवेतत्वात्, तयोश्च चक्षुःसंयुक्तमहत्समवेतसमवायाभावात् परमाणुद्व्यणुकयोर्महत्त्वाभावात्। अतः सद्विन्नसमवेत-चाक्षुषत्वमेव तत्कार्य्यतावच्छेदकं वाच्यम्। तथा च त्रसरेणुतद्रूपयोश्चाक्षुषे न व्यभिचारः; तयोः सत्तावत्त्वेन सद्विन्नत्वाभावात्। एवं सत्तावतां चाक्षुषं न चक्षुःसंयुक्तमहत्समवेत-समवायात् निर्वहतीति द्रव्यचाक्षुषं प्रति चक्षुःसंयोगस्य द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायस्य हेतुत्वमावश्यकमिति दिक्। अतिविस्तरस्तु अस्माकं वितर्कवादार्थमञ्जर्य्यामनुसन्धेयः (७)।

(७) 'अतिविस्तरस्तु तर्कवादार्थमञ्जर्य्यामनुसन्धेय' इति क—पुस्तकपाठः।

ननु निरुक्तेन रूपेण द्रव्यचाक्षुषमेव समुपपादितं द्रव्यवृत्तिगुणादि-चाक्षुषस्य तु कथमुपपत्तिरित्याकाङ्क्षायामाह—एवमित्यादि। रूपा-दीत्यादिपदेन चक्षुर्योग्यगुणमात्राणां द्रव्यत्वादीत्यादिपदेन च चक्षु-र्योग्यजातिमात्राणामुपग्रहः। इदञ्च क्रियाया अपि योग्यवृत्तेरुप-लक्षणं वेदितव्यम्, अत एव 'क्रियां जातिं योग्यवृत्तिं समवायञ्च ताट-शम्। गृह्णाति चक्षुः सम्बन्धादालोकोद्भूतरूपयोः॥' इति विश्वनाथ-पादाः प्राहुः।

हेतुत्वमिति, अत्र विषयता-दैशिकविशेषणते कार्य्यतावच्छेदक-कारणतावच्छेदकसम्बन्धौ। वस्तुतस्तु निरुक्तचाक्षुषं प्रति निरुक्त-रूपेण चक्षुःसंयुक्तसमवायस्य हेतुत्वापेक्षया स्वसंयुक्तसमवेतत्वसम्बन्धेन चक्षुषः कारणत्वकल्पने लाघवात् ताटशसम्बन्धेन चक्षुष्ट्वेनैव कारणत्वं कल्पनीयम्, प्रकृते लाघवञ्च कारणतावच्छेदकधर्म्मरूपेण ताटशसम-वायत्वस्य संसर्गतानियामकसंसर्गतया च ताटशसमवायप्रतियोगिक-विशेषणताया अभानप्रयुक्तमेव प्रतिपत्तव्यम्।

नन्वेवमपि रूपादिगुणगतजातीनां चक्षुर्योग्यानां चाक्षुषं नोपपद्यते चक्षुःसंयुक्तसमवेतत्वस्य तत्राभावात् द्रव्यसमवेतचाक्षुषत्वस्य च कार्य्य-तावच्छेदकस्य तदवृत्तित्वादित्याशङ्क्याह एवं रूपत्वादीत्यादि। निरुक्त-रूपकार्य्यकारणभावेन प्रकृतमुपपादयति 'भवति च रूपत्वादिक'-मित्यादिना।

द्रव्यचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयोगत्वेन द्रव्यसमवेतचाक्षुषं प्रति च चक्षुःसंयुक्तसमवायत्वेन कल्पितस्य कार्य्यकारणभावद्वयस्य द्रव्यसमवेतसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवेतसम-वायत्वेन अवश्यकल्पनीयकार्य्यकारणभावमादाय वैयर्थ्यमाशङ्कते नन्वित्यादिना। घटादिरूपद्रव्यचाक्षुषस्थले निरुक्तं कार्य्यकारणभाव-मुपपादयति तथाहीत्यादिना। आशङ्कां समाधत्ते 'अत्रोच्यत' इत्या-दिना।

एतत् सर्वमभिप्रेत्यैव न्यायकन्दल्यादिकारा अपि षोढा सन्निकर्षान् प्रत्यक्षव्यापारभूतानाहुः ;—यदुक्तं, 'तत्र संयोगाद् द्रव्यग्रहणम्, संयुक्तसमवायाद् गुणादिप्रतीतिः, संयुक्तसमवेतसमवायाद् गुणत्वादिज्ञानं, समवायात् शब्दग्रहणम्, समवेतसमवायात् शब्दत्वग्रहणम्, सम्बद्धविशेषणतया च अभावग्रहणमिति षोढा सन्निकर्षः।' इति।

---

[ द्रव्यादि स्पार्शनादिप्रकरणम् ]

एवं द्रव्यस्पार्शनं प्रति त्वक्संयोगत्वेन हेतुत्वं वाच्यम्,(१) अतस्त्वक्संयोगविरहदशायां घटादेर्न स्पार्शनमिति। न च प्रभायाः स्पार्शनं किमिति न जायते ; त्वक्संयोगस्य तत्रापि सत्त्वादिति वाच्यम्, द्रव्यस्पार्शनं प्रति उद्भूतस्पर्शत्वेनापि(२) हेतुत्वात्। तथा च प्रभाया उद्भूतस्पर्शविरहात् न स्पार्शनमिति द्रव्यसमवेतस्पार्शनं प्रति त्वक्संयुक्तसमवायत्वेन हेतुत्वम्, अतो द्रव्यत्वादेः स्पर्शादेश्च(३) स्पार्शनम्। द्रव्यसमवेत-समवेतस्पार्शनं प्रति त्वक्संयुक्तसमवेतसमवायत्वेन हेतुत्वम्, अतः स्पर्शत्वादेः स्पार्शनमिति।

एवं द्रव्यत्वविशिष्ट(४)लौकिकविषयतासम्बन्धेन

---

(१) 'वाच्य'मिति क—पुस्तके नास्ति।

(२) 'उद्भूतस्पर्शवत्त्वेनापि' इति ग—पुस्तकपाठः।

(३) 'द्रव्यत्वादेः स्पार्शनम्' इति ग—पुस्तकपाठः।

(४) 'द्रव्यत्वविशिष्टविषयकलौकिके'ति ग— पुस्तकपाठः।

सं प्रति मनःसंयोगत्वेन हेतुत्वम्, अत आत्मनो नसम्। द्रव्यसमवेतमानसं प्रति मनःसंयुक्त-मवायत्वेन हेतुत्वम्, अतः सत्ताद्रव्यत्वात्मत्वानां बुद्धिसुखादीनाञ्च मानसमिति(५)। एवं द्रव्यसम-वेत-समवेतमानसं प्रति मनःसंयुक्तसमवेतसमवाय-त्वेन हेतुत्वं वाच्यम्, अतो ज्ञानत्वादीनां मानस-मिति(६)।

एवं रसरासनं प्रति रसनसंयुक्तसमवायत्वेन हेतुत्वम्। रासनत्वञ्च प्रत्यक्षत्वव्याप्यजातिविशेषो रसनेन्द्रियजन्यप्रत्यक्षमात्रवृत्तिः। अत्र च इत्थं कार्य्यकारणभावः,—रसत्वविशिष्ट-लौकिकविषयता-सम्बन्धेन रासनं प्रति स्वरूपसम्बन्धेन रसनसंयुक्त-महत्समवायो हेतुः। भवति च दुग्धादिरसे रसत्व-विशिष्ट-लौकिकविषयतासम्बन्धेन रासनम्, तत्र रसन-संयुक्तसमवायोऽस्ति; रसनसंयुक्ते दुग्धादौ रसस्य मधु-रादेः समवायात्। रसत्वेऽपि लौकिकविषयतासम्ब-न्धेन रासनं जायते, तत्र रसनसंयुक्त-समवायो नास्तीति व्यभिचारवारणाय रसत्वविशिष्टेत्युक्तम्। असन्निकृष्टरसेऽपि रसत्वविशिष्टविषयतासम्बन्धेन

(५) 'मानसत्वमिति' इति ग—पुस्तकपाठः।

(६) 'मानसत्वमिति' इति ग—पुस्तकपाठः।

अलौकिकरासनप्रत्यक्षोदयाद् व्यभिचारवारणाय सामान्यतो विषयतां परित्यज्य लौकिकविषयतेत्युक्तम्। तथा च तत्र लौकिकविषयतासम्बन्धेन रासनानुत्पादात् न व्यभिचारः। दुग्धादि-द्व्यणुकघटितसन्निकर्षात् मधुरादिरासनवारणाय कारणावच्छेदके महत्त्वनिवेशः। तथा च रसनसंयुक्तद्व्यणुकस्य महत्त्वाभावात् नोक्तदोषः।

एवं रससमवेतत्वविशिष्टलौकिकविषयतासम्बन्धेन रासनं प्रति स्वरूपसम्बन्धेन रसनसंयुक्तमहत्समवेतसमवायो हेतुः। भवति च रससमवेतत्वविशिष्टलौकिकविषयतया(७) रासनं रसत्व-मधुर(८)-त्वादौ। तत्र रसनसंयुक्तमहत्समवेतसमवायोऽस्ति, रसनसंयुक्ते महति दुग्धादौ समवेतो यो मधुरादिस्तत्र रसत्व-मधुरत्वादेश्च समवायसत्त्वात्। अत्रापि पदव्यावृत्तिः पूर्वोक्तादिशा अवसेया।

एवं गन्धघ्राणजं प्रति घ्राणसंयुक्तमहत्समवायो(९) हेतुः। गन्धसमवेतघ्राणजं प्रति घ्राणसंयुक्तमहत्समवेतसमवायो हेतुः। घ्राणजत्वञ्च प्रत्यक्षत्व-

---

(७) 'रससमवेतत्वविशिष्टस्य लौकिकविषयतया' इति ग—पुस्तकपाठः।

(८) 'रासनं प्रति' इति क—पुस्तकपाठः।

(९) 'संयुक्तसमवायो हेतुः' इति क—पुस्तकपाठः।

व्याप्यजातिविशेषः। अत्रापि कार्य्यकारणभावः पूर्वोक्तरीत्या प्रत्येतव्यः, ग्रन्थगौरवभयाद् विशिष्य नोक्तम्।

आदौ चाक्षुष-चक्षुःसंयोगादीनां कार्य्यकारणभावमुक्त्वा स्पार्शन-त्वक्संयोगादीनां कार्य्यकारणभावमाह—एवमित्यादिना। स्पार्शनमिति, स्पार्शनत्वं चाक्षुषत्वादिवत् प्रत्यक्षत्वव्याप्यजातिविशेषः। त्वक्संयोगत्वेनेति, अत्र त्वक्पदं न चर्ममात्रपरम्, तथात्वे सत्यपि कारणान्तरसमवहितचर्मसंयोगे क्वचापि स्पार्शनं, क्वचापि च न स्पार्शनमिति नियमस्य उपपादयितुमशक्यत्वात्, परं चर्ममात्रविलक्षण-त्वगिन्द्रियपरमेव तत्।

उद्भूतस्पर्शत्वेनापीति,—एतन्मते उद्भूतस्पर्शस्य समवायेन कारणता। उद्भूतस्पर्शवत्त्वेनापीति पाठे तु कारणतेयं तादात्म्येन सम्बन्धेन प्रत्येतव्या। त्वाचप्रत्यक्षे उद्भूतस्पर्शस्य उपयोगमाह विश्वनाथः,—'उद्भूतस्पर्शवद्द्रव्यं गोचरः सोऽपि च त्वचः'। इति सन्दर्भेण कारिकावल्याम्।

द्रव्यत्वादेः स्पार्शनमिति,—तथाहि अस्ति किल द्रव्यत्वादिकं द्रव्यसमवेतं, तत्र च त्वक्संयुक्तसमवायस्य सत्त्वात् न दोषः। अथ द्रव्यसमवेतस्पर्शवृत्तिस्पर्शत्वादीनां स्पार्शनमुपपादयति द्रव्यसमवेत-स्पार्शनमित्यादिना।

अत्रापि द्रव्यस्पार्शनत्वावच्छिन्नं प्रति त्वक्संयोगत्वादिना गुरु-धर्मेण कारणतामपेक्ष्य संयोगादिना सम्बन्धेन त्वक्त्वेन कारणतायां लाघवमिति लाघवज्ञानानुगृहीतेन तर्केण लघुधर्मेणैव कारणत्वमभ्युपेयम्। विषयतासम्बन्धेन तत्तच्चाक्षुषस्येव तत्तत्स्पार्शनस्यापि स्व-स्वविषयवृत्तित्वात् त्वक्संयोगादि-सामानाधिकरण्यस्येव संयोगादि-तत्तत्-

सम्बन्धेन त्वचोऽपि तत्समानाधिकरणस्य अव्याघातात् काय्यकारण-भावो न विघटत इति भावः।

इन्द्रियसंयोगकारणकं संयोगेन सम्बन्धेन इन्द्रियकारणकं वा चाक्षुषं स्पार्शनञ्च विविच्य अवशिष्टेषु प्रत्यक्षेषु मानस-रासन-घ्राणज-श्रावणेषु विवेक्तव्येषु मानसस्यैव इन्द्रियसंयोगकारणकत्वात् संयोगेन सम्बन्धेन इन्द्रियकारणकत्वाद्वा तदेव आदौ विवेचयति एवं द्रव्यत्वे-त्यादिना। एतेन वाह्यप्रत्यक्षप्रकरणमसमाप्य कथमन्तरा आभ्यन्तर-प्रत्यक्षविवेकप्रारम्भ इति केषाञ्चिदधिक्षेपो न स्वल्पमपि पदमात्मनो धत्त इति द्रष्टव्यम्।

द्रव्यत्वविशिष्टेति सामानाधिकरण्येन विषयतायां विशेषणम्, द्रव्यवृत्तित्वविशिष्टलौकिकविषयतासम्बन्धेनेति तदोयं तात्पर्य्यमिति भावः। मनःसंयोगत्वेनेति,—अत्रापि संयोगेन सम्बन्धेन मनस्त्वेन कारणत्वमिति निष्कर्षः। वस्तुतस्तु चाक्षुषत्वाद्यवच्छिन्नं प्रति यथा संयोगादिसम्बन्धेन चक्षुरादेरन्वयव्यतिरेकाभ्यां कारणत्वं, तथैव चक्षुःसंयोगादेरपि अन्वयव्यतिरेकाभ्यां व्यापारविधया कारणत्वमङ्गी-कर्त्तव्यमेव, अत एव तत्र तत्र 'स्वजन्यत्वे सति स्वजन्यजनको हि व्यापार' इति व्यापारलक्षणमपि सुसमन्वेति, तस्य तु व्यापारत्वविरहे व्यापारवत्कारणत्वलक्षणं करणत्वं चक्षुरादौ न घटत इति सुधीभिः सर्वमूह्यम्। तदुक्तस्थलेषु चाक्षुषत्वाद्यवच्छिन्नं प्रति संयोगादिना चक्षुरादेरिव समवायादिसम्बन्धेन चक्षुःसंयोगादेरपि तेन तेन रूपेण कारणत्वमभ्युपगन्तव्यमेवेति तत्त्वम्। अत एव जगदीशभट्टाचार्य्याः पक्षताप्रकरणदीधितिटीकायां 'करणव्यापारतया सिद्धहेतुभावस्य परा-मर्शस्य' इति ग्रन्थेन परामर्शस्य करणव्यापारत्वहेतुना अनुमिति-हेतुत्वं संसूचितवन्तः। न च सन्निकर्षकारणतया करणकारणताया गतार्थत्वमिति वाच्यं; करणकारणतायाः सन्निकर्षकारणतोपजीव्य-त्वेन तया तस्या अगतार्थत्वात्, 'नहि यदुपजीव्य यत्

सिध्यति तत् तद्व्याघातक'मिति नियमस्य गदाधरादिभिरुपपत्तिप्रत्वादिति।

अतः सत्तेत्यादिः,—सत्तादीनामात्मवृत्तीनां मनःसंयुक्ते आत्मनि समवेतत्वात् तन्मानसं द्रव्यसमवेतमानसमेव, तस्य विषयतया प्रकृते सत्तादिवृत्तित्वात् मनःसंयुक्तात्मसमवायस्य च स्वरूपेण सम्बन्धेन तत्र वर्त्तमानत्वात् समन्वयः। ज्ञानत्वादीनामिति—आदिपदेन सुखत्व-दुःखत्वादीनां चेतनवृत्तिगुणगत-योग्यजातीनामुपग्रहः। तथाहि द्रव्य-भूते आत्मनि समवेतं यत् ज्ञानादिकं तत्र ज्ञानत्वादेः समवेतत्वात् भवति ज्ञानत्वादिप्रत्यक्षं द्रव्यसमवेत-समवेतमानसम्, तस्य च विषय-तया तादृग्ज्ञानत्वादिषु वर्त्तमानत्वात् मनःसंयुक्तात्मसमवेतज्ञानादि-समवायस्य च तत्रैव सत्त्वात् समन्वयः।

रसत्वविशिष्टेत्यत्रापि वैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन विषय-तायामेव। रसप्रत्यक्षे निरुक्तं कार्य्यकारणभावं सङ्गमयति 'भवति चे'त्यादिना। दुग्धादावित्यादिपदेन द्राक्षादिमधुररसवत्पदार्थमात्र-परिग्रहः। रसत्वविशिष्टेत्युक्तमिति;—तथाहि रसत्वनिष्ठाया रासन-निरूपितविषयतायाः सामानाधिकरण्येन रसत्ववैशिष्ट्याभावात् न तत्र रसत्वविशिष्टविषयतासम्बन्धेन रासनमिति तत्र रसनसंयुक्तसम-वायरूपकारणविरहोऽपि न दोषायेति भावः।

पदव्याहृत्तिरिति पूर्वोक्तादिशेति पूर्वनिरुक्तक्रमेणेत्यर्थः। तथाहि रसेऽपि लौकिकविषयतासम्बन्धेन रासनप्रत्यक्षोत्पादात् तत्र च रसन-संयुक्तमहत्त्वसमवेतसमवायस्य कारणस्य अभावात् व्यभिचारवारणाय रससमवेतत्वविशिष्टेत्युक्तम्। न च दुग्धादिगत-रसस्यापि रसनसंयुक्त-दुग्धावयव-समवेतदुग्धादिसमवेतत्वात् निरुक्तकार्य्यकारणभावेऽपि व्यभिचाराभावेन विशिष्टान्तदलं व्यर्थमिति वाच्यं; त्रसरेणुगतरस-प्रत्यक्षे तथापि व्यभिचारात्, त्रसरेणुसमवायि-द्रव्यकस्य महत्त्वाभावात् तत्समवेतरसस्य तादृग्रूपेण महत्समवेतसमवायस्य असम्भवादित्या-

दिकमूहनीयम्। अलौकिकप्रत्यक्षे व्यभिचारवारणाय लौकिकेति विषयताविशेषणम्। परमाणु-द्व्यणुकगत-रसवृत्तित्वविशिष्टरसत्वप्रत्यक्ष-वारणाय महदिति। महत्समवेतसमवाय इति महत्समवेतनिरू-पितत्वविशिष्टसमवाय इत्यर्थः। तेन रसत्वस्य दुग्धादिरससाधारणस्य सामान्यस्य परमाणु द्व्यणुकगतरसेऽपि वर्त्तमानत्वात् न तदन्तर्भावेण तत्प्रत्यक्षमिति ध्येयम्।

---

[ श्रावणप्रत्यक्षप्रकरणम् ]

शब्दत्वविशिष्टलौकिकविषयतासम्बन्धेन श्रावणं प्रति स्वरूपसम्बन्धेन श्रोत्रसमवायो हेतुः। अतो नासन्निकृष्टशब्दानां श्रावणम्। श्रावणत्वञ्च प्रत्यक्षत्व-व्याप्यजातिविशेषः। श्रोत्रत्वञ्च कर्णशष्कुल्यवच्छिन्न-नभस्त्वम्।

शब्दसमवेतत्वविशिष्टलौकिकविषयतासम्बन्धेन श्रावणं प्रति श्रोत्रसमवेतसमवायत्वेन हेतुत्वम्, अतः शब्दत्व-कत्व-खत्वादीनां श्रावणमिति। ननु कदाचित् ककारश्रावणं जायते, कदाचित् खकारश्रावणमित्यत्र किं नियामकमिति चेत्, यदा कर्णा(१)वच्छेदेन

---

(१) 'यदा कारणतावच्छेदेन यस्तिष्ठति' इति क—पुस्तकपाठः।

यस्तिष्ठति, तदा तस्य श्रावणं, तत्सत्त्वे किं नियामकमिति चेत्, विजातीयवायुसंयोग एवेति गृहाण। अवच्छेदकतासम्बन्धेन कत्वावच्छिन्नं प्रति विजातीयवायुसंयोगत्वेन हेतुत्वात्। एवं खत्वावच्छिन्नं प्रति विजातीयवायुसंयोगानां हेतुत्वं वाच्यम्। वैजात्यानि च विभिन्नानि, इतरथा ककारोत्पत्तिकाले खकारादेरपि उत्पादापत्तेः। शब्दनाशश्च स्वोत्तरोत्पन्न-(२) विभुविशेषगुणात्, योग्यविभुविशेषगुणनाशं प्रति स्वोत्तरोत्पन्न-(३)विभुविशेषगुणत्वेन जनकत्वम्। भवति च ककारादिनाशः स्वोत्तरोत्पन्न-(४)खकारादिति इति। स्वोत्तरोत्पन्न-(५)विशेषगुणसत्त्वेऽपि (६) संस्कारानाशात् विशेषगुणे योग्यत्वं विशेषणं दत्तम्। संस्कारश्च न योग्यः अतीन्द्रियत्वात्।

मीमांसकास्तु ककारादयो नित्या एव, अत एव पूर्वं श्रुतो यो गकारः स एवायमिति अभेदप्रत्यभिज्ञा भवति। नन्वेवम्(७) उत्पन्नो गकारो विनष्टो गकार इत्यादिप्रतीतेः का वार्त्तेति चेत् भ्रमत्वमेव। न च

---

(२)—(५) 'स्वोत्तरोत्पन्न' त्यत्र 'श्रोत्रोत्पन्ने'ति सर्वत्र क—पुस्तकपाठः।

(६) 'विशेषगुणत्वेऽपि' इति ग—पुस्तकपाठः।

(७) 'न चवम्' इति क—पुस्तकपाठः।

वाधकं विना प्रतीतेर्भ्रमत्वायोग इति वाच्यं, अनन्त-ध्वंस-प्रागभाव-कल्पनागौरवस्यैव वाधकत्वात्। न च ककारादीनां नित्यत्वे ककारप्रत्यक्षोत्पत्तिकाले खकारादिप्रत्यक्षं स्यादिति वाच्यम्, विभिन्नवैजात्यानि स्वीकृत्य ककारादिश्रावणं प्रति विजातीय-वायुसंयोगत्वेन हेतुत्वात्, तथा च ककारश्रावणप्रत्यक्षोत्पत्तेः पूर्वं खकारादिश्रावण-जनकविजातीय-तत्तद्वायुसंयोगरूपकारणाभावात् न खकारादि-श्रावणमित्याहुः।

तदसत्; अस्मन्मते हि विजातीयवायुसंयोगानां कार्य्यतावच्छेदकं कत्वादिकम्, भवन्मते च कश्रावणत्व-खश्रावणत्वादिकमिति गौरवात्। न च भवन्मते अनन्तध्वंस-प्रागभावकल्पने गौरवमिति वाच्यं, तुल्यत्वात्। तथाहि अस्मन्मते विजातीयवायुसंयोगद्वितीयक्षणे ककारादुत्पत्तिः, तृतीयक्षणे तच्छ्रावणम्, भवन्मते च वायुसंयोग-द्वितीयक्षणेऽपि ककारादिश्रावणं, भवन्मते ककारादे-र्नित्यतया वायुसंयोगोत्पत्तिकालेऽपि तत्सत्त्वात्। इत्थञ्च यथा अस्माकं शब्दध्वंस-प्रागभावकल्पना, तथा भवतां विजातीयवायुसंयोगद्वितीयक्षणोत्पन्न-ककारादिश्रावण-

ध्वंस-प्रागभावकल्पना। अस्मन्मते च वायुसंयोग-द्वितीयक्षणे ककारादिश्रावणमेव न सम्भवति, पूर्वककाराद्यभावात्, लौकिकप्रत्यक्षं प्रति विषयस्य(८) हेतुत्वादिति दिक्।

श्रोत्रोत्पन्नस्यैव शब्दस्य श्रोत्रेण ग्रहणनियमात् शब्दश्रावणं प्रति श्रोत्रसमवायस्य हेतुत्वं निर्वक्ति शब्दत्वेत्यादिना। असन्निकृष्टशब्दानामिति,—श्रोत्रेन्द्रियोपाधिभूत-कर्णशष्कुलीभिन्नदेशावच्छेदेन समुत्पन्नानामित्यर्थः। अत एव प्रशस्तपादभाष्ये 'वेणुपर्वविभागाद् वेणुकाद्य-विभागाच्च शब्दाच्च संयोगविभागनिष्पन्नाद् वीचीसन्तानवच्छब्दसन्तान इत्येवं सन्तानेन श्रोत्रप्रदेशमागतस्य ग्रहणम्' इति भाष्यकृतः प्राहुः।

शब्दसमवेतत्वविशिष्टेति,—अत्रापि वैशिष्ट्यं सामानाधिकरण्य-सम्बन्धेन विषयतायां विशेषणम्।

शब्दत्वेत्यादिः,—शब्दत्व-कत्व-खत्वादयो जातयः, तासाञ्च श्रोत्र-समवेते ककारादौ वर्त्तमानत्वात् तादृग्रहेतुना श्रावणोपपत्तिः।

विजातीयेत्यादिः,—तथाहि अभिमतवर्णोच्चारणे कर्त्तव्ये पुरुषस्य प्रथमत इच्छा, अनन्तरं प्रयत्नः, ततश्च तमेव प्रयत्नमपेक्षमाणात् आत्म-वायुसंयोगात् कोष्ठे वायौ कर्म्म, तेन च कोष्ठो वायुरूर्द्धं गच्छन् कण्ठादीनभिहन्ति, ततश्च तदभिघातानन्तरं कण्ठादेः कोष्ठवायुना सह संयोगात् यः स्थानाकाशसंयोगः तस्मादेवासमवायिकारणाद् वर्णोत्पत्तिः। तदेवं कण्ठादिस्थानेन कोष्ठवायुसंयोगस्य विजातीयस्य समयादिभेदेन तादृशककारखकारादिविजातीयवर्णोत्पादनानुकूल-त्वमिति सारः। प्रशस्तपादभाष्यकृतामपि अत्रैव खरस इत्यनु-सन्धेयम्।

---

(८) 'द्वितीयस्य' इति ग—पुस्तकपाठः।

योग्यविभित्यादिः,—समानाधिकरणस्य रूपाद्यनन्तरोत्पन्नस्य रसादेः रूपादिविनाशजनकतायां बाधात् विभिति। तथाहि तादृश रूपादीनां योग्यविशेषगुणत्वेऽपि विभुविशेषगुणत्वाभावात् न व्यभिचारः। योग्यत्वविशेषणव्यावृत्तिस्तु मूल एवानुसन्धेया।

इत्यादिप्रतीतेरिति, अत्रादिपदेन तीव्रः ककारः, मन्दः ककार इत्यादिः तीव्रत्वमन्दत्वादिप्रतीतिरपि ऊहनीया। भ्रमत्वमेवेति,—तथाहि शब्दस्य नित्यत्वेऽपि अभिव्यक्तेरसार्वदिकत्वात् अभिव्यक्त्यनभिव्यक्तिरूपदोषाभ्यामेव तस्य उत्पत्तिविनाशप्रतीतिर्भ्रमरूपा भवति न तु वास्तवी। तीव्रत्वमन्दत्वादिधर्मास्तत्र तत्र औपाधिका एव न तु स्वाभाविका इति। तदुक्तं वैशेषिकदर्शनोपस्कारे 'ननु स एवायं गकार इति प्रत्यभिज्ञैव स्थैर्यसाधिका, न चैषा 'तीव्रो गकारो मन्द्रो गकार' इति प्रतीत्या विरुद्धधर्मं गोचरयन्त्या बाध्यते तीव्रत्वादेस्तत्रौपाधिकत्वादित्या'दिना।

'अस्मन्मत' इति शब्दानित्यतावादिमत इत्यर्थः। 'भवन्मत' इति शब्दनित्यतावादिमीमांसकमत इत्यर्थः। 'न च भवन्मत' इत्यत्र भवन्मत इत्यस्य शब्दानित्यतावादि-तार्किकमत इत्यर्थः।

---

[ अभाव-प्रत्यक्षप्रकरणम् ]

विशेषणतासन्निकर्षेण अभावप्रत्यक्षं जन्यते। तथाहि द्रव्यवृत्त्यभावचाक्षुषं प्रति चक्षुः-(१)संयुक्तविशेषणता हेतुः। भवति च भूतलादौ घटाभावादिचाक्षुषं चक्षुःसंयुक्तविशेषणतासन्निकर्षात्, चक्षुःसंयुक्त-

(१) चक्षुरिति ग—पुस्तके नास्ति।

भूतलादौ घटाभावादेः (२) विशेषणतासम्बन्धेन वृत्तेः।

एवं द्रव्यसमवेतवृत्त्यभावचाक्षुषं प्रति चक्षुः-संयुक्तसमवेतविशेषणता हेतुः ; अतो रूपादौ एकत्वाद्यभावचाक्षुषम्। चक्षुःसंयुक्तद्रव्यं घटादिस्तत्-समवेते (३) रूपादौ एकत्वाद्यभावस्य विशेषणतासम्बन्धेन वृत्तेः।

एवं द्रव्यवृत्त्यभावस्पार्शनं प्रति त्वक्संयुक्त-विशेषणता हेतुः। अतो भूतलादौ घटाद्यभाव-स्पार्शनम् ; त्वक्संयुक्तभूतलादौ घटाद्यभावस्य विशे-षणतासम्बन्धेन वृत्तेः। द्रव्यसमवेतवृत्त्यभावस्पार्शनं प्रति त्वक्संयुक्तसमवेतविशेषणता हेतुः। अतः एक-त्वादौ परिमाणत्वाद्यभावस्पार्शनं, त्वक्संयुक्तो घटादिः, तत्समवेतम् एकत्वादि, तत्र परिमाणत्वाद्य-भावस्य विशेषणतासम्बन्धेन वृत्तेः।

एवम् आत्मवृत्त्यभावमानसं प्रति मनःसंयुक्त-विशेषणता हेतुः ; अतः आत्मनि सुखत्वाद्यभावमानसं, मनःसंयुक्त आत्मनि सुखत्वाद्यभावस्य विशेषणतासम्ब-

(२) 'यत्र भूतलादौ घटाद्यभावचाक्षुषं तत्र चक्षुःसंयुक्ते भूतलादौ घटाभावस्य' इति ग—पुस्तकपाठः।

(३) 'तत्र समवेते' इति ग—पुस्तकपाठः।

म्बेन वृत्तेः। एवमात्मसमवेतवृत्त्यभावमानसं प्रति मनःसंयुक्तसमवेतविशेषणता हेतुः; अतो ज्ञानादौ सुखत्वाद्यभावमानसं, मनःसंयुक्त आत्मनि समवेतं यत् ज्ञानादि, तत्र सुखत्वाद्यभावस्य विशेषणतासम्बन्धेन वृत्तेः।

एवं द्रव्यवृत्त्यभावश्रावणं प्रति श्रोत्रविशेषणता हेतुः; अत इदानीं ककारादिर्नास्तीत्याकारक-ककारादाद्यभावश्रावणम्। एवं द्रव्यसमवेतवृत्त्यभावश्रावणं प्रति श्रोत्रसमवेतविशेषणता हेतुः; अतः ककारादौ खत्वाद्यभावश्रावणं, श्रोत्रसमवेते ककारादौ खकारादाद्यभावस्य विशेषणतासम्बन्धेन वृत्तेः (४)।

एवम् अभावरासनस्थले अभावघ्राणजस्थले च कार्य्यकारणभावो बोध्यः (५)।

नन्वेवमपि भूतलादौ पिशाचाद्यभावचाक्षुषं स्यात्, घटाभाव इव तत्रापि चक्षुःसंयुक्तविशेषणतासत्त्वात्। न च अभावप्रत्यक्षं प्रति योग्यानुपलब्धेरपि हेतुत्वात् (६) पिशाचस्य अतीन्द्रियतया योग्यानुप-

---

(४) 'खकाराद्यभावश्रावणं विशेषणतासम्बन्धेन वृत्तेः' इति क—पुस्तकपाठः।

(५) 'बोद्धव्यः' इति क—पुस्तकपाठः।

(६) 'हेतुत्वात् तथा च पिशाचस्य' इति क—पुस्तकपाठः।

लब्धेरभावात् न तत्प्रत्यक्षमिति वाच्यम्; योग्यानुपलब्धेर्निर्वक्तुमशक्यत्वात्। तथाहि योग्यानुपलब्धिः किं योग्यस्य अनुपलब्धिः? किं वा योगि अनुपलब्धिः?

नाद्यः; स्तम्भः पिशाचो नेति अन्योन्याभावप्रत्यक्षं न स्यात्, पिशाचस्य अयोग्यत्वात्। न चेष्टापत्तिः, पिशाचात्यन्ताभावस्य प्रत्यक्षं न भवति, पिशाचान्योन्याभावस्य प्रत्यक्षं भवत्येवेति सर्वजनसिद्धत्वात्।

न द्वितीयः; भूतलादौ पिशाचात्यन्ताभावप्रत्यक्षोत्पादापत्तेः (७) योगि भूतलादौ पिशाचानुपलब्धेः सत्त्वात्। मैवम्; अत्यन्ताभावप्रत्यक्षं प्रति हि योग्यस्यानुपलब्धिः कारणम्, अन्योन्याभावप्रत्यक्षं प्रति तु योगि अनुपलब्धिः कारणं, तथा च पिशाचात्यन्ताभावस्य प्रत्यक्षं न भवति, पिशाचस्य अयोग्यतया योग्यस्य अनुपलब्धेरभावात्, स्तम्भादौ पिशाचान्योन्याभावस्य प्रत्यक्षं भवत्येव योगि स्तम्भादौ (८) पिशाचानुपलब्धिसत्त्वादिति केचित्।

---

(७) 'प्रत्यक्षोत्पत्तेः' इति ग—पुस्तकपाठः।

(८) 'योग्यस्तम्भादौ' इति क—पुस्तकपाठः।

तदसत्; पृथिवीपरमाणौ जलत्वात्यन्ताभाव-प्रत्यक्षापत्तेः (९)। योग्यस्य जलत्वस्य अनुपलब्धेः परमाणौ सत्त्वात्। न च द्रव्यवृत्त्यात्यन्ताभाव-(१०)चाक्षुषं प्रति चक्षुःसंयुक्तमहद्विशेषणतात्वेन हेतुत्वमवश्यं वाच्यम्; अन्यथा (११) परमाणौ घटाद्यभावचाक्षुषापत्तेः, चक्षुःसंयुक्ते परमाणौ घटाद्यभावविशेषणतायाः सत्त्वात्। चक्षुःसंयुक्तमहद्विशेषणतात्वेन हेतुत्वोक्तौ नायं दोषः; चक्षुःसंयुक्तपरमाणोर्महत्त्वाभावात्। तथा च पृथिवीपरमाणौ जलत्वात्यन्ताभाव-चाक्षुषापत्तिर्न सम्भवति; चक्षुःसंयुक्तमहद्विशेषणतायाः अभावादिति वाच्यम्; यत्र जलत्वात्यन्ताभावे स्थूलपृथिवीघटितसन्निकर्षः, तदा स्थूलपृथिव्यामिव पृथिवीपरमाणावपि जलत्वात्यन्ताभावप्रत्यक्षापत्तेः, तत्र स्थूलपृथिवीमादाय चक्षुःसंयुक्तमहद्विशेषणतायाः सत्त्वात्।

अत्रोच्यते;—यत्र धर्मिणि यद्धर्मावच्छिन्नसत्त्वेन आपादकेन यद्धर्मावच्छिन्नस्य उपलम्भ आपादयितुं शक्यते, तत्र तद्धर्माच्छिन्नस्य उपलब्ध्याभावस्तत्र तद्ध-

---

(९) 'प्रत्यक्षोत्पत्तेः' इति ग—पुस्तकपाठः।

(१०) 'द्रव्यवृत्त्यभाव' इति क—पुस्तकपाठः।

(११) 'इतरथा' इति क—पुस्तकपाठः।

र्म्मावच्छिन्नाभाव-लौकिकप्रत्यक्षं प्रति हेतुः। उपलभ्यस्य लौकिकप्रत्यक्षम्(१२)। भवति च भूतलादौ घटत्वावच्छिन्नप्रतियोगिताकाभावप्रत्यक्षं, तत्र 'भूतलं यदि घटवत् स्यात्, तदा तद्वत्तया उपलभ्येत' इत्यापादनसम्भवात्। भूतलादौ पिशाचात्यन्ताभावस्य न प्रत्यक्षं, तत्र 'भूतलं यदि पिशाचवत् स्यात्, तदा पिशाचवत्तया उपलभ्येत' इत्यापादनासम्भवात्, पिशाचस्य अतीन्द्रियत्वात्।

न चेवमपि पृथिवीपरमाणौ जलत्वात्यन्ताभावप्रत्यक्षं स्यात्, तत्रापि 'परमाणुर्यदि चक्षुःसंयुक्तत्वे सति रूपवत्त्वे महत्त्वे च सति जलत्ववान् स्यात्, तदा तद्वत्तया उपलभ्येत' इत्यापादनसम्भवात्। 'यत्र चक्षुःसंयोगोद्भूतरूप-महत्त्व-समानाधिकरणं जलत्वं, तत्र जलत्ववत्तया उपलब्धि'रिति व्याप्तेरिति (१३) वाच्यम्; यद्धर्मावच्छिन्नसत्त्वेन आपादकेन इत्यत्र यद्धर्म्मावच्छिन्नसत्त्वं पक्षावृत्तिविशेषणाविशिष्टत्वेन (१४) विशेषणीयम्, तथा च नोक्तदोषः; अत्र (१५) हि

(१२) 'उपालभ्यः लौकिकप्रत्यक्ष'मिति क—पुस्तकपाठः।

(१३) 'व्याप्तेरिति' एष पाठः क—पुस्तके नास्ति।

(१४) 'पक्षावृत्तिविशेषणत्वात् तद्विशिष्टत्वेन विशेषणीयम्' इति ग—पुस्तकपाठः।

(१५) 'अत्र' इत्यत्र तत्रेति क—पुस्तकपाठः।

जलत्वसत्त्वम् आपादकं परमाणुरूपपक्षावृत्तिविशेषण-विशिष्टमेवेति (१६)।

वस्तुतस्तु अभावप्रत्यक्षं प्रति योग्यानुपलब्धेः कारणत्वमेव (१७) नास्ति। न चैवमपि पिशाचाद्यत्यन्ताभावप्रत्यक्षं किमिति न जायत इति वाच्यम्; लौकिकप्रत्यक्षं प्रति विषयत्वेन हेतुत्वात्। पिशाचाद्यत्यन्ताभावे च न विषयत्वम्; तद्धि लौकिकविषयतावत्त्वम्। न च तदेव कथं पिशाचाद्यत्यन्ताभावे नास्तीति वाच्यम्; पिशाचात्यन्ताभावं साक्षात्करोमि इति प्रतीतेरभावात् तादृशप्रतीतिबलेनैव तत्सिद्धेरिति संक्षेपः (१८)।

भट्टास्तु अभावस्य न प्रत्यक्षम्, किन्तु प्रत्यक्षादिभिन्नं ज्ञानं, तत्करणञ्च योग्यानुपलब्धिरित्याहुः। तदसत्; प्रमाणान्तरकल्पने गौरवात्।

ननु यत्र रसे रसनसंयुक्तसमवायः, गन्धे घ्राणसंयुक्तसमवायः, घटादौ चक्षुःसंयोगश्च, तत्र किं चाक्षुषादिरूपं नानाज्ञानं न जायत इति चेत्, अत्र

---

(१६) 'विशेषणतावच्छिन्नविशिष्टमेवेति' इति ग—पुस्तकपाठः।

(१७) 'करणत्वमपि' इति ग—पुस्तकपाठः।

(१८) 'तद्धि लौकिकविषयतावत्त्वम्' इत्यारभ्य 'संक्षेपः' इत्यन्तपाठः ग—पुस्तके नास्ति।

नैयायिकाः ;—एतादृशविजातीयनानाज्ञानसामग्री एकदा न सम्भवत्येव ; तथाहि 'आत्मा मनसा संयुज्यते, मन इन्द्रियेण, इन्द्रियमर्थेन' इति रीत्या प्रत्यक्षोत्पादात्। तथा च मनसोऽणुतया एकदा रसनादिनानेन्द्रियेण (१९) संयोगासम्भवात् एकदा न नानाज्ञानोत्पादः।

मीमांसकास्तु ;— मनो नाणु, किन्तु विभु(२०)। न च तस्य विभुत्वे मानाभाव इति वाच्यं ; मनो विभु(२१) निःस्पर्शद्रव्यत्वात् आकाशवदित्यनुमानात् तत्सिद्धेः। तथा च मनसो विभुतया एकदापि इन्द्रिय-क्रियया नानेन्द्रियसन्निकर्षसम्भवात् एकदा नाना-ज्ञानं जायत एव, दीर्घशष्कुल्यादौ भक्ष्यमाणे (२२) तथा दर्शनादित्याहुः। तदसत् ; मनसो विभुत्वे सुषु-प्ताच्छेदापत्तेः। सुषुप्तिर्हि तदैव, यदा त्वचं परित्यज्य मनः पुरोततौ(२३) वर्त्तते(२४)। एतच्च मनसो विभुत्वे

---

(१९) 'नानेन्द्रियेण' इत्यत्र 'नानेन्द्रियै' इति सप्तम्यन्तपाठः क—पुस्तके।

(२०) ग—पुस्तके 'नाणु.' इति 'विभुः' इति च विसर्गान्तपाठः।

(२१) अत्रापि 'विभुः' इति विसर्गान्तपाठो ग—पुस्तके।

(२२) 'दीर्घशस्कुलीभक्षणादौ' इति क—पुस्तकपाठः।

(२३) 'पुरीतति' इति क—पुस्तकपाठः।

(२४) 'वर्त्तत इति' इति ग—पुस्तकपाठः।

न सम्भवति, तस्य विभुत्वेन(२५) निष्क्रियत्वात्। दीर्घशष्कुलीभक्षणादौ च एकदा न नानाज्ञानोत्पादः, किन्तु विभिन्नक्षण एव तेषामुत्पादः, सूक्ष्मकालानां विशिष्य अनवगमात् यौगपद्यभ्रम (२६) इति अन्यत्र विस्तरः।

भावविषयकं प्रत्यक्षं विविच्य अभावविषयकं प्रत्यक्षं विवेचयति विशेषणतेत्यादिना। विशेषणतासन्निकर्षेणेत्यस्य स्वसंयुक्तविशेषणत्वादिसन्निकर्षेणेत्यर्थः, शुद्धविशेषणतासन्निकर्षेण प्रत्यक्षकरणानामिन्द्रियाणां प्रकृते विषयसम्बन्धाभावात् प्रत्यक्षकारणत्वानुपपत्तेरिति। अनेन प्रकरणेन अभावोपलब्धिहेतोरनुपलब्धेः प्रमाणान्तरत्वमपि प्रत्याख्यातं भवति।

न च विशेषणतासन्निकर्षेण अभावस्य प्रत्यक्षात्मकज्ञानकल्पनमतेऽपि 'यदि स्यादुपलभ्येतेत्येवं यत्र प्रसज्यते' इत्यादिना योग्यानुपलब्धेः कारणत्वस्यावश्यकताया विश्वनाथादिभिरभ्युपगमेन अनुपलब्धेः कारणत्वकल्पनं विशेषणता-सन्निकर्षकल्पनञ्चापेक्ष्य लाघवादनुपलब्धिमात्रस्य प्रमाणत्वकल्पनमेवोचितमिति वाच्यम्, अनुपलब्धेर्व्यापाराभावेन व्यापारवत्कारणत्वघटितस्य प्रमाणत्वस्य असम्भवात्, अभावज्ञानस्य अधिकरणाविषयकस्य च अननुभवेन अनुपलब्धिजन्याभावज्ञाने अधिकरणस्य भानानुपपत्त्या अभावज्ञानस्य अधिकरणविषयकस्य प्रत्यक्षरूपताया एव अभ्युपगन्तव्यत्वात्; इत्यञ्च अभावस्य विशेषणतासन्निकर्षेण अधिकरणस्य च संयोगादिसन्निकर्षेण एकत्रैव प्रत्यक्षे भानसम्भवेन नानुपपत्तिलेशोऽपीति।

---

(२५) 'विभुत्वे' इति सप्तम्यन्तपाठः ग—पुस्तके।

(२६) 'भ्रम एव' इति क—पुस्तकपाठः।

विशिष्य तत्तद्विशेषणतासन्निकर्षान् ग्राहयति तथाहीत्यादिना। भूतलादौ घटाद्यभावस्य निरुक्तकार्य्यकारणभावमूलकं प्रत्यक्षमुपपादयति भवति चेत्यादिना। विशेषणताविशेषमधिकृत्य स्थलविशेषेषु कार्य्यकारणभावविशेषप्रतिपादनेन द्रव्यसमवेतवृत्त्यभावादीनामपि प्रत्यक्षमुपपादयति एवमित्यादिना।

एवं अभावरासनस्थल इत्यादिः,—एवमिति पूर्ववदित्यर्थः। तथाहि द्रव्यवृत्त्यभावरासनं प्रति रसनसंयुक्तविशेषणता हेतुः, अतः रसनासंयुक्ते तेजसि रसाभावस्य प्रत्यक्षं, तत्र रसनसंयुक्ततेजोविशेषणताया निरुक्तहेतोर्हानेः। द्रव्यसमवेतवृत्त्यभाव-रासनं प्रति रसनसंयुक्तसमवेतविशेषणता हेतुः, अतः रसनसंयुक्ते तेजसि वर्त्तमाने रूपादौ रसत्वाद्यभावप्रत्यक्षं, तत्र तादृशे रूपादौ रसत्वाद्यभावस्य विशेषणतया वृत्तेरित्येवमूह्यम्। घ्राणजस्थलेऽपि द्रव्यवृत्त्यभावघ्राणजं प्रति घ्राणसंयुक्तविशेषणता, द्रव्यसमवेतवृत्त्यभावघ्राणजं प्रति च घ्राणसंयुक्तसमवेतविशेषणता हेतुः, अतः घ्राणसंयुक्ते जलादौ वर्त्तमानस्य गन्धाभावस्य घ्राणसंयुक्तजलादौ वर्त्तमाने रूपादौ च गन्धत्वाद्यभावस्य घ्राणजप्रत्यक्षमुपपद्यत इति ध्येयम्।

स्थूलपृथिवीमादायेति ;—तथाहि य एव जलत्वात्यन्ताभावः स्थूलपृथिव्यां वर्त्तते, तस्यैव पृथिवीपरमाणावपि सत्त्वं प्रतियोगितावच्छेदकभेदेनैव अभावस्य भेदात् अधिकरणभेदेन भेदानभ्युपगमादतः पृथिवीपरमाणुवृत्तिजलत्वाभावस्यापि चक्षुःसंयुक्तमहद्विशेषणत्वमिति भावः। समाधत्ते अत्रोच्यत इत्यादिना। पिशाचस्यातीन्द्रियत्वादिति, पिशाचशरीरस्य पवनोपादानकतया अतीन्द्रियपवनात्मकत्वात् न इन्द्रियग्राह्यत्वम्।

अत्र हीत्यादिः,—अत्रेति 'परमाणुर्यदि चक्षुःसंयुक्तत्वे उद्भूतरूपवत्त्वे महत्त्वे च सति जलत्ववान स्यात्' इत्याद्यापत्तिस्थल इत्यर्थः।

अत्र परमाणुरूपे पक्षे अवृत्ति विशेषणं महत्त्वं, सामानाधिकरण्येन तद्वैशिष्ट्यं प्रकृते जलत्वे सुस्थितमिति आपादकं तादृशविशेषण-विशिष्टमेव, न तु निरुक्तविशेषणाविशिष्टमिति न दोषः।

भट्टास्त्वित्यादिः,—तदुक्तं श्लोकवार्त्तिककारैः—

"न तावदिन्द्रियैरेषा नास्तीत्युत्पद्यते मतिः।
भावांशेनैव संयोगो योग्यत्वादिन्द्रियस्य हि॥" इति
"गृहीत्वा वस्तुसद्भावं स्मृत्वा च प्रतियोगिनम्।
मानसं नास्तिता-ज्ञानं जायतेऽक्षानपेक्षणात्॥" इति च।

अनुपलब्धिस्वरूपमुक्तं वेदान्तपरिभाषायां यथा,—'ज्ञानकरणाजन्या-भावानुभवासाधारणकारणम् अनुपलब्धिरूपं प्रमाण'मिति। इदमनुपलब्धिप्रमाणमेव अभावाख्यं प्रमाणं संगिरन्ते। यथोक्तं श्लोकवार्त्तिककारैः,—

'प्रमाणपञ्चकं यत्र वस्तुरूपे न जायते।
वस्तुसत्तावबोधार्थं तत्राभावप्रमाणता'॥ इति।

उक्तञ्च न्यायकन्दल्यां श्रीधराचार्यैः,—'योऽप्यभावं प्रमाणमिच्छति' इत्यादि। अनुपलब्धिस्वरूपादिविस्तरस्तु वेदान्तपरिभाषायामनुपलब्धिपरिच्छेदे सुधीभिरनुसन्धेयः।

वैशेषिकभाष्यकारास्तु अभावग्राहकं मानं न प्रत्यक्षं, नाप्यभावापरसंज्ञमनुपलब्धिरूपं प्रमाणान्तरमभ्युपयन्ति, परमनुमानमेवेदम्; तदुक्तं,—'अभावोऽप्यनुमानमेव, यथोत्पन्नं कार्यं कारणसद्भावे लिङ्गम्, एवमनुत्पन्नं कार्यं कारणासद्भावे लिङ्गम्' इति। तथाहि ज्ञानं ज्ञेयस्य कार्यं, ज्ञेयं कारणं ज्ञानस्य, अतः ज्ञानेन कार्येण यथा ज्ञेयमनुमीयते, तथैव सत्सु कारणेषु ज्ञानस्यानुत्पादो ज्ञेयाभावं ग्राहयतीति भावः। अत एवोक्तं न्यायकन्दल्यामपि,—'ज्ञानकारणेषु सत्सु ज्ञानयोग्यस्य वस्तुनो ज्ञानानुत्पादोऽभावावगमनिमित्त'मिति।

प्रमाणान्तरकल्पने गौरवादिति ;—तथाहि भूतलादिभावांशे प्रत्यक्षप्रमाणस्यावश्यमङ्गीकर्त्तव्यतया अभावग्रहणमपि तेनैव, न तु प्रमाणान्तरेणेति कल्पनमेव लाघवतो युज्यत इति भावः। न च भावांशेनैव इन्द्रियस्य सम्बन्धो योग्यत्वादिति वाच्यं, 'कार्य्यगम्या हि योग्यता, यथेन्द्रियान्वयव्यतिरेकानुविधायि कार्य्यं भावे दृश्यते, तद्वदभावेऽपीति भाववदभावोऽपि इन्द्रियग्रहणयोग्य एव कार्य्यदर्शनादेव चाक्षेन्द्रियसम्बन्धोऽपि कश्चित् कल्पयिष्यते' इत्यादिना न्यायकन्दलीकारैः समाधानस्य उपपत्तिमत्त्वात्। तदभावग्राहकं मानं नानुपलब्धिरूपं, नाप्यनुमानादिरूपं, परं प्रत्यक्षमेव प्रमाणं तदिति न्यायसिद्धान्तः सिद्धः।

मनसोऽणुतयेत्यादिः,—ननु 'अयौगपद्याज् ज्ञानानां तस्याणुत्वमिहेष्यत' इति विश्वनाथग्रन्थे ज्ञानानामयौगपद्यमेव मनसोऽणुत्वसाधकमुक्तम्, अत्र तु मनसोऽणुत्वमेव अयौगपद्यसाधकतया समुपन्यस्त इति परस्पराश्रयस्य कः समाधिरिति चेत् न अभिप्रायापरिज्ञानात्। तथाहि अत्र यदणुत्वं युगपज्ज्ञानानुत्पादे कारणमुक्तं, तत्र ज्ञापकतया, परं प्रयोजकतया एव, तत्र तु ज्ञापको हेतुरिति तथा च कार्य्येण कारणानुमानस्य सर्वसिद्धतया ज्ञानायौगपद्येन कार्य्येण कारणस्य मनसोऽणुत्वस्य सिद्धिरव्याहतैव। अथवा प्रकृतग्रन्थे मनसोऽणुत्वं प्रति ज्ञानायौगपद्यं न साधकतया अभिप्रेयते, परमन्यदेव सुषुप्तिरूपं वस्तु, अत एव 'मनसो विभुत्वे सुषुप्त्युच्छेदापत्ते'रिति वक्ष्यमाणग्रन्थः सुसङ्गच्छत इति।

निःस्पर्शद्रव्यत्वादिति,—निःस्पर्शत्वमात्रस्य हेतुत्वे गुणादौ व्यभिचार इति द्रव्यपदम्, पृथिव्यादौ द्रव्ये व्यभिचारवारणाय निःस्पर्शपदम्।

मनसो विभुत्व इति,—अत्र विभुत्वपदं मध्यमपरिमाणस्यापि

उपलक्षकम्, मध्यमपरिमाणत्वेऽपि मनसः पुरीततिव्यतिरिक्तदेशावच्छेदेन संयोगस्यावश्यकत्वात् तथैव सुषुप्त्युच्छेदापत्तेः सम्भवात्।

---

[ अलौकिक-सन्निकर्षादिप्रकरणम् ]

अलौकिकः सन्निकर्षश्च त्रिविधः, सामान्यलक्षणाज्ञानलक्षणा-योगजधर्म्म-भेदात्(१)। तत्र आद्या प्रत्यासत्तिः घटत्वादिसामान्यज्ञानम्, यत्किञ्चिद् घटे घटत्वज्ञानानन्तरं(२) घटत्वेन यावद्घटप्रत्यक्षस्य अनुभवसिद्धत्वात्। प्रत्यक्षञ्च इन्द्रियसन्निकर्षं विना न सम्भवत्येव इति असन्निकृष्टघटे इन्द्रियस्य लौकिकसन्निकर्षाभावात् इन्द्रियसन्निकर्षसम्पत्त्यर्थं सामान्यज्ञानस्वरूपालौकिकसन्निकर्षस्य अवश्यं वाच्यत्वात् (३)।

न च आलोकसंयोगाभावदशायां (४) घट इति स्मरणात् घटत्वेन यावद्घटचाक्षुषं स्यात्; घटत्व-

---

(१) आदौ सन्निकर्षशब्देन पुंलिङ्गेन सन्निकर्षस्य समुद्देश्यात् 'सामान्यलक्षण-ज्ञानलक्षण-योगजधर्मभेदादिति पुंलिङ्गान्तपदपाठः साधीयान्।

(२) 'घटघटत्वज्ञानानन्तर'मिति क—पुस्तकपाठः।

(३) 'इन्द्रियस्य लौकिकसन्निकर्षस्य अवश्यं वाच्यत्वा'दित्येतन्मात्रं ग—पुस्तकपाठः।

(४) 'आलोकसंयोगादिविरहदशायाम्' इति क—पुस्तकपाठः।

प्रकारक-यावद्घटविशेष्यक-प्रत्यक्षकारणस्य घटत्वात्मकसामान्यज्ञानस्य तत्र सत्त्वादिति वाच्यम्; तादृशज्ञानस्य यत्किञ्चिद्धर्म्मिनिष्ठलौकिकविषयताकातिरिक्तस्य अलौकतया व्यापकसामग्रीविरहादेव (४) उक्तापत्तिवारणसम्भवात् (५)। न च यत्किञ्चिद्धर्म्मिनिष्ठलौकिकविषयताकचाक्षुषमेव किमिति न जायत इति वाच्यम्; द्रव्यत्वविशिष्टलौकिकविषयतासम्बन्धेन (६) चाक्षुषं प्रति आलोकसंयोगस्य हेतुतया तदभावादेव तदनुत्पादात्।

ज्ञानलक्षणा प्रत्यासत्तिश्च ज्ञानस्वरूपा प्रत्यासत्तिः। न च तस्याः प्रत्यासत्तित्वे मानाभाव इति वाच्यम्; सुरभि चन्दनमित्यादिज्ञाने सौरभादेरपि विषयतया तत्प्रकारकप्रत्यक्षसम्पत्त्यर्थं ज्ञानलक्षणायाः प्रत्यासत्तित्वस्य आवश्यकत्वात्। तद्विषयकप्रत्यक्षस्य तन्निष्ठसन्निकर्षं विना अनुत्पादात् लौकिकसन्निकर्षस्य च घ्राणसंयुक्तसमवायस्य तत्राभावात्; अतो ज्ञानस्वरूपा अलौकिकप्रत्यासत्तिरवश्यम् अभ्युपेया (७)।

(४) 'लौकिकविषयताकचाक्षुषसामग्रीविरहादेव' इति ग—पुस्तकपाठः।

(५) 'उक्तापत्तिवारणात्' इति क—पुस्तकपाठः।

(६) 'द्रव्यनिष्ठलौकिकविषयतासम्बन्धेन' इति क—पुस्तकपाठः।

(७) 'अभ्युपेया' इत्यत्र 'उपेया' इत्येतन्मात्रं' क—पुस्तके।

प्रत्यासत्तिश्च सन्निकर्षः। तत्र इत्थं कार्य्यकारणभावः;—तत्प्रकारकप्रत्यक्षं प्रति तज्ज्ञानत्वेन हेतुत्वम्। न चैवं तद्विशेष्यकमानसप्रत्यक्षं ज्ञानलक्षणप्रत्यासत्तिजन्यं (८) न स्यात्, तत्प्रकारकप्रत्यक्षत्वस्यैव ज्ञानलक्षणाजन्यतावच्छेदकत्वादिति वाच्यम्; चाक्षुषादिस्थल एव हि ज्ञानलक्षणायाः कार्य्यतावच्छेदकं तत्प्रकारकचाक्षुषत्वादिकं, मानसस्थले तु तत्प्रकारकमानसत्वं तद्विशेष्यकमानसत्वञ्चेति (९) न तद्विशेष्यकमानसानुपपत्तिरिति। अत एवोक्तम् उपनीतं विशेषणतयैव भासते, मानसे त्वनियम इति। ज्ञानलक्षणप्रत्यासत्तिजन्यं (१०) यत् प्रत्यक्षं तदेव उपनीतभानाख्यम्।

योगजधर्म्मस्वरूपा अपरा अलौकिकप्रत्यासत्तिरवश्यमुपेया; अत एव योगिनामसन्निकृष्टविषयकं ज्ञानम्। अत एवोक्तं योगो व्यवहितं विप्रकृष्टञ्च गृह्णातीति शृणोति योजनशतादित्यादि चेति।

---

(८) 'ज्ञानलक्षणाप्रत्यासत्तिजन्यम्' इति क—पुस्तकपाठः।

(९) 'मानसत्वञ्च कार्य्यतावच्छेदकमिति' इति ग—पुस्तकपाठः।

(१०) 'ज्ञानलक्षणाप्रत्यासत्तिजन्य'मिति क—पुस्तकपाठः।

प्रत्यक्षमितिद्विविधा, निर्विकल्पिका सविकल्पिका च (११)। तत्र निर्विकल्पकं निष्प्रकारकं ज्ञानं 'घटघटत्वे' इत्याद्याकारकम् (१२)। सविकल्पकञ्च सप्रकारकं ज्ञानं घटत्वादिवैशिष्ट्यावगाहि 'घट' इत्याद्याकारकम्।

प्रकारत्वञ्च (१३) विषयतात्रिशेषः। विषयता च चतुर्विधा; एका निर्विकल्पक-विषयता, अपरा च प्रकारताख्यविषयता; यथा 'घट' इत्यादिज्ञाने घटत्वादिनिष्ठा विषयता(१४)। अपरा विशेष्यताख्यविषयता; यथा तत्रैव ज्ञाने घटादिनिष्ठा विषयता। अपरा सांसर्गिकी विषयता; यथा तत्रैव ज्ञाने घटघटत्वयोर्यः सम्बन्धस्तन्निष्ठा। एवं 'भूतलं घटवत्' इत्यादौ संयोगादिनिष्ठा। विषयत्वं प्रकारत्वं विशेष्यत्वं सांसर्गिकत्वञ्च स्वरूपसम्बन्धविशेषः। स च विषयस्वरूपो ज्ञानस्वरूपो वा इत्यन्यदेतत्। विषयत्वादिकमखण्डोपाधिस्वरूपमतिरिक्तः पदार्थ इत्येकदेशिनः।

---

(११) 'निर्विकल्पका सविकल्पका च' इति ङ—पुस्तकपाठः।

(१२) 'घटघटत्वे इत्याद्याकारक'मिति ग—पुस्तके नास्ति।

(१३) 'प्रकारकत्वञ्च' इति ग—पुस्तकपाठः।

(१४) 'विषयता' इति क—पुस्तके नास्ति।

प्रकारलक्षणञ्च भासमानवैशिष्ट्यप्रतियोगित्वम्। अस्ति च तत् 'घट' इत्यादिज्ञाने घटत्वादौ। तज्ज्ञाने हि घटत्वादेर्वैशिष्ट्यं भासते, तत्प्रतियोगित्वं घटत्वादावस्ति। प्रतियोगित्वञ्च स्वरूपसम्बन्धविशेषः

विशेष्यलक्षणञ्च भासमानवैशिष्ट्यानुयोगित्वम्। अस्ति च तत् 'घट' इत्यादिज्ञाने घटादौ(१५)। तत्र हि भासमानं वैशिष्ट्यं घटघटत्वयोः सम्बन्धः, तदनुयोगित्वस्य घटादौ सत्त्वात्। अनुयोगित्वमपि स्वरूपसम्बन्धविशेषः। प्रतियोगित्वम् अनुयोगित्वञ्च अतिरिक्तपदार्थ इत्येकदेशिनः।

ननु निर्विकल्पके मानाभावः, प्रथममेव 'घट' इति विशिष्टज्ञानोत्पादात्। न च विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात् घटत्वादिस्वरूप-(१६) विशेषणज्ञानं विना घट इत्यादिविशिष्टज्ञानासम्भव इति वाच्यम्; तादृशकार्य्यकारणभावे मानाभावात्। नैवम्, कदाचित् घट इत्याकारकं निरवच्छिन्नघटत्वप्रकारकं ज्ञानं जायते, कदाचित् जातिमान् इत्याकारकं सावच्छिन्नघटत्वप्रकारकं (१७) ज्ञानं जायत

(१५) 'अस्ति च घट इत्यादि ज्ञाने तत्' इति क—पुस्तकपाठः।

(१६) 'स्वरूप' इत्यतः तदनन्तरं ङ—पुस्तकादर्शो न परिप्राप्तः।

(१७) 'अवच्छिन्नघटत्वप्रकारकम्' इति क—पुस्तकपाठः।

इति नियमार्थं निरवच्छिन्नघटत्वप्रकारकं ज्ञानं प्रति निरवच्छिन्नघटत्वज्ञानत्वेन हेतुतायाः सावच्छिन्नघटत्व-प्रकारकबुद्धिं(१८) प्रति सावच्छिन्नघटत्वज्ञानत्वेन(१९) हेतुतायाश्च आवश्यकतया विशेषणज्ञानहेतुतायाः आवश्यकत्वात्।

निरवच्छिन्नप्रकारकत्वञ्च विशेषणांशे अन्या-प्रकारकत्वम्। सावच्छिन्नप्रकारकत्वं(२०) विशेषणांशे अन्यप्रकारकत्वम्। तथा च विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात् निर्विकल्पकसिद्धिरिति साम्प्रदायिकाः।

गुरुचरणास्तु निर्विकल्पकानङ्गीकारे ज्ञान-लक्षणायाः कार्य्यकारणभावकल्पनगौरवम्; तथाहि घटत्वप्रकारकप्रत्यक्षं प्रति घटत्वज्ञानत्वेन हेतुत्व-मिति रीत्या तत्कार्य्यकारणभावकल्पनम्; तच्च निर्विकल्पकानङ्गीकारे न सम्भवति, घट इति लौकिकसन्निकर्षजन्यज्ञानस्य घटत्वप्रकारकत्वात् तत्-पूर्वं(२१) घटत्वज्ञानाभावात्, अतो लौकिकप्रत्यक्षान्य-

(१८) 'अवच्छिन्नघटत्वप्रकारकबुद्धिं' इति क—पुस्तकपाठः।

(१९) 'अवच्छिन्नघटत्वज्ञानत्वेन' इति क—पुस्तकपाठः।

(२०) 'अवच्छिन्नप्रकारकत्वञ्च' इति क—पुस्तकपाठः।

(२१) 'तत्पूर्वञ्च' इति ग—पुस्तकपाठः।

घटत्वप्रकारकप्रत्यक्षत्वं तत्कार्य्यतावच्छेदकं वाच्यम्; तथा च न दोषः; तस्य लौकिकप्रत्यक्षान्यत्वाभावात्। इत्थञ्च लौकिकप्रत्यक्षान्यत्वनिवेशे गौरवम्। निर्विकल्पकाङ्गीकारे च लौकिकप्रत्यक्षान्यत्वं न कार्य्यतावच्छेदके निविशते, घट इति लौकिकप्रत्यक्षपूर्वं निर्विकल्पकात्मकघटत्वज्ञानस्य सत्त्वेन व्यभिचाराभावादिति (२२) प्राहुः।

ननु तद्वति तदवगाहित्वे सति (२३) तत्प्रकारकानुभवत्वमिति प्रमालक्षणे भ्रमे अतिव्याप्तिवारणाय सत्यन्तमुपात्तम् (२४), तच्चायुक्तम्; भ्रमस्यैवानङ्गीकारात्। न च इदं रजतमिति शुक्तौ रजतत्वप्रकारकज्ञानमेव भ्रमः, तद्भाववति तत्प्रकारकं ज्ञानं भ्रमः; भवति च शुक्तौ रजतमिति ज्ञानं रजतत्वाभाववति रजतत्वप्रकारकमिति वाच्यम्; शुक्तौ रजतमिति ज्ञानं न रजतत्वाभाववद्विशेष्यकरजतत्वप्रकारकमेकं ज्ञानम्, अपि तु ग्रहणस्मरणात्मकं ज्ञानद्वयमेव, इदमंशे प्रत्यक्षात्मकं ग्रहणं, रज-

---

(२२) 'सत्त्वे व्यभिचाराभावा'दिति ग—पुस्तकपाठः।

(२३) 'तद्वति' इति पाठः क—पुस्तके नास्ति।

(२४) 'प्रत्यक्षमुपात्तम्' इति ग—पुस्तकपाठः।

तत्वांशे स्मरणम् इति ज्ञानयौगपद्यभाववादिनो मीमांसकाः(२५)। तदसत्; इदंविशेष्यक-रजतत्वप्रकारक-प्रवृत्तिं प्रति इदंविशेष्यक-रजतत्वप्रकारकज्ञानस्य हेतुत्वेन इदं रजतमिति ज्ञानस्य इदंविशेष्यक-रजतत्वप्रकारकत्वस्य अवश्याभ्युपेयतया तस्य ज्ञानद्वयत्वासम्भवात्।

न च इदंविशेष्यक-रजतत्वप्रकारकप्रवृत्तिं प्रति इदंविशेष्यक-रजतत्वप्रकारकज्ञानस्य हेतुत्वे मानाभावः, तथा च कुतो भ्रमसिद्धिरिति वाच्यं; इदं न रजतमिति ज्ञानसत्त्वे तादृशप्रवृत्तिवारणाय तादृश-कार्य्यकारणभावस्य आवश्यकत्वात्। न च तादृश-प्रवृत्तिं प्रति इदं न रजतमिति भेदाग्रहत्वेन हेतुत्वं वाच्यमिति नोक्तदोष इति वाच्यम्, गौरवादिति संक्षेपः।

लौकिकप्रत्यक्षकारणीभूतान् षोढ़ा लौकिकसन्निकर्षान् व्याख्याय अलौकिकप्रत्यक्षकारणीभूतान् त्रिविधानलौकिकसन्निकर्षान् व्याचष्टे अलौकिक इत्यादिना। सामान्यलक्षणेति,—ननु सामान्यं लक्षणं स्वरूपं यस्येति व्युत्पत्त्या घटत्वादिस्वरूपस्य सामान्यस्यैव सामान्य-लक्षणपदवाच्यत्वेन नित्यस्य घटत्वादेः कथमिन्द्रियजन्यत्वघटितव्यापारत्वमिति चेन्न; प्रकृते सामान्यपदस्य लक्षणया सामान्यज्ञानपरत्वात्

(२५) 'ज्ञानयौगपद्यवादिमीमांसकाः' इति क—पुस्तकपाठः।

सामान्यज्ञानस्यैव प्रकृतसन्निकर्षत्वस्याभिमतत्वात्, अत एवानन्तरं स्वयमेव ग्रन्थकारेण 'तत्र आद्या प्रत्यासत्तिः घटत्वादिसामान्यज्ञान'-मित्युपदेक्ष्यते। यत्तु इन्द्रियसम्बद्धविशेष्यकज्ञानप्रकारीभूतं धूमत्वादिकमेव प्रत्यासत्तिः, सन्निकर्षपदस्य इन्द्रियसम्बन्धमात्रपरत्वात् इन्द्रियस्य विशिष्टसम्बन्धनिरूपकतायाः पारम्पर्येण सुसम्भवात्, अत एव सिद्धान्तमुक्तावल्यां यत्र 'व्यापारः सन्निकर्षः' इत्यनेन व्यापारशब्दस्य सन्निकर्षमर्थमाहुः' तत्रैव दिनकरीये 'यद्यपि धूमत्वादेरिन्द्रियप्रतियोगिकत्वाभावात् सन्निकर्षत्वमयुक्तं, तथापि संयोगस्येन्द्रियप्रतियोगिकत्वात् तद्घटितस्य इन्द्रियसंयुक्तविशेष्यकज्ञानप्रकारीभूतधूमत्वादेः प्रत्यासत्तितानिर्वाह' इति दिनकरभट्टानां समाधानसङ्गतिरिति। तदसत् 'किञ्चेन्द्रियसम्बद्धविशेष्यकं घट इति ज्ञानं यत्र जातं तत्र परदिने इन्द्रियसम्बन्धं विनापि तादृशज्ञानप्रकारीभूतसामान्यस्य सत्त्वात् तादृशज्ञानं कुतो न जन्यते, तस्मात् सामान्यविषयकं ज्ञानं प्रत्यासत्तिः, न तु सामान्यमित्यनेन सन्दर्भेण विश्वनाथेन स्वयमेव दोषस्य परीक्षणात्। विशेषस्तु दिनकरीये रामरुद्रीयादौ च द्रष्टव्यः।

उक्तापत्तिवारणादिति,—तथाहि यत्र यत्किञ्चिद्धर्मिणि चाक्षुषज्ञानसामग्री सम्पन्ना, तत्रैव एकस्य धर्मिणो लौकिकं चाक्षुषमपरेषाञ्चासन्निकृष्टानां सामान्यलक्षणया प्रत्यासत्त्या अलौकिकं चाक्षुषं, न तु यत्रैकस्यापि चाक्षुषसामग्री न सम्पन्ना, तत्रापि; अतः प्रकृते आलोकसंयोगरूपान्यतमचाक्षुषकारणविरहेण चाक्षुषज्ञानसामग्र्या असम्बधानेन यथा नैकस्य सन्निकृष्टस्यापि चाक्षुषं, तथा नासन्निकृष्टानामपि सामान्यप्रत्यासत्त्येति भावः। अत एव 'तदिन्द्रियज-तद्धर्मबोधसामग्र्यपेक्षिता' इति विश्वनाथपादाः प्राहुः।

सामान्यलक्षणेत्यत्र सामान्यपदं न जातिमात्रपरम्, किन्तु समानानां भावः सामान्यमिति व्युत्पत्त्या साधारणधर्मपरम्, तत्त्वञ्च नित्या-

नित्यधर्मसाधारणमेव। अन्यथा यत्र एको घटः संयोगेन भूतले समवायेन वा कपाले ज्ञातस्तदनन्तरं सर्वेषामेव तद्घटादिमतां भूतलादीनां कपालादीनां वा सामान्यलक्षणया प्रत्यासत्त्या ज्ञानानुपपत्तेः। येन सम्बन्धेन यत्किञ्चिद्धर्मिणि सामान्यं ज्ञायते, तेनैव सम्बन्धेन तज्ज्ञानस्य धर्मिप्रत्यासत्तित्वात् घटत्वादेः परम्परया धर्मिणि ज्ञानाभावेन परम्परया तज्ज्ञानस्य सन्निकर्षत्वासम्भवादित्यादिकमूह्यनीयम्।

सामान्यलक्षणेत्यत्र लक्षणशब्दस्य विषयोऽर्थः, तेन सामान्यं लक्षणं विषयः यस्य तथाभूतं ज्ञानमेव प्रत्यासत्तिरतो न लक्षणाश्रयणदोष इत्यपि वदन्ति।

ज्ञानलक्षणेति—अत्र लक्षणपदस्य स्वरूपमेवार्थः, तथा च ज्ञानं लक्षणं स्वरूपं यस्य तथाभूतः सन्निकर्षः ज्ञानलक्षणः। ननु सामान्यलक्षणसन्निकर्षस्यापि सामान्यज्ञानात्मकतायाः सिद्धान्तितत्वात् तस्यापि ज्ञानलक्षणसन्निकर्षत्वेन लाभसम्भवेत् किमधिकेन सामान्यलक्षणेनेति चेन्न अभिप्रायापरिज्ञानात्, तथाहि सामान्यलक्षणः सन्निकर्षः खलु सामान्याश्रयस्य सन्निकर्षः ज्ञानलक्षणः सन्निकर्षश्च यस्य ज्ञानं तस्यैव सन्निकर्ष इति भेदः।

तत्राभावादिति—ननु यत्र चन्दनखण्डे चक्षुःसन्निकर्षः तत्र घ्राणेन्द्रियस्यापि सन्निकर्षस्य अबाधितत्वात् कथं तत्रत्यसौरभे न घ्राणसंयुक्तसमवायस्य सम्भव इति चेन्न यत्र उपहतघ्राणस्यापि चक्षुःसन्निकर्षमात्रेण सुरभिचन्दनमिति चाक्षुषस्य सम्भवस्तत्रैव तदभावस्य उक्तत्वात्। तत्स्थानानुरोधेन ज्ञानलक्षणसन्निकर्षस्वीकारस्यावश्यकत्वमिति।

व्यवहितमिति कुड्यादिना तिरोहितम्, विप्रकृष्टं दूरस्थितमव्यवहितमपि। इदञ्च न प्रत्यक्षं लौकिकसन्निकर्षेणेति तादृशसन्निकर्षं आवश्यकः।

घटघटत्वयोर्यः सम्बन्ध इति,—सम्बन्धोऽत्र नित्यसम्बन्धः समवाय इत्यर्थः। अनित्यसम्बन्धस्थलेऽपि तुल्यरूपैव सांसर्गिकी विवयते-त्याह एवमित्यादि। भासमानवैशिष्ट्येति,—भासमानं प्रतीति-विषयो यत् वैशिष्ट्यं सम्बन्धः तन्निरूपितप्रतियोगित्वमित्यर्थः। अभावनिरूपितयोरिव संसर्गनिरूपितयोरपि प्रतियोगित्वानुयोगित्वयोः स्वीकारात्।

विशेषणांशे अन्याप्रकारकत्वमिति,—अन्यनिष्ठप्रकारतानिरूपित-विशेष्यतानात्मकप्रकारताकत्वं विशेष्यत्वानवच्छिन्नप्रकारताकत्वमिति वार्थः। तथाहि यत्र प्रकारांशे किञ्चिदेकं विशेषणं भासते तत्र विशेषणनिष्ठप्रकारतानिरूपितविशेष्यतायाः प्रकारवृत्तित्वात् समाना-धिकरणविषयताद्वयस्य जगदीशमते ऐक्यात् गदाधरादिमते च अव-च्छेद्यावच्छेदकभावात् तत्प्रकारतायां न तादृशविशेष्यतानात्मकत्वं विशेष्यत्वानवच्छिन्नत्वं वा, यत्र तु न प्रकारांशे विशेषणान्तरं तत्रैव तस्यास्तथात्वमिति ध्येयम्। अवच्छेदकत्वानिरूपितस्वनिष्ठप्रकारता-कत्वमित्यपि वदन्ति।

सावच्छिन्नप्रकारकत्वमिति,—अवच्छेदकतानिरूपितस्वनिष्ठप्रका-रताकत्वम्, विशेष्यतात्मकप्रकारताकत्वं विशेष्यत्वावच्छिन्नप्रकार-ताकत्वमिति वार्थः। तथाहि यत्र विशेषणांशे विशेषणान्तरं तत्र विशेषणान्तरनिष्ठावच्छेदकतानिरूपितप्रकारतायाः विशेष्यतात्मक-प्रकारतायाः विशेष्यत्वावच्छिन्नप्रकारतायाः वा मतभेदेन तत्प्रकार-वृत्तित्वात् तन्निरूपकज्ञानस्य तथात्वमेवेति।

भ्रमे अतिव्याप्तिवारणायेति,—तथाहि शुक्तौ 'इदं रजत'मित्यादि-ज्ञाने इदम्पदप्रतिपाद्यायाः शुक्तेः विशेष्यत्वं, रजतत्वस्य च प्रकारत्वम्, तत्र विशेष्यभूतायाः शुक्तेः प्रकारत्वाभिमतरजतत्ववत्त्वविरहात् न

त्यन्तदलयोगः, तदभावे तु केवलं तत्प्रकारकानुभवत्वमात्रस्य तत्रापि सत्त्वात् प्रकृतप्रमालक्षणातिप्रसङ्गो दुर्निवार एवेति।

ज्ञानयोगपद्येति,—इदञ्च विशेषणं मीमांसकानां ग्रहणस्मरणयोरेकदा असम्भवग्रङ्गावारणाय।

---

[ ज्ञानप्रामाण्यग्रह-प्रकरणम् ]

ननु प्रमात्वग्रहः कुतो भविष्यतीति चेत्, अत्र मीमांसकाः,—स्वत एव प्रामाण्यग्रहः, स्वत इत्यस्य तस्मात् स्वकीयाच्चेति विवरणम्। तत्र गुरुमते तस्मात् प्रामाण्यग्रहः। अयं भावः,—त्रिपुटी-प्रत्यक्षादौ गुरुः। त्रिपुटीप्रत्यक्षं मिति-माट-मेयविषयकम्(१)। मितिर्ज्ञानम्(२), माता आत्मा, मेयो घटादिः। गुरुमते घटादिज्ञानस्य घटादिज्ञानतत्प्रामाण्यात्मविषयकत्वात्(३)। तत्र घट इत्यादिज्ञानं घटांशे(४) चाक्षुषाद्यात्मकम्, ज्ञानांशे तत्प्रामाण्यांशे

---

(१) 'विषयकं प्रत्यक्षम्' इति क—पुस्तके।

(२) 'मितिर्मान' मिति क—पुस्तके।

(३) 'तत्प्रामाण्यविषयकत्वा' दिति ख—पुस्तके।

(४) 'घटांशे' इति क—पुस्तके।

आत्मांशे(५) च मानसात्मकम्। गुरुमते ज्ञानप्रत्यक्षात्मकानुव्यवसायान्तरकल्पने गौरवात् घटादिज्ञानमेव स्वरूपप्रत्यक्षात्मकम्,(६) अत एव गुरुः स्वप्रकाशवादी, तदर्थश्च स्वयमेव स्वप्रत्यक्षात्मकम्।

मुरारिमिश्रमते घट इत्यादिज्ञानानन्तरं घटमहं जानामीत्याद्यनुव्यवसायात् प्रामाण्यग्रहः। तथा भट्टमते ज्ञाततालिङ्गकानुमित्या प्रामाण्यग्रहः(७)। अयं भावः, भट्टो ज्ञानमतीन्द्रियं वदति, स्वीकुरुते च ज्ञाततानाम-पदार्थान्तरम्। सा च घट इत्यादिज्ञानात् घटादौ जायते, युक्तश्चैतत्, कथमन्यथा घटं जानातीत्यादौ घटादेः कर्म्मत्वम्? कर्म्मत्वं हि क्रियाजन्यफलशालित्वम्, क्रिया हि धात्वर्थः, प्रकृते च धात्वर्थो ज्ञानं, तज्जन्यफलस्य च घटादावभावात्। ज्ञाततास्वीकारे तज्ज्ञान(८)स्वरूपक्रियाजन्यं फलं ज्ञाततैव, तच्छालित्वं घटादावस्त्येवेति घटादेः कर्म्मत्वमिति। तथा च इयं ज्ञातता घटत्ववति घटत्व-

---

(५) 'तत्प्रामाण्यांशे च मानसात्मकम्' इति क—पुस्तके।

(६) 'स्वप्रत्यक्षात्मकम्' इति क—पुस्तके।

(७) 'तथा' इत्यादिः 'ग्रहः' इत्यन्त पाठः क—पुस्तके नास्ति।

(८) 'ज्ञाततास्वीकारे च ज्ञान' इति क—पुस्तके।

प्रकारकज्ञानजन्या घटत्ववति घटत्वप्रकारकज्ञाततात्वात् इत्यनुमानात् प्रामाण्यग्रहः। घटत्ववति घटत्वप्रकारकत्वमेव हि घटज्ञानस्य प्रामाण्यम्, तच्च घटत्ववति घटत्वप्रकारकज्ञानजन्या इत्यनुमित्या विषयीकृतमेवेति। अत्र च न विशेषतो व्याप्तिग्रहः घटत्ववति घटत्वप्रकारकज्ञानजन्यत्वस्वरूपसाध्यस्याप्रसिद्धेः। अपि तु यद्वति यत्प्रकारिका ज्ञातता सा तद्वति तत्प्रकारकज्ञानजन्या, यथा पटत्ववति पटत्वप्रकारकज्ञातता पटत्ववति पटत्वप्रकारकज्ञानजन्या इति सामान्यमुखव्याप्ति(१)ज्ञानादेवेति गुरुमतमसम्यक्। घट इति ज्ञानोत्पत्तिपूर्वं घट इति ज्ञाने मनःसंयुक्तसमवायरूपसन्निकर्षाभावेन ज्ञानोत्पत्तिकाले तत्प्रत्यक्षोत्पादासम्भवात्, आत्मसमवेतमानसं प्रति मनःसंयुक्तसमवायस्य हेतुत्वात्, इतरथा सुखाद्यसन्निकर्षेऽपि सुखादिमानसोत्पादापत्तेः। अपि च अयं घट इति ज्ञानस्य प्रामाण्यविषयकत्वे तदनन्तरम् इदं ज्ञानं प्रमा नवेति संशयानुत्पादः स्यात् प्रतिबन्धकस्य प्रामाण्यनिश्चयस्य जागरूकत्वात्।

(१) 'सुखी व्याप्ति' इति क—पुस्तके।

मिश्रमतमप्यसम्यक्, अपि च ज्ञाततायां मानाभावः। न च उक्तयुक्त्या तत्सिद्धिरिति वाच्यम्, तत्र हि विषयत्वमेव भाक्तं कर्म्मत्वम्, घटे धात्वर्थज्ञानस्य विषयतासत्त्वात्, अन्यथा भाविघटं जानातीत्यादौ कथं ज्ञानकर्म्मत्वम्? तत्र तद्घट इति ज्ञानेन तद्घटे (१०) ज्ञाततानननासम्भवात् तद्घटरूपतत्समवायिकारणाभावात्; तथा च तत्र विषयत्वस्वरूपं भाक्तं कर्म्मत्वं वाच्यमिति प्रक्रतेऽपि दीयतां दृष्टिः, किमतिरिक्तज्ञाततोकल्पनेनेति संक्षेपः।

तस्मादनुमानादेव प्रामाण्यग्रहः। तथाहि वह्नित्वप्रकारकं ज्ञानं सविशेष्यकं दाहसमर्थविशेष्यकप्रवृत्तिजनकज्ञानत्वात् इत्यनुमानात् वह्नीतरविशेष्यकत्ववाधसहकृतात् वह्नित्वप्रकारकज्ञानत्वावच्छेदेन जायमानानुमितिः वह्नित्वप्रकारकत्वावच्छिन्नवह्निविशेष्यकत्वं विषयीकरोतीति वह्निरिति ज्ञानस्य प्रामाण्यग्रहः। तज्ज्ञानस्य वह्निविशेष्यकत्वावच्छिन्नवह्नित्वप्रकारकत्वस्येव वह्नित्वप्रकारकत्वावच्छिन्न-

---

(१०) 'तत्तद्घटज्ञानेन तत्तद्घटे' इति क—पुस्तके।

वह्निविशेष्यकत्वस्यापि प्रामाण्यात्वात्। न चैतन्मते प्रामाण्यसंशयानुत्पादः कथं न स्यादिति वाच्यम्, एतदनुमानस्य सर्वत्र अनवतारात्। अनयैव दिशा घटादिज्ञानस्यापि प्रामाण्यमनुमेयमिति।

## प्रत्यक्षपरिच्छेदः

ज्ञानप्रामाण्यग्रहे स्वमतं सिद्धान्तयितुं पूर्वपक्षरूपेण मीमांसकमतमवतारयितुं प्रश्नमारचयति नन्वित्यादिना। ज्ञानस्य स्वत एव प्रामाण्यग्रहो मीमांसकानां, तत्रापि केषाञ्चित् स्वस्मात् प्रामाण्यग्रहः केषाञ्चिच्च स्वकीयादिति स्वतः प्रामाण्यग्रह इत्यस्यार्थविवरणम्।

घटाद्यंशे चाक्षुषाद्यात्मकमिति,—ननु एकस्यैव ज्ञानस्य अवच्छेदकभेदेन चाक्षुषमानसात्मकत्वे चाक्षुषत्व-मानसत्वयोः परस्परमविरुद्धतया अव्याप्यवृत्तितया च जातित्वं न स्यादिति साङ्कर्यस्य जातिबाधकत्वात् जातेर्व्याप्यवृत्तित्वनियमाच्च इति चेन्न तन्मते साङ्कर्यस्य जातिबाधकताया जातेर्व्याप्यवृत्तित्वनियमस्य चानङ्गीकारात्। एतन्मते नृसिंहाकारं ज्ञानमभ्युपेयते, तथाहि यथा नरसिंहशरीरे अंशतः सिंहत्वमंशतश्च नरत्वं तेषामभिमतं, तथैव चाक्षुषज्ञानादावपि घटाद्यंशे चाक्षुषत्वम् ज्ञानाद्यंशे च मानसत्वम्। किञ्च अनुमित्यादिज्ञाने वह्न्याद्यंशे अनुमितित्वं ज्ञानाद्यंशे च मानसप्रत्यक्षत्वमित्यादिकमूह्यम्।

तच्चेति निरुक्तप्रामाण्यमित्यर्थः। घटत्ववतीत्यादिः,—घटत्वप्रकारकज्ञानजन्येत्याकारकनिरुक्तज्ञानप्रामाण्यसाधकमित्यर्थः। व्याप्तिज्ञानादिति,—व्याप्तिज्ञानजन्यज्ञानविषय इत्यर्थः, स्वजन्यज्ञानविषयत्वस्य प्रकृते पक्षतावच्छेदकत्वात्।

सुखादिमानसोत्पादापत्तेरिति, न च इष्टापत्तिः अविशेषेण सर्वस्यैव सर्वदा सुखोपलब्धिप्रसङ्गात्। संशयानुत्पादः स्यादिति,—अत एव 'प्रमात्वं न स्वतो ग्राह्यं संशयानुपपत्तित' इति विश्वनाथसमाधानमपि सुसङ्गच्छते। प्रतिबन्धकक्षयेति,—प्रामाण्याभावज्ञानत्वेन प्रामाण्यनिश्चयत्वेन च सिद्धस्य प्रतिबध्यप्रतिबन्धकभावस्य सिद्धान्तितत्वादिति भावः। उक्तायुक्त्येति,—घटं जानातीत्यादौ घटादेः ज्ञानकर्मत्वानुपपत्त्यादिरूपहेतुनेत्यर्थः। तत्सिद्धिरिति,—घटादिवृत्तिज्ञाततासिद्धिरित्यर्थः। तत्समवायिकारणाभावादिति,—घटादौ निरुक्तज्ञाततायाः समवायेन समुत्पादः प्रकृतसिद्धान्तसम्मतः, अतो घटादिकं ज्ञाततायाः समवायिकारणमभ्युपेयते, निमित्तकारणञ्च ज्ञानमेव। तथा च निमित्तकारणरूपप्रकृतज्ञानस्य अव्यवहितोत्तरमेव योग्योत्पत्तिकाया ज्ञाततायाः समवायिकारणत्वेनाभिमतस्य भाविघटस्य ज्ञानोत्पत्तिदशायामसत्त्वात् न भाविघटे निरुक्तज्ञाततायाः उत्पत्तिसम्भव इति भावः।

वह्नित्वप्रकारकत्वावच्छिन्नेत्यादिः,—यद्विषयतयोः परस्परं निरूप्यनिरूपकभावः तद्विषयित्वयोः तद्विषयकत्वापरपर्य्यायतया परस्परमवच्छेद्यावच्छेदकभाव इति नियमेन वह्नित्वप्रकारता-वह्निविशेष्यतयोः परस्परं निरूप्यनिरूपकभावात् वह्निप्रकारकत्वावच्छिन्नत्वं वह्निविशेष्यकत्वे सुसङ्गच्छते। अनयैव दिशेति,—वह्नित्वप्रकारकवह्निविशेष्यकज्ञानादिप्रामाण्यानुमानरीत्येत्यर्थः। विशेषः स्वयमूहनीयः।

---

[ अनुमान-प्रकरणम् ]

**अथानुमानं निरूप्यते।—अनुमितिकरणम् अनुमानम्; तच्च व्याप्तिज्ञानम्। ननु अनुमितिरेव न**

ज्ञायते, कथं तत्करणं (१) समवसेयम्, विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात्।

अथ व्याप्तिप्रकारक-पक्षधर्मतानिश्चयजन्यं ज्ञानमनुमितिः, भवति च वह्निव्याप्यधूमवान् पर्वत इति ज्ञानं व्याप्तिप्रकारक-पक्षधर्मतानिश्चयः; वह्निव्याप्यधूमवान् पर्वत इति ज्ञाने हि धूमे वह्निव्याप्तेः प्रकारत्वं,(२) तेन ज्ञानेन तद्विषयीकरणात्। पर्वतरूपो यः पक्षस्तद्धर्मत्वं तत्सम्बन्धः, तस्यापि तेन विषयीकरणात्। तज्जन्यत्वञ्च पर्वतो वह्निमानित्यनुमितावस्ति, तादृशज्ञानं (३) विना पर्वतो वह्निमानित्यनुमितेरनुत्पादादिति लक्षणसङ्गतिः। मैवम्, साध्यसाधनभेदेन व्याप्तेर्भिन्नतया (४) व्याप्तिपदेन यदि वह्निधूमनिरूपितव्याप्तिरुच्यते, तदा द्रव्यत्वपृथिवीत्वनिरूपितव्याप्तिप्रकारक-पक्षधर्मतानिश्चयजन्यायामनुमितावव्याप्तिः (५) तस्या द्रव्यत्व-पृथिवीत्वनिरू-

---

(१) 'तत्करणत्वम्' इति क—पुस्तके।

(२) 'वह्निव्याप्तिप्रकारकत्वम्' इति क—पुस्तके।

(३) 'तादृशं ज्ञानम्' इति क—पुस्तके।

(४) 'व्याप्तेर्विभिन्नतया' इति क—पुस्तके।

(५) 'तिताव्याप्तेरिति ख—पुस्तके।

पित-व्याप्तिप्रकारकपक्षधर्म्मतानिश्चयजन्यतया (६) वह्निधूमनिरूपितव्याप्तिप्रकारकपक्षधर्म्मतानिश्चयाजन्यत्वात्।

अत्रोच्यते,—यां कांश्चिदनुमितिव्यक्तिमादाय एतद्व्यक्तिसमवेत-चाक्षुषासमवेत-धर्म्मसमवायित्वम् अनुमितित्वम्। भवति च एतद्व्यक्तिसमवेता अनुमितित्वजातिः (७) चाक्षुषासमवेता च तत्समवायित्वं सर्वास्वेवानुमितिष्विति लक्षणसङ्गतिः। चाक्षुषासमवेतशाब्दत्वादिजातिमति शाब्दादावतिव्याप्तिवारणाय एतद्व्यक्तिसमवेतेत्युक्तम्, तथा च शाब्दत्वादेरेतद्व्यक्तिसमवेतत्वाभावात् नातिव्याप्तिः।

न च एतद्व्यक्तिवृत्तीत्येवोच्यतां किं समवेतत्वपर्य्यन्तानुधावनेनेति वाच्यम्, शाब्दत्वादिजातेरपि कालिकसम्बन्धेन एतद्व्यक्तिवृत्तितया तद्दोषतादवस्थ्यापत्तेः। सत्तागुणत्वादेरपि एतद्व्यक्तिसमवेततया तमादाय प्रत्यक्षादावतिव्याप्तिवारणाय चाक्षुषासम-

---

(६) 'निश्चयस्यैव जन्यतया' इति क—पुस्तके।

(७) 'अनुमितित्वं जाति'रिति ख—पुस्तके।

वेतीयुक्तम्। तथा च सत्तागुणत्वादेश्चाक्षुषसमवेतत्वात् न तमादायातिव्याप्तिः।

न च चाक्षुषावृत्तीत्येवोच्यताम्, किमसमवेतत्वपर्य्यन्तानुधावनेनेति वाच्यम् असम्भवापत्तेः (८)। अनुमितित्वस्यापि कालिकसम्बन्धेन चाक्षुषे वृत्तेः। धर्म्मपदं स्वरूपकथनम्। न च तादृशधर्माश्रयत्वमित्येवोच्यताम् (९), किं समवायित्वपर्य्यन्तानुधावनेनेति वाच्यम्, शाब्दादावतिव्याप्तेः। तत्रापि कालिकसम्बन्धेन अनुमितित्वस्वरूप-तादृशधर्माश्रयत्वसत्त्वात्। समवायित्वोपादाने तु नातिव्याप्तिः समवायसम्बन्धेन अनुमितित्वाश्रयत्वस्य शाब्दादावभावादिति।

प्रत्यक्षप्रकरणं समाप्य अनुमितिप्रकरणमारभमाणः तत्र शिष्योत्साहीकरणाय प्रतिजानीते अथेत्यादिना॥ अथेति अनुमाने प्रत्यक्षनिरूपितसङ्गतिप्रदर्शनाय, सेयं प्रकृते उपजीवकत्वरूपा प्रत्येतव्या। अनुमितिकरणमिति,—अनुमित्यसाधारणं कारणमित्यर्थः, व्यापारवत्कारणं करणमिति वदन्ति। प्रकृते व्याप्तिज्ञानजन्यः परामर्शो व्यापारः तद्वत्कारणत्वात् व्याप्तिज्ञानस्य करणत्वमिति।

नन्वित्यादिः,—अनुमितिकरणमिति अनुमानलक्षणे करणांशे अनुमितेर्विशेषणत्वात् तज्ज्ञानं विना तादृशस्य अनुमानस्य ज्ञातुमशक्यत्वमिति भावः। व्याप्तिः परतो वक्ष्यते।

---

(८) 'असम्भवापत्तेश्च' इति क—पुस्तके।

(९) 'धर्म्माश्रयत्वमेवोच्यताम्' इति ख—पुस्तके।

भवति चेत्यादिः,—प्रकृते व्याप्तिप्रकारकपक्षधर्मतानिश्चय इत्यस्य साध्यव्याप्यहेतुतावच्छेदकावच्छिन्नहेतुतावच्छेदकसम्बन्धावच्छिन्नप्रकारकपक्षविशेष्यकनिश्चय एव व्याप्तिप्रकारकपक्षधर्मतानिश्चयः, तादृशज्ञानञ्च साध्यव्याप्यहेतुमान् पक्ष इत्याद्याकारकमेव। यदि च साध्यव्याप्यहेतुः पक्षे इत्यादिहेतुविशेष्यकपरामर्शस्यापि हेतुत्वमनुमितावभ्युपगन्तव्यम्, तदा हेतुतावच्छेदकसम्बन्धावच्छिन्नाधेयत्वसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नपक्षविषयतानिरूपितहेतुतावच्छेदकसम्बन्धातिरिक्तसम्बन्धानवच्छिन्नहेतुविषयताशालि ज्ञानमेवानुमितौ हेतुतया निर्वाच्यम्, तेन न कापि क्षतिः।

असम्भवापत्तेरिति—अनुमितित्वस्य कालिकेन सम्बन्धेन जन्यज्ञानात्मक-चाक्षुषमात्रेष्वेव वृत्तेः अनुमितित्वं जातिमुपादाय कुत्राप्यनुमितौ लक्षणसमन्वयासम्भवात् अन्यस्याः कस्या अपि अनुमितिवृत्तिजातेरपि तादृश्या अभावादिति भावः।

स्वरूपकथनमिति स्वरूपं कथ्यते अनेन इति व्युत्पत्त्या स्वरूपप्रतिपादकमित्यर्थः, अन्यथा उच्चारणात्मककथनस्य पदाभेदबाधात्। समवायित्वमिति समवायानुयोगित्वमित्यर्थः, अन्यथा अनुमितित्वप्रतियोगिकसमवायनिरूपितप्रतियोगित्वस्य अनुमितित्व एव सत्त्वेन तत्र लक्षणातिप्रसङ्गप्रसङ्गात्।

---

[ व्याप्तिप्रकरणम् ]

नन्वनुमितिकरणं व्याप्तिज्ञानमुक्तम्। तव का व्याप्तिः? अथ साध्याभाववदवृत्तित्वं व्याप्तिः। साध्याभाववति या वृत्तिः तदभाव इत्यर्थः। साध्यस्य

वह्नेरभाववति ह्रदादौ धूमस्यावृत्तेः वह्निमान् धूमादित्यादौ लक्षणसङ्गतिः।

न च धूमवान् वह्नेरित्यादावतिव्याप्तिः साध्यस्य धूमस्य अभाववति ह्रदादौ वह्नेरवृत्तेरिति, वाच्यं साध्याभाववदवृत्तित्वपदेन साध्याभाववद्वृत्तित्व-सामान्याभावस्य उक्तत्वात्। साध्याभाववद्वृत्तित्व-सामान्याभावश्च साध्याभाववद्वृत्तित्वत्वावच्छिन्नप्रति-योगिताकोऽभावः। तथा च साध्यस्य धूमस्य अभाव-वत्यां (१) ह्रदरूप-यत्किञ्चिद्व्यक्तौ वह्नेरवृत्तावपि धूमाभाववद्वृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभावास-त्त्वात् नातिव्याप्तिः।

न च वह्निमान् धूमादित्यत्राव्याप्तिः, साध्यस्य महानसीयवह्नेरभाववति पर्वतादौ धूमस्य वृत्तेरिति वाच्यम्; साध्याभावपदेन साध्यतावच्छेदकावच्छिन्न-प्रतियोगिताकाभावस्य उक्तत्वात्, तथा च नाव्याप्तिः। साध्यतावच्छेदकं यद् वह्नित्वं तदवच्छिन्नप्रतियोगि-ताकाभावस्य पर्वतादावभावात् तत्रापि वह्नेः सत्त्वात्। अस्ति च तादृशाभावो ह्रदादौ, तत्र च धूमस्य वृत्तिरपि नास्तीति।

(१) 'धमरूपसाध्यसाभाववति' इति ख—पुस्तके।

न च तथापि वह्निमान् धूमादित्यत्राव्याप्तिः पर्वतादौ संयोगसम्बन्धेनैव वह्नेर्वृत्तेः समवायसम्बन्धेन वह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य तत्र सत्त्वात् तत्र च धूमस्य वृत्तेरिति वाच्यं, साध्यतावच्छेदकसम्बन्धेन साध्याभावस्य विवक्षितत्वात्, तथा च संयोगरूप-साध्यतावच्छेदकसम्बन्धेन वह्नित्वावच्छिन्नप्रतियोगिताकाभावस्य पर्वतादावभावात् (२) नाव्याप्तिः। मैवम्, इदं वाच्यं ज्ञेयत्वादित्यत्राव्याप्तेः (३) वाच्यत्वस्य केवलान्वयितया सर्वत्र सत्त्वेन तदभावाप्रसिद्धेः।

केचित्तु अनौपाधिकः सम्बन्धो व्याप्तिः। उपाध्यभावविशिष्टसाध्यसामानाधिकरण्यमित्यर्थः। उपाध्यभावश्च व्यभिचारसम्बन्धेन उपाधेरभावः। अस्ति चेदं वह्निमान् धूमादित्यादौ; तत्र कस्यचिदुपाधेरसम्भवेन (४) धूमादिहेतौ (५) उपाध्यभावस्य सत्त्वात् वह्न्यादिरूपसाध्यसामानाधिकरण्यस्य च सत्त्वात्।

---

(२) 'पर्वतादावसत्त्वात्' इति ख—पुस्तके।

(३) 'मैव'मित्यारभ्य 'व्याप्ते'रित्यन्तभागः ख—पुस्तके पतितः।

(४) 'असम्बन्धेन' इति ख—पुस्तके।

(५) 'धूमादिति हेतौ' इति ख—पुस्तके।

धूमवान् वह्नेरित्यादौ नातिव्याप्तिः तदार्द्रेन्धनादेरुपाधेः व्यभिचारसम्बन्धेन वह्नौ सत्त्वेन (६) उपाध्यभावविशिष्टसाध्यसामानाधिकरण्याभावात्।

ननु किं तावदुपाधित्वम्? न च साध्यव्यापकत्वे सति साधनाव्यापकत्वम् उपाधित्वम्, भवति च धूमवान् वह्नेरित्यत्र आर्द्रेन्धनमुपाधिः, आर्द्रेन्धनस्य धूमरूपसाध्यव्यापकत्वात्, यत्र धूमस्तत्रार्द्रेन्धनमिति व्याप्तेः। साधनस्य वह्नेरव्यापकत्वात् वह्निमति अयःपिण्डे आर्द्रेन्धनाभावादिति वाच्यम्, मित्रानाम्नो काचित् (७) स्त्री, तस्या एकः पुत्रो गौरः, अपरे सर्वे श्यामाः, (८) तत्र गौरपुत्रमदृष्ट्वा तदितरान् श्यामान् दृष्ट्वा गौरं मित्रातनयं पचौकृत्य 'स श्यामो मित्रातनयत्वा'दित्यत्र शाकपाकजत्वोपाधावव्याप्तेः, काककोकिलादौ व्यभिचारेण शाकपाकजत्वस्य श्यामत्वरूपसाध्याव्यापकत्वात्।

उच्यते;—पर्य्यवसितसाध्यव्यापकत्वे सति साध-

---

(६) 'नार्द्रेन्धनोपाधेः सत्त्वेन' इति क—पुस्तके।

(७) 'काचि'दित्यत्र 'एका' इति ख—पुस्तकपाठः।

(८) 'अपरे श्यामा' इति क—पुस्तके।

नावयापक उपाधिः। पर्य्यवसितं सिद्धं साध्यं (९) तत् यत् पक्षधर्म्मतावललभ्यम्। पर्वतो धूमवान् वह्नेरित्यत्र पक्षः पर्वतः, तद्धर्म्मतावललभ्यं साध्यं पर्वतीयधूमः, तद्व्यापकम् आर्द्रेन्धनम्, अथ च साधनस्य वह्नेरव्यापकत्वेति तत्र लक्षणसङ्गतिः। स श्यामो मित्रातनयत्वादित्यत्र पक्षः मित्रातनयः, तद्धर्म्मतावललभ्यं साध्यं मित्रातनयीयं श्यामत्वं, तस्य व्यापकं शाकपाकजत्वम्, मित्रातनयीयश्यामत्वस्य काकादावभावेन व्यभिचाराभावादिति दिक्, इत्याहुः, तदसत्;—उपाध्यभावविशिष्ट-साध्यसामानाधिकरण्यं व्याप्तिरित्यत्र हि उपाधिपदेन यत्किञ्चित्साध्य-व्यापक-यत्किञ्चित्साधनाव्यापक उच्यते, प्रकृत-साध्यव्यापक-प्रकृतसाधनाव्यापको वा? नाद्यः; वह्निमान् धूमादित्यत्र अव्याप्तेः, घटत्वरूपसाध्य-व्यापकसत्त्वरूपसाधनाव्यापकस्य कम्बुग्रीवादि-मत्त्वस्य व्यभिचारसम्बन्धेन (१०) धूमे सत्त्वेन उपा-ध्यभावाभावात्। नान्त्यः; वह्निमान् धूमादित्यत्वा-प्रसिद्धिनिबन्धनाव्याप्तेः, वह्निस्वरूपप्रकृतसाध्यव्याप-

(९) 'पर्य्यवसितसाध्यव्यापकत्वच' इति क—पुस्तके।

(१०) 'व्यभिचारितासम्बन्धेन' इति ख—पुस्तके।

वस्य धूमरूपप्रकृतसाधनावृत्तिकस्याप्रसिद्धेः, अलीक-प्रतियोगिकाभावस्यासत्त्वात् ।

अत्र वदन्ति ;—यद्धर्म्मावच्छिन्नसमानाधिकरणा यावन्तः साध्यतावच्छेदकावच्छिन्नसमानाधिकरणाः तद्धर्म्मवत्त्वं व्याप्तिः । यद्धर्मपदं हेतुतावच्छेदक-परम् । धूमत्वावच्छिन्नसमानाधिकरणा यावन्तो महा-नसत्वादयः तावन्तो (११) वह्नित्वावच्छिन्नसमानाधि-करणाः, तद्धर्म्मवत्त्वञ्च(१२) अस्ति धूमे इति वह्निमान् धूमादित्यादौ लक्षणसङ्गतिः । वह्नित्वावच्छिन्नसमा-धिकरण-यावन्मध्यप्रविष्टस्य(१३) अयःपिण्डत्वस्य धूम-त्वावच्छिन्नसमानाधिकरणत्वाभावात् धूमवान् वह्ने-रित्यादौ लक्षणासङ्गतिः (१४) । वह्नित्वावच्छिन्नसमा-नाधिकरणस्य द्रव्यत्वस्य (१५) धूमत्वावच्छिन्नसमाना-धिकरणत्वात् धूमवान् वह्नेरित्यादावतिव्याप्तिवारणाय यावन्त इत्युक्तम् । तथा च यावन्मध्य-प्रविष्टस्य (१६)

---

(११) 'महानसत्वादयो भवन्ति ते' इति ग—पुस्तके ।

(१२) 'धूमत्ववत्त्वञ्च' इति क—पुस्तके

(१३) 'यावन्मध्ये प्रविष्टस्य' इति क—पुस्तके ।

(१४) 'न लक्षणसङ्गति'रिति ग—पुस्तके ।

(१५) 'यद्द्रव्यत्वे'ति ग—पुस्तके ।

(१६) 'यावन्मध्ये प्रविष्टस्य' इति ग—पुस्तके ।

अयःपिण्डत्वस्य धूमत्वावच्छिन्नसमानाधिकरणत्वाभावात् नातिव्याप्तिः। न च यत्समानाधिकरणा यावन्त इत्येव(१७) लक्षणं क्रियतां, किं यद्धर्म्मावच्छिन्नपर्य्यन्तानुधावनेनेति वाच्यम्, द्रव्यं गुणकर्म्मान्यत्वविशिष्टसत्त्वादित्यव्याप्तेः, विशिष्टसत्त्वस्य सत्त्वानतिरिक्ततया(१८) सत्त्वसमानाधिकरण-यावन्मध्यप्रविष्टस्य गुणत्वादेर्द्रव्यत्वत्वावच्छिन्नासमानाधिकरणत्वात् (१९)। यद्धर्म्मावच्छिन्नेत्युक्ते तु न दोषः, गुणत्वादेर्गुणकर्म्मान्यत्वविशिष्टसत्तात्वावच्छिन्नासमानाधिकरणत्वात्, गुणादौ विशिष्टनिरूपिताधिकरणताया अभावात्, तथा सति गुणो गुणकर्म्मान्यत्वविशिष्टसत्तावानिति प्रतीत्यापत्तेः (२०)।

अनुमाननिरूपणमुपक्रम्य तदनुकूलं व्याप्तिनिरूपणमारभते अनुमितिकरणमित्यादिना। तत्रेति सप्तम्यर्थौ घटकत्वं विषयत्वं वा, तथा च व्याप्तिज्ञानघटकीभूता व्याप्तिज्ञानविषयीभूता वा व्याप्तिः का इत्यर्थः। साध्याभाववतीत्यादिः,—साध्याभावाधिकरणनिरूपितवृत्ति-

---

[१७) 'इत्येवम्' इति ग—पुस्तके।

(१८) 'विशिष्टसत्तात्वस्य शुद्धसत्तात्वानतिरिक्ततया' इति ग—पुस्तके पाठः।

(१९) 'वच्छिन्नसमानाधिकरणत्वाभावात्' इति ग—पुस्तके।

(२०) 'गुणत्वादेर्गुणकर्म्मान्यत्वविशिष्टसत्तात्वावच्छिन्नसमानाधिकरणस्य अभावात्। विशिष्टसत्तात्वावच्छिन्नाधिकरणतायाः सत्तात्वावच्छिन्नाधिकरणतातिरिक्तत्वादिति भावः। अन्यथा गुणो विशिष्टसत्तावानिति प्रतीत्यापत्तेः' इति ग—पुस्तके।

त्वाभाव इत्यर्थः। न च वह्निमान् धूमादित्यादौ वह्न्यभावाधिकरणं यत् धूमाधिकरणत्वं तन्निरूपितवृत्तितायाः धूमे सत्त्वात् अव्याप्तिरशक्यपरीहारेति वाच्यं, साध्याभावत्वावच्छिन्नाधिकरणतानिरूपितवृत्तित्वसामान्याभावस्य प्रकृते तात्पर्यात्, तथाहि धूमाधिकरणतानिरूपितवृत्तित्वस्य धूमे सत्त्वेऽपि न तदवृत्तित्वं वह्न्यभावत्वावच्छिन्नाधिकरणतानिरूपितं, परं धूमत्वावच्छिन्नाधिकरणतानिरूपितमेवेति न क्षतिः। न चैवं धूमवान् वह्नेरित्यादौ सर्वत्रातिप्रसङ्गः, धूमाभावत्वरूपसाध्याभावत्वावच्छिन्नाधिकरणतानिरूपितवृत्तित्वस्य धूमाद्यभावरूपसाध्याभाव एव सत्तानियमेन वह्न्यादौ तदभावस्यावश्यम्भावादिति वाच्यं, साध्याभावाधिकरणविशिष्टवृत्तित्वसामान्याभावस्य प्रकृते वक्तव्यत्वात्, तावतैवातिप्रसङ्गाप्रसङ्गादिदोषस्यानवतारात्, वैशिष्ट्यञ्च स्वनिरूपितत्वस्वनिष्ठाधिकरणतानिरूपितत्वैतदुभयसम्बन्धेन। तथाहि वह्निमान् धूमादित्यादौ वह्न्यभावाधिकरणीभूतधूमाधिकरणत्वादिनिरूपितवृत्तित्वस्य धूमादौ सत्त्वेऽपि तन्निष्ठाधिकरणतानिरूपितत्वस्य तादृग्वृत्तित्वे अभावात् न तादृशोभयसम्बन्धेन साध्याभावाधिकरणविशिष्टवृत्तितायाः धूमादौ सत्त्वमिति न क्षतिः। एतेन धूमाधिकरणताभिन्नं धूमाधिकरणतात्वादित्यादावपि दोषः प्रत्युक्तः।

साध्याभाववदवृत्तित्वत्वावच्छिन्नप्रतियोगिताकाभाव इत्यादिः,—साध्यभेदान् स्थलभेदेनोपादाय साध्याभावाधिकरणवृत्तित्वं नास्ति इत्याकारकः तावत्पदार्थमात्रघटित एवाभावः प्रकृतसामान्याभावः। तन्निष्कर्षस्तु साध्यतावच्छेदकपर्याप्तावच्छेदकतानिरूपिता या प्रतियोगित्वसम्बन्धावच्छिन्नावच्छेदकता तन्निन्ना सती या अभावत्वनिष्ठावच्छेदकताभिन्नावच्छेदकता तदनिरूपिता या अभावनिष्ठावच्छेदकता तन्निन्ना सती या अधिकरणत्वनिष्ठावच्छेदकताभिन्नावच्छेदकता तदनिरूपिता या अधिकरणनिष्ठावच्छेदकता तन्निन्ना सती या

वृत्तित्वनिष्ठावच्छेदकताभिन्नावच्छेदकता तदनिरूपिता या वृत्तित्वनिष्ठा प्रतियोगिता तन्निरूपकोऽभाव इति। साध्याभावाधिकरणवृत्तित्वं नास्ति इत्याकारकाभावघटकीभूतपदार्थेषु यत्र कुत्रापि यत्किञ्चिद्विशेषणप्रक्षेपे तत्तदवच्छेदकतासु सर्वत्र न तादृशतादृशातिरिक्तावच्छेदकत्वानिरूपितत्वसम्भव इत्यादिकं सविशेषमूहनीयम्।

अधिकरणनिष्ठावच्छेदकतायाम् अभावनिष्ठावच्छेदकताभिन्ना सती या अधिकरणत्वनिष्ठावच्छेदकताभिन्नावच्छेदकता तदनिरूपितत्वनिवेश्यव्याप्तिमाह तथा चेत्यादिना। तथाहि धूमाभावाधिकरणह्रदवृत्तित्वं नास्ति इत्याकारकाभावे अधिकरणनिष्ठावच्छेदकतायां तादृशावच्छेदकताभिन्नह्रदत्वनिष्ठावच्छेदकत्वनिरूपितत्वसत्त्वात् न तादृशाभावो निरुक्तवृत्तित्वसामान्याभाव इति नातिव्याप्तिः।

साध्यतावच्छेदकपर्याप्तिनिवेश्यव्याप्तिमाह न चेत्यादिना। तथाहि प्रकृते महानसीयवह्न्यभाववद्वृत्तित्वाभावगर्भे वह्निनिष्ठप्रतियोगित्वसम्बन्धावच्छिन्नावच्छेदकताया न साध्यतावच्छेदकपर्याप्तावच्छेदकतानिरूपितत्वमिति निरुक्तस्थलीयसाध्यतावच्छेदकनिष्ठावच्छेदकताया महानसीयत्व-वह्नित्वोभयपर्याप्तत्वात् वह्नित्वगतैकत्वस्य प्रकृतसाध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकत्वादिति।

साध्यतावच्छेदकसम्बन्धेनेत्यादिः,—नन्वेवमपि वह्निमान् धूमादित्यादावव्याप्तिरेव संयोगसमवायोभयसम्बन्धेन वह्न्याद्यभावस्य पर्वतादौ सत्त्वादिति चेन्न वृत्तित्वसामान्याभावगर्भे साध्यनिष्ठावच्छेदकतायां न केवलप्रतियोगित्वसम्बन्धावच्छिन्नत्वं निविश्यते, परं साध्यतावच्छेदकसंसर्गतावच्छेदकरूपपर्याप्तावच्छेदकताकसंसर्गताकप्रतियोगित्वसम्बन्धावच्छिन्नत्वमेवेत्यत्रैव तस्य तात्पर्यात्, इत्थञ्च प्रकृते साध्यनिष्ठावच्छेदकतायास्तादृशप्रतियोगित्वसम्बन्धावच्छिन्नत्वविरहात् न क्षतिः।

अभावाभावस्य अतिरिक्तत्वमते साध्याभाववत्त्वं स्वरूपेणैव निर्वाच्यम्, तस्य प्रतियोग्यादिस्वरूपत्वनये तु व्याप्तिपञ्चकादिलक्षणपरिष्कारशैतिरनुसर्त्तव्या।

उपाध्यभावविशिष्टेत्यत्र वैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन साध्यसामानाधिकरण्यांशे निविष्टम्। धूमवान् वह्नेरित्यादौ वह्नौ यथैव साध्यस्य धूमस्य सामानाधिकरण्यं तथैव आर्द्रेन्धनोपाधेः सत्त्वेन नोपाध्यभाव इति विशिष्टान्तेन व्यभिचारिहेतुव्यावृत्तिः। अनौपाधिकः सम्बन्ध इत्यत्र सम्बन्धपदं प्रकृतसाध्यसामानाधिकरण्यपरम्, अनौपाधिक इति उपाध्यभावविशिष्ट इत्यर्थः, अत एव उपाध्यभावविशिष्टसाध्यसामानाधिकरण्यमिति निकृष्टार्थः। साध्यसामानाधिकरण्यमित्यस्य साध्याधिकरणनिरूपितवृत्तित्वमित्यर्थः। अत्र साध्याधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन वृत्तित्वञ्च हेतुतावच्छेदकसम्बन्धेनावधेयम्।

अत्र वदन्तीत्यादिः, साध्यतावच्छेदकविशिष्ट-प्रकृतहेतुतावच्छेदकवत्त्वं व्याप्तिरिति, वैशिष्ट्यञ्च स्वावच्छिन्नसामानाधिकरण्यव्याप्यसामानाधिकरण्यनिरूपकतावच्छेदकत्वसम्बन्धेनेति निष्कृष्टार्थः। व्याप्यत्वञ्च स्वव्यापकतत्कत्वम्।

विशिष्टसत्तात्वावच्छिन्नाधिकरणतायां इत्यादिः,—तथाहि यदन्तर्भावेण पदार्थे वैशिष्ट्यं तत्रैव विशिष्टधर्म्मावच्छिन्नाधिकरणतायाः स्वीकारेण सत्तायां गुणकर्म्मान्यत्ववैशिष्ट्यस्य द्रव्यान्तर्भावेणैव सम्भवात् द्रव्य एव तादृग्विशिष्टाधिकरणत्वमिति भावः।

[ व्याप्तिग्राहक-प्रकरणम् ]

नन्वनुमितिं प्रति व्याप्तेर्निश्चयो हेतुर्वाच्यः (१)। स च न सम्भवति, सन्निकृष्टधूमे(२) वह्निसामानाधिकरण्यस्य निश्चयेऽपि देशान्तरीयधूमे वह्निव्यभिचारसंशयात्(३)। न च भूयोदर्शनमेव तादृशव्यभिचारसंशयप्रतिबन्धकम्, भूयोदर्शनञ्च भूयःसु स्थानेषु साध्यसाधनयोः सामानाधिकरण्यदर्शनमिति वाच्यम्, पार्थिवत्व-लोहलेख्यत्वयोः शतशो दर्शनेऽपि हीरके व्यभिचारोपलब्धेर्भूयोदर्शनस्य व्यभिचारसंशयाप्रतिबन्धकत्वात्।

उच्यते,—व्यभिचारज्ञानविरहः सहचारदर्शनञ्च (४) व्याप्तिनिश्चयहेतुः। व्यभिचारस्य ज्ञानं निश्चयः शङ्का च, तदन्यतर-सत्त्वेऽपि व्याप्तिनिश्चयानुत्पादात्। सहचारदर्शनं साध्यसाधनयोः सामानाधिकरण्यज्ञानम्। न च व्याप्तिनिश्चयं प्रति सहचारदर्शनस्य हेतुत्वे मानाभाव इति वाच्यम्, व्याप्तेः साध्यसाधन-

---

(१) 'अनुमितिं प्रति व्याप्तिनिश्चय' इति क—पुस्तके ;

(२) तद्भूमे' इति ग—पुस्तके।

(३) 'देशान्तरीयवह्नेर्व्यभिचारसंशयात्' इति ग—पुस्तके।

(४) 'व्यभिचारज्ञानविरह 'इत्यत्र' ज्ञानविरह' इत्ययंशः ग—पुस्तके पतितः।

सामानाधिकरण्यविशिष्टतया(५) तज्ज्ञानं विना व्याप्ति-ज्ञानानुदयात्, (६) विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात्। ननु व्यभिचारज्ञानाभावस्य व्याप्तिनिश्चये हेतुत्वे तन्निश्चय एव दुर्लभः व्यभिचारसंशयस्य प्रतिबन्धकस्य जागरूकत्वादिति वाच्यम्, व्यभिचार-संशयाभावस्य क्वचित् स्वतःसिद्धत्वात्, क्वचिच्च धूमो यदि वह्निव्यभिचारी स्याद् वह्निजन्यो न स्यादित्यनुकूलतर्कादिति दिक्।

ननु व्याप्तिज्ञानमनुमितिकरणमुक्तम्, तस्य को व्यापारः, व्यापारवत्कारणस्यैव करणत्वात् इति चेत्, व्याप्तिज्ञानस्य परामर्शो व्यापारः, परामर्शश्च व्याप्ति-प्रकारकपक्षधर्मतानिश्चयः। ननु करणस्य व्याप्ति-ज्ञानस्य केन रूपेण हेतुत्वम्? न तावद् व्याप्तिज्ञान-त्वेन, साध्यत्वसाधनत्वयोरनुगतयोरभावात्, वह्न्यादि-धूमादिभेदेन व्याप्तेर्भिन्नत्वात्, वह्निधूमघटितव्याप्ति-ज्ञानत्वेन अनुमितिहेतुत्वे द्रव्यत्वपृथिवीत्वघटित-व्याप्तिज्ञानजन्यानुमितौ व्यभिचारापत्तेः। मैवम्; व्याप्तिज्ञानस्य हि अनुमितिहेतुत्वं ज्ञानत्वेनैव, ज्ञान-

(५) 'सामानाधिकरण्यरूपतया' इति ग—पुस्तके।

(६) 'विनानुत्पादात्' इति क—पुस्तके।

त्वञ्च सकलव्याप्तिज्ञाने अस्त्येवेति न व्यभिचारः। न चैवं घटज्ञानादपि वह्न्याद्यनुमितिः स्यादिति वाच्यम्, व्यापारीभूतपरामर्शविरहादेव तदनुत्पादात् परामर्शसत्त्वे चेष्टापत्तेः।

अथ अनुमितिं प्रति परामर्शस्यैव केन रूपेण हेतुत्वम्? न च परामर्शत्वेन हेतुत्वम्; परामर्शत्वञ्च अनुमितिकारणतावच्छेदकतया सिद्धो जातिविशेष इति वाच्यम्, चाक्षुषत्वादिना साङ्कर्य्यात्; चाक्षुषत्वं विहाय परामर्शत्वस्य वह्निव्याप्यधूमवान् पर्वत इति मानसे सत्त्वात्, परामर्शत्वं विहाय चाक्षुषत्वस्य घट इति चाक्षुषे सत्त्वात्, वह्निव्याप्यधूमवान् पर्वत इति चाक्षुषे च तदुभयोः सामानाधिकरण्यात्। न च चाक्षुषत्व-द्वयम्, एकं परामर्शत्वव्याप्यम् अपरं तद्विरुद्धमिति न साङ्कर्य्यमिति वाच्यम्, विनिगमकाभावात्, परा-मर्शत्वनानात्वस्यापि वक्तुं शक्यत्वात्, उभयथैव साङ्कर्य्यवारणसम्भवात्। न च परामर्शत्वं मानसत्व-व्याप्यजातिः, तथा च चाक्षुषत्वमादाय न साङ्कर्य्यं, चाक्षुषत्वस्य मानसावृत्तितया परामर्शत्वचाक्षुषत्वयोः परस्परसामानाधिकरण्याभावादिति वाच्यम्, भक्ति-

त्रापि तुल्ययुक्त्या मानसत्वव्याप्यजातितया तदादाय साङ्कर्य्यात्। परामर्शत्वं विहाय भक्तित्वं 'भवतोऽहमपकृष्ट' इति मानसे, भक्तित्वं विहाय परामर्शत्वं 'वह्निव्याप्यधूमवान् पर्वत' इति मानसे, तदुभयसामानाधिकरण्यञ्च 'भवतोऽहमपकृष्टः वह्निव्याप्यधूमवांश्च' इति समूहालम्बनमानस इति।

ननु अनुमितिपरामर्शयोर्विशिष्य कार्य्यकारणभावो वाच्यः, तथाहि पर्वतविशेष्यकवह्निविधेयकानुमितिं प्रति अप्रामाण्यग्रहाभावविशिष्टपर्वतविशेष्यक-वह्निव्याप्यधूमप्रकारकनिश्चयत्वेन हेतुत्वम्। इदं ज्ञानमप्रमेत्यप्रामाण्यज्ञानविशिष्ट-वह्निव्याप्यधूमवत्पर्वतनिश्चयसत्त्वे पर्वतो वह्निमान् इत्यनुमित्यनुत्पादात् अप्रामाण्यग्रहाभावविशिष्टत्वं विशेषणम्। पर्वतो वह्निव्याप्यधूमवान्नवेति संशयात् पर्वतो वह्निमानित्यनुमित्यनुत्पादात् निश्चयत्वपर्य्यन्तानुधावनम्। निश्चयत्वञ्च तदभावाप्रकारक-तत्प्रकारकज्ञानत्वमिति चेन्न; वह्निव्याप्यालोकवान् पर्वत इति निश्चयजन्यायां पर्वतो वह्निमानित्यनुमितौ व्यभिचारात्, तदनुमितिपूर्वं पर्वतविशेष्यक-वह्निव्याप्यधूमप्रकारकनिश्चयाभावात्।

अत्र वदन्ति ;— धूमलिङ्गकपर्वतविशेष्यकवह्निविधेयकानुमितिं प्रति पर्वतविशेष्यकवह्निव्याप्यधूमप्रकारकनिश्चयत्वेन हेतुत्वम् । धूमलिङ्गकत्वञ्च जातिविशेषः । स च वह्निव्याप्यधूमवान् पर्वत इति निश्चयजन्यानुमितावेवास्ति तस्या धूमलिङ्गकत्वात्, न तु वह्निव्याप्यालोकवान् पर्वत इतिनिश्चय(१)जन्यायामनुमितौ इति न व्यभिचारः । ननु तुल्ययुक्त्या आलोकलिङ्गकपर्वतविशेष्यकवह्निविधेयकानुमितिं प्रति पर्वतविशेष्यकवह्निव्याप्यालोकप्रकारकनिश्चयत्वेन हेतुत्वं वाच्यम् ; आलोकलिङ्गकत्वञ्च(२) जातिविशेषः । तथाच धूमलिङ्गकत्वं (३) न जातिः आलोकलिङ्गकत्वेन साङ्कर्य्यात् । तथाहि धूमलिङ्गकत्वं विहाय आलोकलिङ्गकत्वं वह्निव्याप्यालोकवान् पर्वत इतिनिश्चयजन्यानुमितौ, आलोकलिङ्गकत्वं विहाय धूमलिङ्गकत्वं वह्निव्याप्यधूमवान् पर्वत इति निश्चयजन्यानुमितौ, तदुभयसामानाधिकरण्यञ्च (४)

---

(१) 'इत्यादिनिश्चय' इति ख—पुस्तके ।

(२) 'लिङ्गकत्वम्' इति ग—पुस्तके ;

(३) 'लिङ्गकत्वञ्च' इति ग—पुस्तके ।

(४) 'करण्य' इति ग—पुस्तके ।

वह्निव्याप्यधूमवान् वह्निव्याप्यालोकवांश्च पर्वत इति समूहालम्बनात्मकपरामर्शजन्यायामनुमितावितिं । मैवम्; तत्र हि धूमलिङ्गकत्वं न जातिः, न वा आलोकलिङ्गकत्वम्,(५) किन्तु आलोकधूमोभयलिङ्गकत्वं जातिविशेषः, तथा च तदुभयोः सामानाधिकरण्यमेव नास्तीति न साङ्कर्य्यम्। न च तत्र धूमलिङ्गकत्वावच्छिन्नं आलोकलिङ्गकत्वावच्छिन्नं (६) वा कुतो न जायते सामग्रीसत्त्वादिति वाच्यम्; धूमलिङ्गकत्वावच्छिन्नं प्रति आलोकलिङ्गकत्वावच्छिन्नसामग्र्या आलोकलिङ्गकत्वावच्छिन्नं प्रति च धूमलिङ्गकत्वावच्छिन्नसामग्र्याः प्रतिबन्धकत्वात्(७)। एवं भस्मलिङ्गकत्वादिना साङ्कर्य्यमपि (८) उक्तदिशा वारणीयमिति दिक्।

आचार्यास्तु लिङ्गोपहितलैङ्गिकभानं स्वीकृत्य वह्निव्याप्यधूमवान् पर्वत इति परामर्शात् वह्नि-

---

(५) 'न वा आलोकलिङ्गकत्वम्' इति पाठः ग—पुस्तके पतितः।

(६) 'आलोकलिङ्गकत्वावच्छिन्नम्' इति पाठः ग—पुस्तके नास्ति।

(७) 'आलोकलिङ्गकत्वावच्छिन्न' प्रति धूमलिङ्गकत्वावच्छिन्नसामग्र्या' इति क—पुस्तके अस्ति।

(८) 'भस्मलिङ्गकत्वादीना'इति ग—पुस्तकपाठः।

व्याप्यधूमवान् पर्वतो वह्निमान् इत्याकारिका अनुमितिर्जायते वह्निव्याप्यालोकवान् पर्वत इति परामर्शात् वह्निव्याप्यालोकवान् पर्वतो वह्निमान् इत्याकारिका अनुमितिर्जायते, एवं भस्मादिलिङ्गकस्थलेऽपि बोद्धव्यमिति वदन्ति। लिङ्गोपहितलैङ्गिकभानमित्यस्य हि साध्यव्याप्यस्वरूपं यल्लिङ्गं तद्विशिष्टे लैङ्गिकभानम् लिङ्गजन्या साध्यप्रकारिका अनुमितिरित्यर्थः। युक्तञ्चैतत्। एवञ्च(९) वैजात्यान्यनङ्गीकृत्यैव अनुमितिपरामर्शयोः कार्य्यकारणभावकल्पनात्। तथाहि वह्निव्याप्यधूमवान् पर्वतो वह्निमान् एतादृशानुमितिं प्रति अप्रामाण्यज्ञानाभावविशिष्टवह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिश्चयत्वेन हेतुत्वम्, वह्निव्याप्यालोकवान् पर्वतो वह्निमानेतादृशानुमितिं प्रति अप्रामाण्यग्रहाभावविशिष्टवह्निव्याप्यालोकप्रकारक-पर्वतविशेष्यकनिश्चयत्वेन हेतुत्वम् इति रीत्या कार्य्यकारणभावकल्पना। अत्र च(१०) न क्वापि व्यभिचार इति। तन्मन्दम्; यत्रादौ वह्निव्याप्यधूमाभाववान् पर्वत इति अलौकिकप्रत्यक्षं,

(९) 'एवं सति' इति क—पुस्तके।

(१०) 'तच्च क्वापि न व्यभिचार' इति ग—पुस्तके।

तदनन्तरं वह्निव्याप्यधूमवान् पर्वत इति लौकिक-प्रत्यक्षम्, तत्र तेषामनुमित्यपलापापत्तेः। तत्प्रकारकानुमितिं प्रति तदभावप्रकारकनिश्चयस्य प्रतिबन्धकतया वह्निव्याप्यधूमाभाववान् पर्वत इति निश्चयस्य सत्त्वे वह्निव्याप्यधूमवान् पर्वतो वह्निमान् इत्यनुमित्युत्पादासम्भवात्। न चैवम् अलौकिकतदभावप्रकारकप्रत्यक्षानन्तरमेव कथं तल्लौकिकप्रत्यक्षमिति वाच्यम्; लौकिकप्रत्यक्षान्य-तद्वत्ताबुद्धिं प्रत्येव तदभावनिश्चयस्य प्रतिबन्धकत्वात्। अस्मन्मते च उक्तस्थले नानुमित्यपलापः; अस्मन्मते हि पर्वतो वह्निमानित्याकारिकैवानुमितिर्जायते, तत्र च वह्निव्याप्यधूमाभावनिश्चयो न विरोधी, तद्वत्ताबुद्धिं प्रत्येव तदभावनिश्चयस्य विरोधित्वादिति संक्षेपः। ननु (११) पर्वतो वह्निमानिति निश्चयसत्त्वे पर्वतो वह्निमानित्यनुमितिः कुतो न जायत इति चेत् पक्षतावि[रहात्]? अनुमितिं प्रति पक्षताया अपि हेतुत्वात्।

अथ व्याप्तिस्वरूपनिरूपणानन्तरं व्याप्तिग्रहोपायनिरूपणमुपक्रमते नन्वनुमितिमित्यादिना। व्यभिचारज्ञानविरह इत्यादिः, अत्र व्यभि-

(११) 'अस्मन्मते हि' इत्यनन्तरं 'ननु' इति पर्य्यन्तपाठः ग—पुस्तके पतितः।

चारज्ञानविरहत्वेन सहचारदर्शनत्वेन च पृथगेव हेतुताद्वयम्, न तु व्यभिचारज्ञानविरहविशिष्टसहचारदर्शनत्वेन, विनिगमनाविरहात् व्यभिचारज्ञानविरहविशिष्टसहचारनिश्चयत्वेन सहचारनिश्चयविशिष्ट-व्यभिचारज्ञानविरहत्वेन च गुरुधर्मेण कारणताद्वयप्रसक्त्या गौरवात्। सहचारदर्शनञ्च निश्चयरूपं ग्राह्यं, सहचारसंशये व्याप्तिग्रहानुत्पत्तेः।

निश्चयः श्रद्धा चेति ;—तथाहि व्यभिचारज्ञानत्वेनैव व्याप्तिनिश्चय-प्रतिबन्धकत्वम्, अत्र प्रतिबन्धकतावच्छेदककोटौ ज्ञानत्वं प्रतिबध्यता-वच्छेदककोटौ च निश्चयत्वं निविशते व्यभिचारसंशये व्याप्तिसंशय-स्यानुभविकत्वात्। व्याप्तेः साध्यसाधनसामानाधिकरण्यविशिष्ट-तयेति व्यापकसामानाधिकरण्यविशिष्टधूमत्वादेः उपाध्यभावविशिष्ट-साध्यसामानाधिकरण्यविशिष्टहेतुतावच्छेदकादेर्वा व्याप्तित्वमभ्युपेत्य। सहचारशब्दस्य साध्यसामानाधिकरण्यसाधनसामानाधिकरण्यान्यतर-स्वरूपत्वे यद्धर्मावच्छिन्नसमानाधिकरणा इत्यादि-निष्कृष्टव्याप्तिलक्षण-स्यापि द्विविधसहचारघटिततया यथाश्रुतमेव सम्यक्।

क्वचित् स्वतःसिद्धत्वादिति,—तर्काभावातिरिक्त-यावत्संशयसामग्र्या-समवधानस्थले व्यभिचारज्ञानसम्भावनाभावात् न हि व्यभिचारज्ञान-विरहो विशेषप्रयोजकमपेक्षत इति तत्र सति सहचारदर्शने व्याप्ति-निश्चयो निरावाध एवेति भावः।

क्वचिच्चेति,—यत्र तर्काभावातिरिक्त-सकलसंशयसामग्री समवहिता तत्रेत्यर्थः। तत्र तादृशतर्कावतारेणैव व्यभिचारज्ञानविरहः सम्पाद्यः, तादृशं तर्कमन्तरेण तर्काभावरूपकारणस्यापि समन्वयेन संशयस्या-वश्यम्भावात् व्यभिचारज्ञानरूपप्रतिबन्धकस्य जागरूकतया व्याप्ति-निश्चयो न सम्भवतीति प्रकृततर्केण व्यभिचारज्ञानं विघटय्य व्याप्ति-निश्चय उपपादनीय इति भावः।

ननु तर्कस्य केन रूपेण तादृशतादृशज्ञानं प्रति प्रतिबन्धकत्वमिति

चेदत्र ब्रूमः, ;—तज्ज्ञानं प्रति तदापादक-तर्कत्वेन प्रतिबन्धकत्वम्। तथाहि प्रकृते धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यात् इत्यस्मिन् तर्के वह्निव्यभिचार आपादकः, वह्निजन्यत्वाभाव आपाद्यः, धूमः पक्षः। आपत्तौ बाधस्य अनुगुणत्वम्। तदस्य तर्कस्य वह्निव्यभिचारापादकत्वेन वह्निव्यभिचारज्ञानं प्रति प्रतिबन्धकतया सति तादृशे तर्के नालं वह्निव्यभिचारज्ञानं लब्धपदं भवितुमिति। न च तर्के प्रत्यपि आपाद्यव्याप्यापादकवत्तानिश्चयस्य कारणत्वेन तत्रापि व्यभिचारसंशयस्य व्याप्तिनिश्चयविघटकतया तर्क एव न शक्नोत्यवतरितुमिति कुतस्तेन व्यभिचारज्ञानस्य विघटनमिति वाच्यम्, यत्र कुत्रापि मूले तर्कजनकव्याप्तिज्ञानविघटकव्यभिचारज्ञानस्य तर्काभावातिरिक्तकारणविरहेणापि सम्भवादिति ध्येयम्।

चात्तुषत्वं विहायेत्यादिकन्तु स्वाभाववद्वृत्तित्व-स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्व-स्वसामानाधिकरण्यैतत्त्रितयसम्बन्धेन जातिविशिष्टत्वरूप-साङ्कर्यं ग्राहयितुम्।

धूमलिङ्गकत्वञ्चेति,—ननु आपत्तावपि आपाद्यव्याप्यापादकवत्तानिश्चयरूपपरामर्शस्य कारणतया तत्रापि व्यभिचारवारणाय तत्तल्लिङ्गकत्वस्यावश्यनिवेशनीयत्वेन अनुमितित्वापत्तित्वजातिभ्यां साङ्कर्यात् धूमलिङ्गकत्वादीनां जातित्वव्याघात इति चेन्न अनुमितावेकस्य धूमलिङ्गकत्वसामान्यस्य आपत्तौ चान्यस्य धूमलिङ्गकत्वसामान्यस्य अभ्युपगमेन साङ्कर्यस्य वारयितुं शक्यत्वात्, तथात्वेऽपि स्वाभिप्रेतसिद्धेरप्रत्यूहत्वात्। वस्तुतस्तु धूमलिङ्गकत्वस्य जातित्वकथनं सुतरामभिनवमेव धूमलिङ्गपरामर्शाव्यवहितोत्तरजायमानत्वादिकमेव धूमादिलिङ्गकत्वमित्यस्यैव साम्प्रदायिकत्वात्।

वैजात्यान्यनङ्गीकृत्येवेति,—धूमलिङ्गकत्वादिरूपाणि सम्प्रदाया-

ननुमतानि वैजात्यानि अस्वीकृत्यैव इत्यर्थः। तादृशं कार्यकारणभावं सङ्गमयति तथाहीत्यादिना।

---

ननु का पक्षता ? न तावत् साध्यसन्देहः पक्षता, संशयं विनापि वह्निव्याप्यधूमवत्पर्वतनिश्चयाज्जायमानानुमितौ व्यभिचारात्। उच्यते ;—सिषाधयिषाविरहविशिष्टसिद्धाभावः पक्षता। सिषाधयिषा च अनुमितिविषयकेच्छा। सिद्धिश्च पक्षतावच्छेदकरूपेण पक्षे साध्यतावच्छेदकरूपेण साध्यप्रकारकनिश्चयः। तथा च अनुमितीच्छाविरहविशिष्टो यः पक्षतावच्छेदकरूपेण पक्षे साध्यतावच्छेदकरूपेण साध्यनिश्चयः(१) तदभावः पक्षतेत्यर्थः। तथा च पर्वतो वह्निमानिति निश्चयसत्त्वे विना सिषाधयिषां नानुमितिः सिषाधयिषाविरहविशिष्टसिद्धाभावरूपपक्षतायाः अभावात्।

न च सिद्धाभावमात्रं पक्षता अस्तु, किं विशिष्टान्तविशेषणेनेति वाच्यं, यत्र सिषाधयिषाविशिष्टा सिद्धिः तत्र अनुमित्यनुत्पादापत्तेः, सिद्धा-

---

[१] 'साध्यप्रकारकनिश्चयः सा पक्षतेत्यर्थः' इति क—पुस्तकपाठे 'तदभाव' इत्ययमंशः पतितः।

भावाभावात्। विशिष्टान्तस्य सिद्धेर्विशेषणत्वे तु नात्मानुमित्यनुत्पादः, (२) सिषाधयिषाविरहरूपं यद् विशेषणं तदभावकृतविशिष्टाभावसत्त्वात्।

सामानाधिकरण्येन सिद्धिसत्त्वऽपि सिषाधयिषां विनापि अवच्छेदकावच्छेदेनानुमित्युत्पादात् अवच्छेदकावच्छेदेनानुमितिं प्रति अवच्छेदकावच्छेदेन सिद्धिरेव प्रतिबन्धिका। अवच्छेदकसामानाधिकरण्येनानुमितिं प्रति अवच्छेदकावच्छेदेन अवच्छेदकसामानाधिकरण्येन (३) च सिद्धिर्विरोधिनीत्यवधेयम्।

प्राभाकरास्तु (४) द्वित्रिक्षणान्तरितायामनुमितीक्षायां (५) सिद्धिसत्त्वेऽपि अनुमितेरुत्पादात् (६) पक्षता नानुमितिहेतुरित्याहुः।

पक्षतापरीक्षणमुपक्रमते न तावदित्यादिना। व्यभिचारादिति,—वह्निसंशयं प्रति वह्निमत्तानिश्चयस्येव वह्निव्याप्यवत्तानिश्चयस्यापि तिबन्धकतया परामर्शकाले तदनन्तरं वा तादृशसंशयस्यासम्भवात्

---

(२) 'सिद्धेर्विशेषणत्वे नानुमित्यनुत्पाद' इति ग—पुस्तके।

(३) 'अवच्छेदकसामानाधिकरण्येनेत्यत्र केवलं सामानाधिकरण्येने'ति ग—पुस्तके।

(४) 'प्रभाकरास्तु' इति क—पुस्तके।

(५) 'मितीक्षायाम्' इति क—पुस्तके।

(६) 'अनुमित्युत्पादात्' इति क—पुस्तके।

आहार्यसंशयस्य अनभ्युपगमात् अभ्युपगमे वा अनाहार्यत्वस्य कारणतावच्छेदकगर्भे निवेशात् प्रकृते व्यभिचारः। न च तादृशपरामर्शात् पूर्वं संशयसत्त्वे बाधकाभावात् तत्रापि नानुमित्यनुपपत्तिरिति वाच्यं यत्र संशयसामग्रीविरहेण पूर्वमपि संशयो नावतीर्णस्तत्रैव व्यभिचारस्य दर्शयितुं शक्यत्वात्।

सिषाधयिषाविरहविशिष्टेत्यत्र वैशिष्ट्यम् एकक्षणावच्छिन्नैकालवृत्तित्वसम्बन्धेन, केवलसामानाधिकरण्यसम्बन्धेन तन्निरुक्तौ सिषाधयिषादशायामपि सिद्धौ कालान्तरावच्छेदेन सिषाधयिषाविरहवैशिष्ट्यसम्भवात् तादृशसिद्धेरभावरूपपक्षताविरहात् अनुमित्यपलापापत्तेः। अत्रेदमवधेयम्,—यत्र सिषाधयिषा नास्ति सिद्धिरपि नास्ति तत्र परामर्शसत्त्वे अनुमितिः, यत्र सिषाधयिषा सिद्धिश्च तत्रापि तथा, यत्र सिषाधयिषा नास्ति सिद्धिश्चास्ति तत्र सिषाधयिषाविरहविशिष्टायाः सिद्धेरेव सत्त्वेन नानुमितिरिति सर्वत्र समञ्जसम्।

सामानाधिकरण्येनेति संयोगत्वादिभावच्छिन्नसंसर्गताकेत्यर्थः। अवच्छेदकावच्छेदेनेति पक्षतावच्छेदकव्यापकसाध्यप्रतियोगिकसंसर्गावगाहित्वेनेत्यर्थः। सर्वमन्यत् पक्षताप्रकरणादावनुसन्धेयम्।

प्राभाकरास्त्विति,—तथाहि तन्मते पक्षताया अनुमितिहेतुत्वे तत्रैव निरुक्तसिद्ध्यभावरूपपक्षताविरहात् नानुमितिरुपपद्येत इति भावः

—००—

अथानुमानं न प्रमाणम्, धूमदर्शनानन्तरं पर्वतो वह्निमान् इति ज्ञानं हि मानसोपनीतभानमेव भविष्यति। न च अनुमिनोमीत्यनुभव-साक्षिक-

मनुमितित्वं दुरपह्नवम्, दूत्यञ्च तदवच्छिन्नं प्रति परामर्शादेः कारणत्वमावश्यकम्, इतरथा तदवच्छिन्नस्याकस्मिकत्वापत्तेः, तथा च अनुमानप्रामाण्यखण्डने किं लाघवमिति वाच्यम्, न हि वयमनुमितित्वं खण्डयामः, किन्तु तत् मानसत्वव्याप्यमेव उच्यते, अन्यथा अनुमितिं प्रति कारणान्तरकल्पनापत्तेः(१), अनुमितित्वस्य मानसत्वव्याप्यत्वे मानसं प्रति कृप्तकारणताकादेव उत्पत्तिरिति (२) चेन्न अनुमितित्वस्य मानसत्वव्याप्यत्वे गुरुतरबहुतर-प्रतिबध्य-प्रतिबन्धककल्पनापत्तेः। तथाहि पर्वतो वह्निमानित्यनुमित्युत्पत्तिकाले घटादिमानसवारणाय घटादिमानसं प्रति वह्न्यनुमितिसामग्रीत्वेन प्रतिबन्धकत्वमावश्यकम्। तत्र च अनुमितेः घटमानसत्वमेव(३) प्रतिबध्यतावच्छेदकम्, भवन्मते तु अनुमितिभिन्नघटमानसत्वाद्यन्तर्भावेण(४) प्रतिबध्यप्रतिबन्धकभावकल्पने

---

(१) 'करणकारणताकल्पनापत्तेः' इति इति क—पुस्तके।

(२) 'व्याप्यत्वे तु मानसं प्रति कृप्तकारणताकादेव उपपत्तेः' इति ख—पुस्तके;

(३) 'तथा च अनुमिते घटमानसत्वादिकमेव' इति क—पुस्तके।

(४) 'भवन्मते तु अनुमितिभिन्न-घटमानसत्वादिकं, तथा च घटपटमानसत्वाद्यन्तर्भावेण' इति क—पुस्तके।

अनुमितिभिन्नत्वनिवेशे भवतां गौरवमिति। न च ममापि घटमानसत्वादिकमेव प्रतिबध्यतावच्छेदकं वाच्यम्, कथमनुमितिभिन्नत्वनिवेशः कार्य्य इति वाच्यम्, यत्र वह्निव्याप्यधूमवान् पर्वतः घटव्याप्यवांश्च पर्वत इति समूहालम्बनात्मकः परामर्शः, तत्र अनुमित्यात्मकघटमानसानुत्पादापत्तेः प्रतिबन्धिकाया वह्न्याद्यनुमितिसामग्र्याः सत्त्वात्, अनुमित्यात्मकघटमानसेऽपि घटमानसत्वसत्त्वात् अतो भवतामनुमितिभिन्नत्वनिवेश आवश्यक इति दिक्।

तच्चानुमानं त्रिविधं केवलान्वयिसाध्यकं केवलव्यतिरेकिसाध्यकम् अन्वयव्यतिरेकिसाध्यकञ्चेति(५)। तत्र केवलान्वयिसाध्यकमनुमानम् इदं वाच्यं ज्ञेयत्वादित्यादि, तत्र साध्यस्य वाच्यत्वस्य केवलान्वयित्वात्। केवलान्वयित्वञ्च अत्यन्ताभावाप्रतियोगित्वं, भवति च वाच्यत्वम् अत्यन्ताभावाप्रतियोगि, वाच्यत्वस्य सर्वत्र सत्त्वेन क्वचिदपि तस्य अत्यन्ताभावाभावात्।

केवलव्यतिरेकिसाध्यकानुमानञ्च तत् यद्

---

[५] 'साध्यकञ्च' इति क—पुस्तके।

अगृहीतान्वय-व्यतिरेकिसाध्यकम् ; अस्यार्थः,—यस्य साध्यम् अगृहीतान्वयं सत् व्यतिरेकि अत्यन्ताभाव-प्रतियोगि तत् केवलव्यतिरेकिसाध्यकमनुमानम् (६)। यथा—पृथिवी जलादिभ्यो भिद्यते गन्धवत्त्वात् इत्यनुमानम्। तत्र जलादिभेदरूपं यत् साध्यं * तदगृहीतान्वयं, गन्धवत्त्वेन हेतुना सह जलादिभेदस्य क्वचिदपि अन्वयसहचारस्य अनिश्चयात्। न च घटादावेव तन्निश्चय इति वाच्यम्, पृथिवीमात्रस्य पक्षतया घटादेरपि पक्षत्वात्, पक्षे च साध्यस्य सन्दिग्धतया तत्र साध्यसहचारनिश्चयासम्भवात्। जलादिभेदरूपं यत् साध्यं तद् व्यतिरेकि च तद्व्यतिरेकस्य जलादावेव सत्त्वात्, अत एतदनुमाने अगृहीतान्वयव्यतिरेकिसाध्यकानुमानत्वमस्तीति।

यस्य साध्यं गृहीतान्वयं सत् व्यतिरेकि तत् अन्वयव्यतिरेक्यनुमानम्। यथा,—पर्वतो वह्निमान् धूमादित्यादिकम्। अत्र वह्निरूपं यत् साध्यं तत् गृहीतान्वयं, महानसादौ वह्निधूमयोः सहचारनिश्च-

---

(६) 'व्यतिरेक्यनुमानम्' इति ग—पुस्तके।

यात्, वह्निस्वरूपं यत् साध्यं * तद् व्यतिरेकि च तदभावस्य जलादौ सत्त्वादिति ।

अनुमितित्वस्य मानसत्वव्याप्यतापरोक्षणमुपक्रमते अथानुमानमित्यादिना । मानसोपनीतेति—उपनयसन्निकर्षात्मकालौकिकज्ञानलक्षणसन्निकर्षजन्यं मानसप्रत्यक्षमित्यर्थः ।

करणान्तरेति,—तथाहि अनुमितित्वस्य मानसत्वव्याप्यजातित्वे मानसप्रत्यक्षं प्रति क्लृप्तेन करणेन मनसा एव तदवच्छिन्नोत्पत्तिनिर्वाहात् तदर्थं व्याप्तिज्ञानं पृथक्तया करणं न कल्पनीयमन्यथा कल्पनीयमेवेति ।

अनुमितिभिन्नेत्यादि,—अत्रेदमवधेयम् एतन्मते मानसमेव द्विविधं भवति अनुमितिरूपं तद्भिन्नञ्च, तदनुमितिसामग्र्या अविशेषेण मानसं प्रति प्रतिबन्धकत्वे अनुमितेरपि अनुत्पादप्रसङ्ग इति अनुमितिभिन्नमानसत्वान्तर्भावेण प्रतिबध्यप्रतिबन्धकभावो निर्वाच्यः, एवञ्च नायं दोषः, एतदेव परिष्करोति यत्रेत्यादिना ।

केवलान्वयित्वञ्चेति,—गगनाभावादेः केवलान्वयित्वसम्पत्तये वृत्तिमदत्यन्ताभावाप्रतियोगित्वमिति केवलान्वयिलक्षणं वक्तव्यम्, अन्यथा अभावविरहात्मत्वं वस्तुनः प्रतियोगितेत्याचार्य्यसिद्धान्तसमादरेण गगनादौ गगनाभावाभावादिस्वरूपत्वस्यावश्यमभ्युपगन्तव्यत्वेन गगनाभावादौ सामान्यतोऽत्यन्ताभावाप्रतियोगित्वस्य असम्भवेन केवलान्वयिलक्षणाव्याप्तिप्रसङ्गात् ।

अगृहीतान्वयमिति,—अनवगतान्वयसहचारमित्यर्थः । पृथिवीमात्रस्येति मात्रशब्दः कार्त्स्न्ये, यावतामेव पृथिवीत्वजात्याश्रयाणामित्यर्थः । पक्षतया सन्दिग्धसाध्यकतया, पक्षत्वात् साध्यसन्देहविशेष्यत्वादित्यर्थः ।

---

* एतदाकारचिह्नद्वयान्तर्गतांशः क—पुस्तके स्खलितः ।

तच्चानुमानं स्वार्थं परार्थञ्च। तत्र स्वप्रतिपत्ति-हेतुत्वं(१) स्वार्थत्वं, परप्रतिपत्तिहेतुत्वं(२) परार्थत्वम्। परार्थानुमानञ्च न्यायसाध्यम्। न्यायत्वञ्च उचितानुपूर्वीक-प्रतिज्ञादिपञ्चकसमुदायत्वम्। उचितानुपूर्वीकत्वञ्च विरुद्धानुपूर्वीकान्यत्वं(३), विरुद्धानुपूर्वीकान्यत्वे सति प्रतिज्ञादिपञ्चकसमुदायत्वं लक्षणार्थः। प्रतिज्ञादिपञ्चकं प्रतिज्ञाहेतूदाहरणोपनयनिगमनात्मकम्। भवति च पर्वतो वह्निमान् धूमात्, यो यो धूमवान् स वह्निमान् यथा महानसं, वह्निव्याप्यधूमवानयं, तस्माद् वह्निमान् इति महावाक्यं प्रतिज्ञादिपञ्चकमिति लक्षणसङ्गतिः। व्युत्क्रमोक्तप्रतिज्ञादिपञ्चके अति-व्याप्तिवारणाय सत्यन्तम्। विरुद्धानुपूर्वीकान्य-प्रतिज्ञादिपञ्चकं तदेव भवति, यदि प्रतिज्ञानन्तरं हेतुः, हेत्वनन्तरमुदाहरणं,(४) तदनन्तरमुपनयः तद-नन्तरं निगमनं प्रयुज्यत इति। तत्र हेत्वभिधान-प्रयोजकजिज्ञासाजनकन्यायावयवत्वं प्रतिज्ञात्वम्।

---

(१) 'हेतुकत्वम्' इति क—पुस्तके।

(२) 'हेतुकत्वम्' इति क—पुस्तके।

(३) 'विरुद्धानुपूर्वीकान्यत्वम्' इत्यंशः ग—पुस्तके स्खलितः।

(४) 'हेतु'रिति ग—पुस्तके स्खलितम्।

जायते च प्रतिज्ञावाक्यात् पर्वते वह्निमत्त्वज्ञानानन्तरं कुतोऽस्य पर्वतस्य वह्निमत्त्वमिति जिज्ञासा, तदनन्तरं हेत्वभिधानं क्रियत इति भवति तादृशजिज्ञासा हेत्वभिधानप्रयोजिका, तज्जनकत्वं न्यायावयवत्वञ्च अस्ति पर्वतो वह्निमानित्यादिवाक्ये इति लक्षणसमन्वयः। उदासीनवाक्ये अतिव्याप्तिवारणाय न्यायावयवत्वरूपं विशेष्यदलम्।

न च न्यायावयवत्वमात्रं प्रतिज्ञालक्षणं क्रियतां किं जनकान्तदलेनेति वाच्यं हेत्ववयवादावतिव्याप्तेः तस्यापि न्यायावयवत्वात्। जनकान्तदलोपादाने तु नातिव्याप्तिः तस्य हेत्वभिधानप्रयोजकजिज्ञासाजनकत्वाभावात्।

हेतुत्वञ्च न्यायावयवत्वे सति स्वार्थविशिष्टवैशिष्ट्यबोधजनकत्वम्। भवति च धूमादिति वाक्यं तथा। तत्र धूमपदस्य धूमोऽर्थः, पञ्चम्या ज्ञानज्ञाप्यत्वमर्थः, तथा च धूमज्ञानज्ञाप्यत्वस्य वैशिष्ट्यं प्रतिज्ञार्थैकदेशे वह्नावन्वेति तस्य च पर्वते अन्वय इति हेत्ववयवस्य स्वार्थविशिष्टवैशिष्ट्यबोधजनकत्वमस्तीति लक्षणसङ्गतिः। अत्रापि उदासीनवाक्ये अतिव्याप्तिवारणाय सत्यन्तम्। तथा च उदासीनवाक्यस्य

न्यायावयवत्वाभावात् नातिव्याप्तिः। एवमुदाहरणादि-लक्षणेऽपि उदासीनवाक्यवारणाय सत्यन्तम्।

उदाहरणत्वञ्च न्यायावयवत्वे सति इतरावयवार्थानन्वितस्वार्थबोधजनकत्वम्। भवति च यो यो धूमवान् स वह्निमानित्यादि वाक्यं तथा। तथा च तेन वाक्येन धूमव्यापको वह्निरित्यन्वयबोधस्यैव जननात् इतरावयवार्थानन्वितस्वार्थबोधजनकत्वस्य सत्त्वात्। न च तच्च(५) धूमपदस्य धूमोऽर्थः, वह्निपदस्य च वह्निरर्थः, व्यापकत्वं कस्यार्थ इति वाच्यं, वौप्साया एव हि व्यापकत्वमर्थ इति साम्प्रदायिकाः। नव्यास्तु धूमपदे (६) धूमव्यापके लक्षणा, वौप्सा च तात्पर्य-ग्राहिकेत्याहुः।

उपनयत्वञ्च न्यायावयवत्वे सति समुदितस्वार्थ-विशेष्यकावयवार्थप्रकारकान्वयबोधजनकत्वम्। भवति च वह्निव्याप्यधूमवानयमित्यादि वाक्यं तथा। तथा च तच्च(७) मत्वर्थः सम्बन्धी, तस्य च पर्वते अभेद-सम्बन्धेनान्वयः, तथा च समुदितस्वार्थो वह्निव्याप्य-

---

(५) 'न च तच्चेत्यत्र' ग—पुस्तके तत्रेति नास्ति।

(६) 'धूमपदेन' इति ग—पुस्तके पाठः।

(७) 'तथा तत्र च' इति क—पुस्तकपाठः।

धूमसम्बन्ध्यभिन्नः पर्वतः, तत्र निगमनार्थस्य विशेषणत्वेनान्वयात् वह्निव्याप्यधूमवानयमित्यादिवाक्यस्य समुदितस्वार्थविशेष्यकावयवार्थप्रकारकान्वयबोधजनकत्वमस्तीति लक्षणसमन्वयः। प्रतिज्ञाया अपि स्वार्थैकदेशवह्निविशेष्यक-हेत्वर्थप्रकारकान्वयबोधजनकत्वात् तत्रातिव्याप्तिवारणाय समुदितपदम्। तथा च प्रतिज्ञायाः समुदितस्वार्थविशेष्यकावयवार्थप्रकारकान्वयबोधजनकत्वाभावात् नातिव्याप्तिः।

निगमनत्वञ्च समुदितावयवार्थविशेष्यक-स्वार्थप्रकारकान्वयबोधजनकन्यायावयवत्वम्। भवति च तस्माद् (८) वह्निमानिति वाक्यं तथा, तस्य समुदिते उपनयार्थे वह्निव्याप्यधूमसम्बन्ध्यभिन्ने पर्वते(९) स्वार्थप्रकारकान्वयबोधजनकत्वात्। हेत्ववयवस्यापि प्रतिज्ञार्थैकदेश (१०) वह्न्यादिविशेष्यकान्वयबोधजनकत्वात् (११) अतिव्याप्तिवारणाय समुदितपदम्। तथा च हेत्ववयवस्य समुदितप्रतिज्ञार्थविशेष्यकान्वयबोधजनकत्वाभावात् नातिव्याप्तिः।

(८) 'तथा च तस्माद्' इति क—पुस्तकपाठः।

(९) 'सम्बन्ध्यभिन्नपर्वते' इति ग—पुस्तकपाठः।

(१०) 'प्रतिज्ञार्थैकदेशे' इति ग—पुस्तकपाठः।

(११) 'बोधाजनकत्वात्' इति ग—पुस्तकपाठः।

अथानुमानस्य स्वार्थपरार्थभेदेन द्वैविध्यमभिधाय परार्थानुमानोपयोगिन्याय-तदवयवनिरूपणमुपक्रमते तत्रानुमानं स्वार्थमित्यादिना। स्वप्रतिपत्तौति स्वसमवेता प्रतिपत्तिरित्यर्थः। प्रतिपत्तिपदं प्रकृते अनुमित्यात्मकज्ञानपरम्। लक्षणार्थ इति उचितानुपूर्वीकेत्यादिन्यायलक्षणार्थः। व्युत्क्रमोक्तेति—वक्ष्यमाण-'प्रतिज्ञानन्तरं हेतु'रित्यादिनियमव्यतिक्रमेणोक्तेत्यर्थः। हेत्वनन्तरं प्रतिज्ञा तदनन्तरम् उदाहरणमित्यादिरीत्या प्रयुक्तो व्युत्क्रमोक्तेतिपदार्थः। तत्र हि प्रतिज्ञादिपञ्चकसमुदाये विरुद्धानुपूर्वीकत्वं, न तु तदन्यत्वमिति सत्यन्तदलेन तत्रातिव्याप्तिनिरासः।

हेत्वभिधानेत्यादि,—हेतुलक्षणम् अग्रतः स्वयं वक्ष्यते। भाष्यकारास्तु 'तत्रानुमेयोद्देशोऽविरोधी प्रतिज्ञे'ति लक्षणमुदाहरन्ति। तदर्थश्च स्वयमेव विवृत्याह 'प्रतिपिपादयिषितधर्मविशिष्टस्य धर्मिणोऽपदेशविषयमापादयितुमुद्देशमात्रं प्रतिज्ञे'ति। अविरोधिपदोपादानात् प्रत्यक्षानुमानाभ्युपगतस्वशास्त्रस्ववचनविरोधिनोऽर्था निरस्ता भवन्ति। एतद्विस्तरस्तु न्यायकन्दल्यादौ द्रष्टव्यः।

स्वतन्त्रे पञ्चावयवाः प्रतिज्ञादयः प्रतिज्ञाताः। केचिदन्ये दशावयवानप्याहुः; तदुक्तं वात्स्यायनेन 'दशावयवानेके नैयायिकाः सञ्चक्षते,—जिज्ञासा, संशयः, शक्यप्राप्तिः, प्रयोजनं, संशयव्युदास इति, ते कस्मान्नोच्यन्त' इति। तदेवं जिज्ञासादिपञ्चकं प्रतिज्ञादिपञ्चकञ्चेति दशावयवा व्यवतिष्ठन्ते। तदेतत् सर्वं गौतमसूत्रस्य भाष्ये वृत्तौ च विवृतमुपलब्धव्यम्।

—००—

[ हेत्वाभासप्रकरणम् ]

## स्वीयहेतोः सद्धेतुत्वव्यवस्थापनादिवत् परकीय-

हेतोराभासत्वव्यवस्थापनेनापि प्रमाणतत्त्वनिर्णयात् हेत्वाभासा निरूप्यन्ते। हेतोराभास (१) इति व्युत्त्या हेत्वाभासपदं हेतुदोषपरम्। हेतोराभासो यत्र इति व्युत्पत्त्या तत्पदं दुष्टहेतुपरम्(२)। तत्र हेतुदोषाः पञ्च,—व्यभिचारविरोधसत्प्रतिपक्षासिद्धबाधभेदात्। तल्लक्षणञ्च यादृशविशिष्टविषयकज्ञानत्वेन साध्यव्याप्यवान् पक्षः साध्यवान् इत्याकारकानुमितिप्रतिबन्धकत्वं तादृशविशिष्टत्वम्। भवति च व्यभिचारादिविशिष्टविषयकज्ञानसत्त्वे साध्यव्याप्यवान् पक्षः साध्यवान् इत्यनुमितिप्रतिबन्ध (३) इति व्यभिचारादेर्हेत्वाभासत्वं, तद्वांश्च हेतुर्दुष्टहेतुरिति(४) दुष्टहेतवोऽपि पञ्च।

तत्र व्यभिचारस्त्रिविधः; साधारण्यम्, असाधारण्यम्, अनुपसंहारित्वञ्च। तत्र सपक्षविपक्षवृत्तित्वं साधारण्यम्। साध्यवत्तया निश्चितत्वं सपक्षत्वम्। साध्याभाववत्तया निश्चितत्वं विपक्षत्वम्। भवति च धूमवान् वह्नेरित्यादौ वह्न्यादिहेतुस्तथा।

---

(१) 'हेतोराभासा' इति ग—पुस्तकपाठः।

(२) 'हेतुदुष्टपरम्' इति क—पुस्तकपाठः।

(३) 'प्रतिबन्धक' इति ग—पुस्तकपाठः।

(४) 'तद्वांश्च हेतु'रिति ग—पुस्तकपाठः।

धूमसपक्षे(५) पर्वतादौ धूमविपक्षे अयःपिण्डे च वह्नेः सत्त्वादिति धूमादौ साध्ये वह्न्यादिहेतुः साधारणः।

असाधारणश्च सपक्षविपक्षव्यावृत्तत्वम्। अस्ति च शब्दो नित्यः शब्दत्वादिति हेतोः तथात्वम्, नित्यत्वस्वरूपसाध्यवत्तया निश्चिते व्योमादौ नित्यत्वाभावरूपसाध्याभाववत्तया निश्चिते घटादौ च शब्दत्वस्य अवर्त्तमानत्वात् इति (६) नित्यत्वे साध्ये शब्दत्वं हेतुरसाधारणमिति। न च शब्दे अनित्यत्वसंशयदशायां शब्दोऽनित्यः शब्दत्वादिति सङ्गेतापि असाधारणं स्यात्, अनित्यत्ववत्तया निश्चिते घटादौ अनित्यत्वाभाववत्तया निश्चिते व्योमादौ शब्दत्वस्य अवर्त्तमानत्वादिति वाच्यम्, शब्देऽनित्यत्वसंशयदशायां शब्दत्वे असाधारणस्य इष्टत्वात्। अत एव असाधारणसत्प्रतिपक्षयोरनित्यदोषत्वमिति प्राञ्चः।

वस्तुतस्तु सपक्षत्वविपक्षत्वे न निश्चयगर्भ (७)

---

(५) 'धूमपक्षे' इति क—पुस्तकपाठः।

(६) अनन्तरं 'नित्यत्वे साध्ये' इत्यारभ्य 'शब्दत्वस्य अवर्त्तमानत्वादिति' इत्यन्तः पाठः क—पुस्तके स्खलितः।

(७) 'निश्चयगर्भं साध्यवत्त्व-साध्याभावत्त्वमात्ररूपे तथा च' इति एतन्मात्रं ग—पुस्तके।

किन्तु साध्यवत्त्वसाध्याभाववत्त्वमात्ररूपे, तथा च साध्यवद्व्यावृत्तत्वे सति साध्याभाववद्व्यावृत्तत्वम् असाधारण्यमिति फलितार्थः। तथा च अनित्यत्वे साध्ये शब्दत्वं हेतुः न असाधारणः, तस्य साध्यवति शब्दे सत्त्वेन साध्यवद्व्यावृत्तत्वाभावात्। न चैवं शब्दस्य नित्यत्वे साध्ये शब्दत्वमसाधारणं न स्यात् तस्य नित्यत्वरूपसाध्यस्य अभाववति शब्दे वर्त्तमानत्वादिति वाच्यम्, इष्टत्वात्। तस्य विरुद्धमध्य एव निवेशात्। न चैवम् असाधारणोक्तेद इति वाच्यम्, अवृत्तिगगनादेर्हेतोरेव असाधारणत्वात्, तस्य साध्यवति साध्याभाववति च अवर्त्तमानत्वादिति।

अनुपसंहारित्वञ्च केवलान्वयिधर्म्मव्यापक-साध्यसन्देहविशेष्यताकत्वम्। अस्ति च सर्वमनित्यं प्रमेयत्वादित्यत्र प्रमेयत्वहेतोस्तथात्वम्। अत्र वस्तुमात्रस्य पक्षतया सर्वत्रैव (८( साध्यसंशयविशेष्यत्वसत्त्वेन साध्यसंशयविशेष्यताया वाच्यत्वादिरूपकेवलान्वयिधर्म्मव्यापकत्वात्।

---

(८) 'सर्वत्रैव' इत्यनन्तरं 'साध्यसंशयविशेष्यत्वसत्त्वेन' इति पाठः ग—पुस्तके स्खलितः।

साध्यासामानाधिकरण्यं विरोधः। अस्ति च अयं गौरश्वत्वादित्यादौ अश्वत्वादिहेतोस्तथात्वम्। गोत्वरूपसाध्येन सह अश्वत्वादेरेकाधिकरणवृत्तित्वाभावात्।

सत्प्रतिपक्षत्वं साध्याभावव्याप्यवत्पक्षत्वम्। अस्ति च ह्रदो वह्निमान् ह्रदत्वादित्यादौ ह्रदत्वादिहेतोस्तथात्वम्। वह्निरूपसाध्याभावव्याप्यह्रदत्ववद् ह्रदरूपपक्षकत्वमिति (९) ह्रदत्वहेतुः सत्प्रतिपक्षित इति (१०)।

व्याप्यपक्षधर्मतान्यतरविरहोऽसिद्धिः। सा च त्रिविधा, आश्रयासिद्धि-स्वरूपासिद्धि-व्याप्यत्वासिद्धिभेदात्। तत्र पक्षविशेषणासिद्धिराश्रयासिद्धिः। यथा गगनारविन्दं सुरभि अरविन्दत्वादित्यादौ पक्षस्य अरविन्दस्य विशेषणं यत् गगनीयत्वं, तदभावः पक्षे अरविन्दे।

हेतौ पक्षवृत्तित्वाभावः स्वरूपासिद्धिः। यथा ह्रदो द्रव्यं धूमादित्यादौ हेतोर्धूमस्य ह्रदरूपपक्षवृत्तित्वाभावः।

---

(९) 'पक्षत्वादिति' इति क—पुस्तकपाठः।

(१०) 'सत्प्रतिपक्ष' इति क—पुस्तकपाठः।

हेतोः साध्यस्य च विशेषणासिद्धिर्व्याप्यत्वासिद्धिः। यथा पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ हेतोर्धूमस्य काञ्चनमयत्वरूपविशेषणस्याभावः। यथा पर्वतः काञ्चनमयवह्निमान् धूमादित्यादौ साध्ये च वह्नौ विशेषणस्य काञ्चनमयत्वस्य अभाव इति।

साध्याभाववत्पक्षकत्वं बाधः। यथा ह्रदो वह्निमान् धूमादित्यादौ वह्निस्वरूपसाध्याववद्ह्रदस्वरूपपक्षकत्वं धूम इति। न च किं बाधस्य दोषत्वस्वीकारेण उक्तस्थले असिद्धि-सत्प्रतिपक्षयोरेव सत्त्वादिति वाच्यं, दोषस्य हि स्वरूपसतो (११) नानुमितिप्रतिबन्धकत्वम्, अपि तु तज्ज्ञानस्य। तथा च असिद्धिसत्प्रतिपक्षयोः ज्ञानविरहदशायां बाधस्य निश्चयदशायामनुमितिप्रतिबन्धार्थं बाधस्य दोषत्वस्वीकारस्यावश्यकत्वमिति संक्षेपः।

इत्यनुमानपरिच्छेदः।

अथ परार्थानुमाननिरूपणाङ्गीभूतानां पक्षावयवानां निरूपणेन प्रक्रतानुमाननिरूपणं समाप्य तत्प्रसङ्गात् तत्त्वनिर्णयादिरूपतत्कार्यकारित्वाच्च हेत्वाभासनिरूपणं प्रतिजानीते स्वीयहेतोरित्यादिना। हेत्वाभासपदस्य द्विविधव्युत्पत्त्या हेतुदोषपरत्वं दुष्टहेतुपरत्वञ्चाह

---

(११) 'स्वरूपत' इति क—पुस्तकपाठः।

हेतोराभासा इतोत्यादिना। एतेन हेतुदोषनिरूपणं दुष्टहेतुनिरूपणश्चेत्युभयमपि नासङ्गतं भवति।

तल्लक्षणश्चेति हेतुदोषलक्षणश्चेत्यर्थः। एतेन दोषवत एव दुष्टपदप्रतिपाद्यत्वात् दुष्टहेतुलक्षणमपि निरुक्तं भवतीति ध्येयम्। यादृग्विशिष्टे ति यद्रूपावच्छिन्नविशिष्टेत्यर्थः। हतोयार्थोऽवच्छिन्नत्वं तन्नावच्छेदकत्वमनतिरिक्तवृत्तित्वरूपं ग्राह्यम्। तेन सद्धेतौ भ्रममादाय नातिव्याप्तिः। ज्ञानत्वेनेत्यस्य अप्रामाण्यज्ञानाभावादिविशिष्टसंशयान्यज्ञानत्वेनेत्यर्थः, तेन अप्रामाण्यज्ञानास्कन्दितदोषविषयकनिश्चयस्य तादृशानुमित्यप्रतिबन्धकत्वेऽपि नासम्भवोऽव्याप्तिर्वा।

तद्वांश्चेति व्यभिचाराद्यन्यतमदोषवांश्चेत्यर्थः। एतेन हेतोराभासो यत्रेति व्युत्पत्त्या लभ्यस्य प्रतिज्ञातदुष्टहेतोः निरूपणम् उपदर्शितं भवति।

वह्न्यादिहेतुस्त्वथेति वह्न्यादिहेतुः प्रकृतसपक्षवृत्तित्वे सति प्रकृतविपक्षवृत्तिरित्यर्थः। अनित्यदोषत्वमिति निश्चयस्य असाधारणघटकत्वात् निश्चयस्य च असार्वत्रिकत्वात् शब्दे नित्यत्वसंशये शब्दत्वमसाधारणम्।

निश्चयगर्भ इति निश्चयघटिते निश्चितसाध्यवत्त्वनिश्चितसाध्याभाववत्त्वरूपे इत्यर्थः। एतन्मते अवृत्तिगगनादिरेव असाधारणो हेतुः, वृत्तिपदार्थमात्रस्यैव साध्यवत्साध्याभावदन्यतरवृत्तित्वात्। तदिदमग्रे स्वयमेव उच्यते।

केवलान्वयीत्यादिः—व्यापकत्वं साध्यसन्देहविशेषतायां विशेषणम्। वस्तुमात्रेष्वेव साध्यस्य सन्देहे तथात्वात् सर्वमनित्यमित्यादौ तथात्वम्।

साध्यसामानाधिकरण्यमिति साध्याधिकरणवृत्त्यभाव इत्यर्थः। अत्र साध्याधिकरणत्वं साध्यतावच्छेदकसम्बन्धेन, वृत्तिश्च हेतुतावच्छे-

दकसम्बन्धेन। अन्यथा अयं गौरश्वत्वादित्यादौ कालिकादिसम्बन्ध-मुपादाय अव्याप्तेः।

साध्याभावव्याप्यवदित्यादिः,—एतच्च सत्प्रतिपक्षदोषस्य नित्यत्व-पक्षमवलम्ब्य। सत्प्रतिपक्षदोषस्य अनित्यत्वपक्षे तु विरुद्धानुमिति-जनकपरामर्शविषयीभूतहेत्वन्तरकत्वादिकमेव सत्प्रतिपक्षत्वमिति ध्येयम्।

व्याप्तीत्यादिः,—आश्रयासिद्धिस्थले स्वरूपासिद्धिस्थले च विशिष्ट पक्षस्य पक्षवृत्तिहेतोश्च असिद्धया पक्षधर्मतावि रहः, व्याप्यत्वासिद्धि-स्थले च व्याप्तिघटकीभूतस्य साध्यतावच्छेदकविशिष्टसाध्यस्य हेतुता-वच्छेदकविशिष्टहेतोश्च असिद्धया व्याप्तिविरह इत्यन्यतरविरहवत्त्वात् अत्र सर्वत्रैवासिद्धिलक्षणसमन्वयः। गगनारविन्दमिति गगनीयारविन्द-मित्यर्थः।

ज्ञानविरहदशायामिति,—उत्पत्तिकालीनघटो गन्धवान् पृथिवी-त्वादित्याद्यसङ्कीर्णबाधस्थले केवलेन बाधज्ञानेनैव अनुमितेः प्रतिरोद्ध-व्यत्वात् तत्रैव बाधदोषस्य दोषत्वस्वीकारः सफलः। अन्यत्र तु असिद्ध्यादिभिरपि हेतौ दुष्टत्वव्यवहारः शक्यसम्पादः। अथवा बाध-ज्ञानसामग्रीमात्रसम्बलनस्थलमपि शक्यानुसरणम्।

---

[ उपमानप्रमाण-प्रकरणम् ]

अथोपमानं निरूप्यते। उपमितिकरणमुप-मानम्। उपमितित्वञ्च उपमिनोमीत्यनुव्यवसाय-साक्षिको जातिविशेषः। उपमितिकरणञ्च अति-देशवाक्यार्थज्ञानम्। अतिदेशः सादृश्यं तत्प्रति-

पादकं यद् वाक्यं तदर्थज्ञानमित्यर्थः। गोसदृशो गवयपदवाच्य इत्याद्याकारकः (१)। तस्य व्यापारः अतिदेशवाक्यार्थस्मृतिः। गवयमजानन् पुरुषः गवयोऽस्तीति कस्यचिद् वाक्यं श्रुत्वा गवयपदं किञ्चिद्धर्मावच्छिन्नशक्तिकं साधुपदत्वादित्यनुमाय कीदृग् गवय इति आरण्यक-पुरुषं पृच्छति। तत्र आरण्यक-पुरुषाद् गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यात् शाब्दबोधानन्तरं वनं (२) प्रविष्टो गोसदृशं किञ्चित् पिण्डं पश्यति, ततस्तत्पिण्डदर्शनात् तस्य अतिदेश-वाक्यार्थस्मृतिः। सैव उपमितिकरणस्य सादृश्य-ज्ञानस्य व्यापारः। ततो गवयत्वविशिष्टोऽयं गवय-पदवाच्य इत्युपमितिर्भवतीति उपमानं प्रमाणम्।

अत्रेदमवधेयम्,—न केवलं सादृश्यरूपसाधर्म्य-ज्ञानजन्यैवोपमितिः, (३) वैधर्म्यज्ञानजन्योपमितेरपि सत्त्वात्। यथा का पृथिवीति पृष्टो(४) जलादिवैधर्म्य-

---

(१) 'तदर्थज्ञानम्, गोसदृशो गवयपदवाच्य इत्याकारक'मित्यर्थः। इति क—पुस्तक-पाठः।

(२) 'वनमित्यत्र विपिन'मिति क—पुस्तकपाठः।

(३) 'सादृश्यरूपे'ति पाठो ग—पुस्तके नास्ति।

(४) 'पृष्टे' इति क—पुस्तकपाठः।

वतीत्युक्तः(५) पृथिव्यां जलादिवैधर्म्यं गम्यज्ञानानन्तरम् (६) इयं पृथिवीपदवाच्या इत्युपमितिः ।

## इत्युपमानपरिच्छेदः ।

अथ अनुमाननिरूपणानन्तरम् उपमानप्रमाणं निरूपयितुं प्रतिजानीते अथोपमानमित्यादिना। यद्यपि उपमानप्रमाणापेक्षया बहुवादिसम्मतत्वादुपमानात् प्राक् शब्दप्रमाणं युक्तं निरूपयितुं, तथापि शब्दप्रमाणस्य शक्तिज्ञानसापेक्षतया शक्तिज्ञानस्य च उपमानप्रमाणसापेक्षत्वादादौ उपमानमेव प्रमाणं निरूपणीयमिति नासङ्गतिः ।

वैशेषिकादयस्तु नोपमानं प्रमाणान्तरं मन्यन्ते, ते हि अनुमानप्रमाणेनेदं गतार्थयन्ति। वाचस्पतिमिश्रास्तु 'यत्तु गवयस्य चक्षुःसन्निकृष्टस्य गोसादृश्यज्ञानं तत्प्रत्यक्षम्, अत एव स्मर्यमाणायां गवि गवयसादृश्यज्ञानमपि प्रत्यक्षमेव' इत्युक्तवन्तः ।

मीमांसकानान्तु प्रमाणान्तरमेवोपमानम्, तदुक्तं शास्त्रदीपिकायां 'न चेदमुपमानं प्रत्यक्षान्तर्गतम् अनिन्द्रियसन्निकृष्टत्वात् नगरस्थाया गोः। न चानुमानम् अगृहीतसम्बन्धस्याप्युपजायमानत्वात्। एवं किलानुमीयेत गौर्गवयसदृशो गोसादृश्यप्रतियोगित्वात् यद् यत्सादृश्यप्रतियोगि तत् तत्सदृशं दृष्टमिति। न चेदं युक्तं, यो हि द्वावर्थौ मिथः बहुशो युगपत् न दृष्टवान् एकामेव गामुपलभ्य वने गवयं पश्यति, सोऽपि गां गवयसादृश्यविशिष्टामुपमिनोत्येव। तस्मात् नानुमानम्' इत्यादि ।

नैयायिकानामपि मते अगृहीतव्याप्तिकस्यापि प्रकृतपदवाच्यतासंज्ञानात्मकोपमित्युत्पाददर्शनात् प्रमाणान्तरमेवेदमिति राद्धान्तः ।

---

(५) 'वैधर्म्यं वतीत्यनुक्ते' इति क—पुस्तकपाठ ।

(६) 'वैधर्म्यं ज्ञानानन्तरम्' इति ग—पुस्तकपाठः ।

अत्रेदमवधेयम्—नैयायिकानां किञ्चिज्ज्ञात्यवच्छिन्ने पदवाच्यता-ज्ञानमुपमितिः, मीमांसकवेदान्तिनोस्तु गवयादौ गोसादृश्यज्ञानात् गवादौ गवयादिसादृश्यज्ञानमेव सा। तदुक्तं वेदान्तपरिभाषायां 'सादृश्यप्रमाकरणमुपमानम्, तथाहि नगरेषु दृष्टगोपिण्डस्य पुरुषस्य वनं गतस्य गवयेन्द्रियसन्निकर्षे सति भवति प्रतीतिः,—अयं पिण्डो गोसदृश इति, तदनन्तरञ्च भवति,—अनेन सदृशो मदीया गौरिति। तद् अन्वयव्यतिरेकाभ्यां गवयनिष्ठगोसादृश्यज्ञानं करणं, गोनिष्ठ-गवयसादृश्यज्ञानं फलम्' इति। उक्तञ्च वैशेषिकदर्शने न्यायकन्दल्यां श्रीधराचार्य्येण,—'येऽपि शवरस्वामिप्रभृतयो अनुभूतस्य गोपिण्डस्य वने गवयदर्शनात् स्मृत्यारूढायां गवि मदीया गौरनेन सदृशीति सारूप्यज्ञानमुपमानमाचक्षते' इति।

अतिदेशवाक्यार्थज्ञानमिति,—इदं शिरोवेष्टनेन नासिकास्पर्शनमिति नैयायिकसिद्धान्तग्रन्थान्तरदर्शनादवधेयम्। तथाहि गवयादौ गवादि-सादृश्यज्ञानमेव उपमानमिति दृष्टं तदीयसिद्धान्तग्रन्थान्तरेषु। तदनु-गतार्थनिर्णयस्तु अतिदेशः सादृश्यं तत्प्रतिपादकं वाक्यं तदर्थज्ञान-मपि सादृश्यज्ञानमेव सादृश्यस्यैव प्रकृतवाक्यार्थत्वादिति, अन्यथा स्वीयतन्त्रविरोधः प्रसज्येतेति। सर्वमन्यदूह्यम्।

—००—

[ शब्दप्रमाण-प्रकरणम् ]

**'अथ शब्दप्रमाणं निरूप्यते। शाब्दप्रमाकरणं शब्दप्रमाणम्। 'शाब्दत्वञ्च शाब्दयामीत्यनुव्यवसाय-साक्षिको जातिविशेषः। शाब्दप्रमाकरणञ्च पद-ज्ञानम्। भवति च पयसा सिञ्चतीत्यादिवाक्यज्ञानं**

पयःकरणक-सेकानुकूलकृतिमानित्यादि-शाब्दप्रमाकरणम्। पयःपदेन जलत्वविशिष्टस्य टापदेन करणत्वस्य सिच्पदेन सेकस्य (१) आख्यातेन कृतेरुपस्थापनात् (२)। अत्र पयस्त्वविशिष्टस्य आधेयतासम्बन्धेन करणत्वे, करणत्वस्य निरूपकतासम्बन्धेन सेके, सेकस्य अनुकूलतासम्बन्धेन कृतौ, कृतेश्च आश्रयतासम्बन्धेन चैत्रादावन्वयः।

ननु पदज्ञानं चेत् शाब्दप्रमाकरणं तदा तस्य को व्यापार इति चेत् वृत्त्या पदजन्यपदार्थोपस्थितिः। वृत्तिश्च द्विविधा शक्तिर्लक्षणा च। वृत्तिप्रकारकपदज्ञानजन्या या पदार्थोपस्थितिः पदार्थस्मृतिः सा व्यापार(३) इत्यर्थः। न च पदार्थोपस्थितिमात्रं व्यापारोऽस्तु किं वृत्त्या पदजन्यत्वनिवेशनेनेति वाच्यम्, वधूपदर्शितकलायादुपस्थितेः शाब्दानुत्पादेन पदार्थस्मृतौ पदज्ञानजन्यत्वनिवेशस्यावश्यकत्वात्। न च तत्र पदज्ञानरूपकरणाभावादेव न शाब्दोत्पाद इति वाच्यं, यत्र यस्य कलायपदस्य स्मरणात्मकज्ञानमस्ति,

---

(१) 'टापदेन करणत्वस्य' इति ग—पुस्तके नास्ति।

(२) 'सिच्पदेन सेकस्य' इत्यपि ग—पुस्तके स्खलितम्।

(३) 'स व्यापार' इति ग—पुस्तके पाठः।

नास्ति च पदजन्या कलायोपस्थितिः, अस्ति च प्रत्यक्षात्मिका कलायोपस्थितिः, तत्र कलायशाब्दवारणाय पदार्थोपस्थितौ पदजन्यत्वनिवेशस्यावश्यकत्वात्। न च पदज्ञानजन्यपदार्थोपस्थितिरेव व्यापारोऽस्तु किं पदज्ञाने वृत्तिप्रकारकत्वनिवेशेनेति वाच्यम्, एकसम्बन्धिज्ञानस्य अपरसम्बन्धिस्मारकतया यत्र घटपदज्ञानेन आकाशस्मरणं, तत्र आकाशस्य शाब्दोत्पत्तिवारणाय पदज्ञाने वृत्तिप्रकारकत्वं विशेषणमुपात्तम्। तथा च आकाशे घटपदस्य शक्तिलक्षणयोरन्यतरस्याभावेन आकाशोपस्थितौ पदविषयकवृत्तिज्ञानजन्यत्वाभावात् न तत्र आकाशशाब्दोत्पाद इति।

ननु घटमानयेत्यादौ आदौ घटपदज्ञानं, ततो घटपदजन्या घटोपस्थितिः, ततोऽम्-पदज्ञानं, ततोऽम्-पदजन्या कर्म्मत्वोपस्थितिः, ततो घटोयं कर्म्मत्वमित्याकारक-कर्म्मत्वविशेष्यकाधेयत्वसंसर्गक-घटप्रकारकशाब्दबोध इति रीत्या आनयनादेरपि शाब्दबोधो भविष्यति, स च न सम्भवति ज्ञानस्य आशुविनाशितया कर्म्मत्वोपस्थितिकाले घटपदज्ञान घटोपस्थित्योरभावादिति चेन्न घटपदज्ञानजन्यघटगोचरसंस्कारसहकृतात् अम्पदज्ञानजनित-

संस्कारात् घट-पदाम्-पदविषयकसमूहालम्बनात्मक-ज्ञानात् घटविषयकसंस्कारसहकृतात् कर्म्मत्वविषयकसंस्कारात् घटकर्म्मत्वयोः समूहालम्बनोपस्थितौ सत्याम् घटोयं कर्म्मत्वमित्याकारकशाब्दोत्पादात्। तथा च आदौ घटपदाम्पदविषयकसमूहालम्बन-श्रवणं,(४) ततो घटकर्म्मत्वोभयविषयकसमूहालम्बनोपस्थितिः, ततः शाब्दबोधः तत्पूर्वं पदोपस्थित्यादीनां सत्त्वात्।

ननु घटपदज्ञानमेव कुतो भविष्यति, न च घटपदस्य श्रावणमेव भविष्यति तत्र श्रवणसमवायसत्त्वादिति वाच्यं (५); घटपदत्वं हि अव्यवहितोत्तरत्वसम्बन्धेन घटविशिष्टटकारत्वं, (६) तस्य च श्रावणं न सम्भवति। तथाहि घवर्णोत्पत्त्यनन्तरं टवर्णोत्पत्तिकाले घ-घत्वे इति निर्विकल्पकम्, ततः ट-टत्वे इति निर्विकल्पकम् घकारनाशश्च, तदनन्तरं घटपदस्य घविशिष्टटत्वेन(७) श्रावणं न सम्भवति तत्पूर्वं घकार-

(४) 'श्रवणमित्यत्र स्मरण'मिति क—पुस्तके पाठः।

(५) 'कुतो भविष्यति तत्र श्रवणसमवायासत्त्वादिति वाच्यम्' इति ग—पुस्तके पाठः।

(६) 'घवट्टत्वम्' इति क—पुस्तके पाठः।

(७) 'घवट्टत्वेन' इति इति क—पुस्तकपाठः।

नाशात् घकारे श्रोत्रसमवायाभावादिति (१) चेत् घकारस्य लौकिकप्रत्यक्षानुत्पादेऽपि उपनीतभानोत्पादसम्भवात् तत्पूर्वं घकारज्ञानसत्त्वात्। तथाहि ट-टत्वे इति निर्विकल्पकं नरसिंहाकारं घकारांशे सविकल्पकं टकारांशे निर्विकल्पकरूपं जायते। इत्यञ्च(२) तदा घकारज्ञानसत्त्वात् द्वितीयक्षणे टकारे घकारप्रकारकप्रत्यक्षोत्पत्तिर्भवत्येव तत्प्रकारकप्रत्यक्षं प्रति तज्ज्ञानस्य हेतुत्वात्। अनया दिशा अन्यत्रापि उपपत्तिः करणीया।

शाब्दबोधश्च (३) कस्यचित् मते राजपुरप्रवेशन्यायेन जायते। आदौ कर्मत्वे आधेयतासम्बन्धेन घटान्वयः, तदनन्तरं घटीयकर्मत्वस्य आनयने अन्वयः, तदनन्तरं घटीयकर्मत्ववदानयनस्य कृतावन्वयः।

कस्यचित् मते खले-कपोतन्यायेन जायते। घटकर्मत्वानयनकृतीनां समूहालम्बनात्मकोपस्थित्यनन्तरम् एकदैव कर्मत्वे घटस्य आनयने कर्मत्वस्य कृतौ आनयनस्य अन्वयबोधो भवतीति। न

---

(१) 'घकारश्रोत्रसमवायाभावा'दिति क—पुस्तकपाठः।

(२) 'इत्यञ्च' इति क—पुस्तके नास्ति।

(३) 'शाब्दबोधश्च' इति क—पुस्तके पाठः।

चैतन्मते घटीयकर्मत्ववदानयनमिति विशिष्ट-वैशिष्ट्यबोधात्मक-शाब्दं न स्यात् विशिष्टवैशिष्ट्या-बुद्धिं (४) प्रति विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वात्। तथा च घटीयत्वविशिष्टकर्मत्ववैशिष्ट्या-बुद्धिं प्रति कर्मत्वं घटीयमित्याकारक-विशेषणता-वच्छेदकप्रकारकनिश्चयस्य हेतुतया तदभावेन तदुत्-पत्त्यसम्भवादिति वाच्यम् दृष्टत्वात्। तादृशबोधश्च शाब्दबोधानन्तरं मानस एवेति भावः।

ननु घटः कर्मत्वमानयनं कृतिरित्यादौ घटीयं कर्मत्वमित्याद्याकारकं शाब्दज्ञानं किमिति न जायते पदज्ञानादिरूपशाब्दसामग्रीसत्त्वादिति (५) चेत् आकाङ्क्षाविरहात् आकाङ्क्षानिश्चयस्यापि शाब्दं प्रति हेतुत्वात्।

उपमानप्रमाणं निरूप्य शब्दप्रमाणनिरूपणं प्रतिजानीते अथेत्यादिना। भ्रमात्मकशाब्दकरणे अतिव्याप्तिवारणाय प्रमापदम्। पद-ज्ञानमिति,—तदुक्तं कारिकावल्यां 'पदज्ञानन्तु करणम्' इत्यादि आख्यातेनेत्यादिः,—वैयाकरणानाम् आख्यातस्य कृतिमति शक्तिः, तस्य च कर्त्तरि अभेदेनान्वयः, नैयायिकानान्तु लाघवात् कृतावेव शक्तिः अन्वयश्चास्याः कर्त्तरि आश्रयत्वेन।

---

(४) 'बोधम्' इति क—पुस्तकपाठः।

(५) 'रूपसामग्रीसत्त्वा'दिति क—पुस्तकपाठः।

वृत्तिश्च द्विविधेति,—आलङ्कारिकाणां व्यञ्जनाभिधाना तृतीयापि वृत्तिरस्ति, तुरीयाञ्च केचित् तात्पर्य्याख्यामाहुः, स्वतन्त्रे व्यञ्जना न वृत्त्यन्तरं, तद्गम्यस्यार्थस्य प्रतिपत्तिस्तु मानसज्ञानविशेष एवेति सिद्धान्तः।

बधूपदर्शितेत्यादिः,—वृत्त्या पदजन्यत्वमनिवेश्य यथा कथञ्चित् पदार्थोपस्थितिनिवेशे तत्रापि प्रकारान्तरेण कलायाद्युपस्थित्या शाब्द बोधो निरसितुमशक्यः स्यात्, अतः पदजन्यत्वनिवेशः। इत्थञ्च प्रकृतोपस्थितौ पदजन्यत्वाभावात् न शाब्दोत्पाद इति।

आकाशस्मरणमिति,—शब्दस्वरूपस्य घटपदस्य आकाशे समवेतत्वात् घटपदमाकाशसम्बन्धि, तस्य ज्ञानेन समवायिरूपस्यापरसम्बन्धिनः स्मरणमुपपद्यते।

आशुविनाशितयेति,—तृतीयक्षणवृत्तिध्वंसप्रतियोगितयेत्यर्थः। आशुपदप्रतिपाद्यस्य शैघ्र्यस्य अननुगतत्वात् तावन्मात्रेण प्रकृतोपपादनासम्भवात्।

अन्यत्रापीति—पटपदज्ञानादावित्यर्थः। सर्वत्रैव तादृशस्थले निरुक्तरीत्या अनुपपत्तेर्जागरूकत्वात् तदपसारणस्य आवश्यकत्वात्। इष्टत्वादिति घटकर्मत्वानयनकृतीनां समूहालम्बनात्मकोपस्थित्यनन्तरं तादृशविशिष्टशाब्दबोधस्य स्वमते अभिप्रेतत्वात्। यदि च कदाचित् तदा तादृशबोधः, तदा स न शाब्दबोधः, परं मानस एवेति स्पष्टयति तादृशबोधश्चेत्यादिना। आकाङ्क्षेत्यादिः,—सेयमाकाङ्क्षा अग्रतो निरूपयिष्यते।

---

[ आकाङ्क्षा-प्रकरणम् ]

**ननु केयमाकाङ्क्षा? न च शाब्दबोधगोचरेच्छा आकाङ्क्षेति वाच्यम्, अजिज्ञासोरपि शाब्दोत्पादात्।**

न च प्रकृतवाक्यजन्यसंसर्गावगम-प्रागभाव आकाङ्क्षा। तथा च (१) प्रकृतवाक्यजन्यो य एकपदार्थविशेष्यका-परपदार्थविशेषणकः (२) शाब्दबोधस्तस्य प्रागभाव आकाङ्क्षेत्यर्थः। तथा च घटः (३) कर्मत्वमित्यादौ न शाब्दबोधः, प्रकृतवाक्यजन्यसंसर्गावगमस्यालीकतया (४) तत् प्रागभावाभावादिति वाच्यं पुत्रेण सह राजसम्बन्धान्वयबोधो भवतु दूतोक्तया उच्चरिते अयमेति पुत्रो राज्ञः पुरुषोऽपसार्य्यतामित्यादौ पुरुषेऽपि राजसम्बन्धान्वयबोधापत्तेः, पुरुषे राजसम्बन्धान्वय-तात्पर्य्यग्रहानन्तरम् अयमेति पुत्रो राज्ञ इत्यादि-वाक्यादेव पुरुषे राजसम्बन्धान्वयबोधोत्पादेन पुरुषविशेष्यक-राजसम्बन्धान्वयबोधप्रागभावस्य सत्त्वात्। न च तात्पर्य्यग्रहस्यापि शाब्दबोधहेतुतया पुरुषे राजसम्बन्धान्वय-तात्पर्य्यग्रहाभावादेव(५) उक्तस्थले पुरुषविशेष्यक-राजसम्बन्धान्वयबोधाभाव(६)

---

(१) 'तथा च' इति क—पुस्तके नास्ति।

(२) 'अपरपदार्थविशेषणक' इत्ययमंशः क—पुस्तके नास्ति।

(३) 'तथा च' इति ग—पुस्तके नास्ति।

(४) 'संसर्गावगमप्रागभावस्यालीकतया' इति क—पुस्तके।

(५) 'सम्बन्धतात्पर्य्यग्रहाभावादेव' इति ग—पुस्तकपाठः।

(६) 'नीक्तस्थले पुरुषविशेष्यक-राजसम्बन्धान्वयबोधः' इति क—पुस्तकपाठः।

इति वाच्यम्, एवं हि अयमेतीत्यादौ आकाङ्क्षा-विरहात् पुरुषे न राजसम्बन्ध्यान्वय इति व्यवहारो न स्यात् तात्पर्य्यग्रहाभावादेव तत्र पुरुषे न राज-सम्बन्ध्यान्वय इत्यस्य भवतोक्तत्वात्।

उच्यते ;—यत्पदनिष्ठ-यत्पदव्यतिरिक्तप्रयुक्तताात्-पर्य्यविषयीभूत-यादृशान्वयबोधोपधायकत्वाभावस्तत्-पदस्य तत्पदवत्त्वम् तादृशान्वयबोधे आकाङ्क्षा (७)। अस्ति च घटमानयेत्यादौ अम्पदे घटपदवत्त्वमाकाङ्क्षा अम्पदस्य घटपदं विना कर्मत्वं घटीयमित्याकारक-तात्पर्य्य विषयीभूतान्वयबोधानुपधायकत्वसत्त्वात्, अतोऽम्पदे घटपदवत्त्वम् आकाङ्क्षा। अम्पदे घट-पदवत्त्वञ्च अव्यवहितोत्तरत्वसम्बन्धेन (८)। एवं घटपदे अम्पदवत्त्वमपि आकाङ्क्षा, तत्र घटपदे अम्पदवत्त्वं अव्यवहितपूर्ववर्त्तित्वसम्बन्धेन (९)। अतोऽम्-घट इति वाक्यात् न घटीयं कर्मत्वमित्य-न्वयबोधः। घटः कर्मत्वमित्यादौ च नाकाङ्क्षा कर्मत्व-पदे घटीयं कर्मत्वमित्याद्याकारकान्वयबोधोपधा-

---

(७) 'तत्पदवत्त्वम् आकाङ्क्षा' इति ग—पुस्तके।

(८) 'अस्ति च' इत्यारभ्य 'अम्पदे घटपद'वत्त्वञ्च इति पर्य्यन्तग्रन्थः ग—पुस्तके स्खलितः।

(९) 'अव्यवहितपूर्ववर्त्तित्वे'त्यत्र 'अव्यवहितोत्तरत्वे'ति स्यात्पाठः ग—पुस्तके।

यकत्वाभावस्य घटादिपदव्यतिरेकप्रयुक्तत्वाभावात्। यत्पदं हि यत्पदसहकृतं सत् अन्वयबोधं जनयति, तत्पदनिष्ठान्वयबुद्ध्युपधायकत्वाभावः तत्पदव्यतिरेकप्रयुक्तः, कारणाभावप्रयुक्तत्वात् कार्य्याभावस्य। घटः कर्मत्वमित्यादौ तु कर्मत्वपदं घटपदसहकृतं सत् अन्वयबोधं जनयतीति कर्मत्वपदनिष्ठोऽन्वयबुद्ध्युपधायकत्वाभावः न घटपदव्यतिरेकप्रयुक्त इति न कर्म्मत्वपदे अव्यवहितोत्तरत्वसम्बन्धेन घटपदवत्त्वमाकाङ्क्षा इति भावः। पुत्रान्वयप्रतीतीच्छया उच्चरिते अयमेतीत्यादौ पुरुषपदे राजपदव्यतिरेकप्रयुक्तस्य राजसम्बन्धो पुरुष इति अन्वयबोधोपधायकत्वाभावस्य सत्त्वेऽपि तादृशान्वयबोधो न तात्पर्य्यविषयीभूत इति न तत्र पुरुषपदे राजपदाकाङ्क्षा, एतत्सम्पत्त्यर्थम् अन्वयबोधे तात्पर्य्यविषयत्वं विशेषणमुक्तम्।

इदं पुनरवधेयम्;—घटमानयेत्यादौ प्राचीनमते आनयने घटीयकर्म्मत्वं प्रकारीभूय संसर्गीभूय च भासते। तथा च आनयनं घटीयकर्म्मत्ववत् कर्म्मतासम्बन्धेन घटवदिति (१०) कर्म्मत्वनिष्ठ-द्विविध-

(१०) 'आनयनं घटीयकर्मतासम्बन्धेन घटवदिति' इति ग—पुस्तके भ्रान्तपाठः।

विषयताशालिज्ञानं जायते। इत्थञ्च आनयनविशेष्यक-कर्मतासंसर्गक(११)-घटप्रकारक-शाब्दबोधे आनय-पदे द्वितीयान्तघटपदवत्त्वमाकाङ्क्षा (१२), ततो घटा-नयनमित्यादौ (१३) न तादृशान्वयबोध इति दिक्।

अथ शाब्दोपयोगिनीमाकाङ्क्षां निरूपयितुं सङ्गत्यनुकूलां जिज्ञासा-मुत्थापयति नन्वित्यादिना। अजिज्ञासोरिति शाब्दबोधगोचरेच्छा-शून्यस्यापीत्यर्थः। अलौकतयेत्यादिः,—एतन्मते पञ्चप्रागभावापर-नामा अनुत्पत्त्यमानप्रतियोगिकः प्रागभावो नाभ्युपेयत इति भावः।

यत्पदनिष्ठेत्यादौ प्रयुक्तत्वं न जन्यत्वं, किन्तु स्वरूपसम्बन्धविशेष एव, अत्यन्ताभावस्य सनातनत्वेन तादृशोपधायकत्वाभावे निरुक्त-व्यतिरेकप्रयुक्तत्वस्याभावेन असम्भवप्रसङ्गात्।

स चायं स्वरूपसम्बन्धः 'एतेन पदेन विना नास्य पदस्य प्रकृतानु-भवजनकत्व'मित्येवम्प्रतीतिसाक्षिक एव ग्राह्यः। एतदभिप्रायेणैव विश्वनाथेनापि 'यत्पदेन विना यस्याननुभावकता भवेदाकाङ्क्षे'ति आकाङ्क्षालक्षणम् अभिहितम्।

कारणाभावप्रयुक्तत्वादित्यादिः,—अत्रायमभिप्रायः,—अन्वयबोधो-त्पत्तिमन्तरेण पदस्य अन्वयबोधविशिष्टत्वरूपान्वयबोधोपधायकत्वा-सम्भवात् अन्वयबोधोत्पत्ताविव अन्वयबोधोपधायकत्वेऽपि अपरपदस्य हेतुत्वं, ततस्तदभावरूपः कारणाभाव एव तादृशान्वयबोधोपधायक-त्वाभावे प्रयोजक इति।

---

(११) 'संसर्गेण' इति ग—पुस्तके पाठः।

(१२) 'आनीतपदे' इति क—पुस्तके पाठः। 'आनयनपदे' इति ग—पुस्तकपाठः। 'घटं-पदवत्त्व'मिति ग—पुस्तकपाठः।

(१३) 'घटोपनयनमित्यादौ' इति क—पुस्तकपाठः।

तात्पर्य्येति,—तात्पर्य्यमिदं वक्तुरिच्छाविशेषः, तथाहि यत्र यादृशार्थे यादृशार्थस्य अन्वयबोधेच्छया यत्पदमुच्चारितं, तत्र तादृशार्थे तादृशार्थस्य अन्वयबोधजनकत्वाभावो यत्पदस्य यत्पदाभावप्रयुक्तः तत्र तत्पदवत्त्वं तत्पदाकाङ्क्षेत्यर्थः।

प्राचीनमत इति, अत्र घटीयकर्म्मत्वादेः प्रकारीभूय संसर्गीभूय च भानमेव विशेषः। मतान्तरे तु नोभयथा घटीयकर्म्मत्वादेर्भानम् परमेकधैवेति।

घटानयनमित्यादाविति,—निरुक्तानियमस्य द्वितीयाद्यन्तपदसमभिव्याहारस्थाननियतत्वात्, घटानयनमित्यत्र घटपदस्य तादृशत्वाभावेन न तादृशान्वयबोधसम्पत्तिरिति ग्रन्थस्यास्य तात्पर्य्यम्।

---

[ आकाङ्क्षाज्ञानादिहेतुताप्रकरणम्

आकाङ्क्षाज्ञानस्य आकाङ्क्षानिश्चयत्वेन हेतुत्वम्, न तु आकाङ्क्षाज्ञानत्वेन, आकाङ्क्षासंशयादपि शाब्दोत्पादापत्तेः। वह्निना सिञ्चतीत्यादौ सेको न वह्निकरणक इति शाब्दवारणाय शाब्दं प्रति योग्यताज्ञानस्यापि हेतुत्वं वाच्यं, तथा च तत्र योग्यताज्ञानविरहात् न तादृशशाब्दबोध इति।

ननु का योग्यता ? न च यत्र यस्य अन्वयबोधः, तज्ज्ञातीये तज्ज्ञातीयस्य अन्वयदर्शनं योग्यता, अस्ति च पयसा सिञ्चतीत्यादौ(१) तथा, तत्र तत्र सेके पयः-

(१) अतःपरं 'तथा' इत्यारभ्य 'दृष्टत्वात्' इत्यन्तसन्दर्भः क—पुस्तके स्खलितः।

करणकत्वान्वयबोधस्तज्जातीयसेकान्तरे पयःकरण-कत्वसंसर्गस्य दृष्टत्वात्। नास्ति वह्निना सिञ्चतीत्यादौ, कस्मिन्नपि सेके वह्निकरणकत्वसंसर्गस्य अदृष्टत्वादिति वाच्यं, साजात्यं हि येन केनचिद्रूपेण अन्वयितावच्छेदकरूपेण वा? नाद्यः, प्रमेयत्वेन सेक-सजातीये दाहे वह्निकरणकत्व-संसर्गदर्शनेन वह्निना सिञ्चतीत्यादावतिव्याप्त्यापत्तेः(२)। न द्वितीयः, अद्यजातः पयः पिबतीत्यादावव्याप्तेः (३)। तत्र हि अन्वयितावच्छेदकं अद्यजातत्वं, तेन रूपेण सजातीये क्वापि पयःपानकर्तृत्वान्वयादर्शनात्।

उच्यते;—एकपदार्थे अपरपदार्थवत्त्वं योग्यता। अस्ति च पयसा सिञ्चतीत्यादौ तत्त्वम्। एकपदार्थे सेके अपरपदार्थस्य पयःकरणकत्वस्य सत्त्वात्। नास्ति च वह्निना सिञ्चतीत्यादौ तत्त्वम्, एकपदार्थे सेके अपरपदार्थस्य वह्निकरणकत्वस्य असत्त्वात्। योग्यताज्ञानस्य संशयसाधारणयोग्यताज्ञानत्वेन हेतुत्वम्, अतो योग्यतासंशयादपि शाब्दमुत्पद्यत इति।

---

(२) 'सेकजातीये वह्निकरणत्वसंसर्गदर्शनेन वह्निना सिञ्चतीत्यादावतिव्याप्तिः' इति ग—पुस्तकपाठः।

(३) 'पिबतीत्यादावतिव्याप्तेः' इति भ्रान्तपाठः ग—पुस्तके।

ननु योग्यताज्ञानस्य शाब्दबोधहेतुत्वे मानाभावः। न चैवं सेको न वह्निकरणक इति बाधनिश्चयदशायां सेको वह्निकरणक इति शाब्दम् स्यात् (४), योग्यताज्ञानस्य हेतुत्वे तु (५) नैष दोषः, बाधनिश्चयस्य प्रतिबन्धकतया एकपदार्थे अपरपदार्थवत्त्वरूपयोग्यताज्ञानोत्पादासम्भवादिति वाच्यं, सामान्यतस्तद्वत्ताबुद्धिं प्रति तदभावनिश्चयप्रतिबन्धकत्वस्य प्रत्यक्षादिस्थले क्लृप्ततया तत एव बाधनिश्चयदशायां तद्वारणादिति वाच्यं,(६) तदभावनिश्चयत्वेन प्रतिबन्धकता, तद्वत्ताबुद्धित्वेन प्रतिबध्यता इत्येकरूपेण प्रतिबध्यप्रतिबन्धकभावकल्पनस्याशक्यत्वात्। प्रत्यक्षेच्छासत्त्वे बाधनिश्चयसत्त्वेऽपि (७) तद्वत्ताप्रत्यक्षोत्पादात्, अतः प्रत्यक्षेच्छाविरहविशिष्टतदभाववत्तानिश्चयत्वेन प्रतिबन्धकत्वं, तद्वत्ताप्रत्यक्षत्वेन(८) प्रतिबध्यत्वम् इत्येकः प्रतिबध्यप्रतिबन्धकभावः, अपरस्य तदभावनिश्चयत्वेन प्रतिबन्धकत्वं, तद्वत्तानुमितित्वेन प्रतिबध्य-

(४) 'स्यादि'ति पाठः ग—पुस्तके नास्ति।

(५) 'हेतुत्वेन' इति ग—पुस्तकपाठः।

(६) 'वाच्यमित्यत्र चैत्र' इति पाठः ग—पुस्तके।

(७) 'प्रत्यक्षेच्छासत्त्वेऽपि' इति क—पुस्तकपाठः।

(८) 'प्रत्यक्षत्वेन' इत्यत्र 'शाब्दत्वेन' इति भ्रान्तपाठः ग—पुस्तके।

लरूपः। अन्यश्च तदभाववत्तानिश्चयत्वेन प्रतिबन्धकत्वं, तद्वत्ताशाब्दत्वेन प्रतिबध्यत्वमित्याकारकः। एवमुपमितित्व-स्मृतित्वान्तर्भावेणापि प्रतिबध्यप्रतिबन्धकभावौ कल्पनीयौ। तथा च तत्प्रकारकशाब्दं प्रति तदभावप्रकारकनिश्चयाभावत्वेन कारणत्वकल्पनमपेक्ष्य लाघवात् एकपदार्थे अपरपदार्थवत्तारूपयोग्यताज्ञानत्वेन हेतुत्वकल्पनमेव ज्याय इत्यलमधिकेन।

एवमनासन्ने (९) गिरिर्भुक्तमग्निमान् देवदत्तेन इत्यादौ गिरिरग्निमान् इत्यन्वयबोधवारणाय शाब्दं प्रति आसत्तिनिश्चयत्वेनापि हेतुत्वं वाच्यम्, आसत्तिश्च पदाव्यवधानम्,(१०) तथा चात्र भुक्तमितिपदव्यवधानात् पदाव्यवधानरूपासत्तेर्निश्चयाभावात् न शाब्दबोध इति। अश्वसंसर्ग-तात्पर्य्येण उच्चरितात् सैन्धवपदात् लवणशाब्दवारणाय शाब्दं प्रति तात्पर्य्यज्ञानस्यापि हेतुत्वं वाच्यम्। तात्पर्य्यञ्च तत्प्रतीच्छया उच्चरितत्वम्। तथा च उक्तस्थले

---

(९) 'एवमनासन्नेऽपि' इति ग—पुस्तकपाठः।

(१०) 'पदाव्यवधान'मित्यनन्तरं 'वाच्य'मित्यन्तपाठः ग—पुस्तके स्खलितः।

सैन्धवपदे लवणतात्पर्य्याभावात् (११) न लवणशाब्द-बोध इति दिक्।

वैशेषिकास्तु शब्दो न प्रमाणान्तरम्; घट-मित्यादौ कर्म्मत्वं घटीयमित्याद्याकारकबोधः कर्म्म-त्वम् आधेयतासम्बन्धेन घटवत् घटपदाकाङ्क्षादि-मत्पदस्मारितत्वादित्याद्यनुमानादेव भविष्यति(१२)। न च शाब्दयामीत्यनुव्यवसाय-साक्षिकशाब्दत्वजाते-र्दुरपह्नवतया तदवच्छिन्नस्याकस्मिकत्वापत्तिवारणाय शाब्दत्वावच्छिन्नं प्रति पदज्ञानादेर्हेतुताया भवतामप्या-वश्यकतया प्रमाणान्तरकल्पने अस्माकं किं गौरव-मिति वाच्यम्, भवता हि (१३) कर्म्मत्वं घटीयमिति शाब्दोत्पत्तिकाले कर्म्मत्वं घटीयमित्यनुमितिवारणाय अनुमितीच्छाविरहविशिष्टघटशाब्दसामग्रीत्वेन प्रति-बन्धकत्वं घटविधेयकानुमितित्वेन प्रतिबध्यत्वम् इति प्रतिबध्यप्रतिबन्धकभावः कल्पनीयः। मया च स नोच्यते; अस्मन्मते शाब्दत्वस्य अनुमितित्व-व्याप्यतया घटविधेयकानुमितेस्तदोत्पादात्; तथा च

---

(११) 'सैन्धवपदे न लवणतात्पर्य्यात्' इति क—पुस्तके पाठः।

(१२) 'भविष्यती'ति पाठः ग—पुस्तके नास्ति।

(१३) 'भवति हि' इति ग—पुस्तके भ्रान्तपाठः।

प्रमाणान्तरकल्पने तत्प्रतिबध्यप्रतिबन्धकभावकल्पना-गौरवम्।

नन्वेवं तत्र घटं नानुमिनोमीति प्रतीतेः का वार्त्तेति चेत्, भ्रमत्वमेव। न च बाधकं विना प्रतीतेर्भ्रमत्वायोग इति वाच्यम्; उक्तप्रतिबध्यप्रतिबन्धक-भावकल्पनस्यैव बाधकत्वात्।

अत्र नव्यनैयायिकाः(१४);—वैशेषिकमते बहुशो गौरवम्(१५);—तथाहि समानविषय एव शाब्दसामग्री बलवती, अनुमितिसामग्री च विभिन्नविषय एव बलवतीति। यत्र(१६) पटानुमितिसामग्री घटशाब्द-सामग्री च तत्र पटानुमितिरेव जायते, न च घट-शाब्दम्, अतः घटशाब्दं प्रति पटानुमितिसामग्र्याः प्रतिबन्धकत्वमुच्यते। तथा(१७) चास्मन्मते घटशाब्द-त्वेन प्रतिबध्यता घटशाब्देच्छाविरहविशिष्टपटानु-मितिसामग्रीत्वेन प्रतिबन्धकत्वमिति प्रतिबध्य-प्रतिबन्धकभावः। घटशाब्देच्छासत्त्वे पटानुमिति-

(१४) 'नैयायिकनव्या' इति क—पुस्तकपाठः।

(१५) 'गौरवात्' इति क—पुस्तकपाठः।

(१६) इत आरभ्य यत्र यत्र पटशब्दस्तत्र तत्रैव घटशब्दः ग—पुस्तके दृश्यते।

(१७) 'तत्र' इति क—पुस्तकपाठः।

सामग्रीसत्त्वेऽपि (१८) घटशाब्दसम्पादनाय घट-शाब्देच्छाविरहविशिष्टत्वम् अनुमितिसामग्र्यां विशेषणम्। तथा च विशेषणाभावकृतविशिष्टाभावसत्त्वात् नोक्तस्थले घटशाब्दानुत्पादः (१९)। वैशेषिकेण च एतादृशप्रतिबध्यप्रतिबन्धकभावः (२०) कल्पयितुं न शक्यते। यत्र च घटशाब्दसामग्री पट-शाब्दसामग्री च तत्र घटशाब्दानुत्पादापत्तेः (२१)। पटानुमितिसामग्र्यास्तत्रापि सत्त्वात् शाब्दत्वमात्रस्य अनुमितित्वव्याप्यतया शाब्दसामग्रीकाले अनुमिति-सामग्र्या आवश्यकत्वात्। तथा च वैशेषिकेण पटानुमितिसामग्र्याः प्रतिबध्यतावच्छेदकं पटा-विषयक-शाब्दत्वं वाच्यम्, तथा च नोक्तदोषः। तत्र पटविषयक-घटशाब्दस्यैव उत्पादात्। इत्थञ्च पटाविषयकत्वनिवेशे भवतां गौरवमिति संक्षेपः।

शाब्दं प्रति आकाङ्क्षाज्ञानस्य कारणत्वमुक्तं, तच्च ज्ञानत्वेन निश्चयत्वेन वेति समाधत्ते आकाङ्क्षाज्ञानस्येत्यादिना। आकाङ्क्षानिश्चयत्वेनेति आकाङ्क्षाविषयक-संशयान्यत्वेन इत्यर्थः। आकाङ्क्षांशे

(१८) 'शाब्देच्छासत्त्वेऽपि घटशाब्दसम्पादनाय' इति ग—पुस्तकपाठः।

(१९) 'नोक्तस्थले घटशाब्दोत्पाद' इति भ्रान्तपाठः ग—पुस्तके।

(२०) 'एतादृशप्रतिबन्धकभाव' इति ग—पुस्तके।

(२१) 'यत्र च शाब्दसामग्री तत्र घटशाब्दानुत्पादापत्तेः' इति भ्रान्तपाठः ग—पुस्तके

निश्चयात्मकात् घटाद्यंशे संशयात्मकज्ञानादपि शाब्दस्य अनुपपत्ति-वारणाय संशयत्वमपि आकाङ्क्षाघटितमेव वाच्यम्, आकाङ्क्षाघटित-संशयत्वमात्रनिवेशेऽपि आकाङ्क्षासंशयान्यघटादिज्ञानमात्रादपि निरा-काङ्क्षवाक्यज्ञानवतः शाब्दप्रसङ्ग इति ज्ञानांशेऽपि आकाङ्क्षाविषयकत्वं निवेश्यमेवेति दिक्।

साजात्यमित्यादिः,—स्ववृत्तिधर्मावच्छिन्नत्वं साजात्यम्, स्वत्वान्वयिता-वच्छेदकरूपवत्त्वं वेति प्रकृतविकल्पार्थः। प्रमेयत्वेनेत्यादिः,—प्रमेय-त्वस्य केवलान्वयितया पयःकरणक-सेकवृत्तिप्रमेयत्वस्य वह्निकरणक-दाहादावपि सत्त्वेन स्वसजातीये वह्निकरणकत्वस्य दर्शनमिति। पयः-पानकर्तृत्वान्वयादर्शनादिति,—अद्यजातत्वस्य प्रकृतान्वयितावच्छेद कस्य पूर्वजात-दृष्टवस्तुष्वभावेन तद्दर्शनाभावादिति भावः। एक-पदार्थ इत्यादिः,—न च एकपदार्थे अपरपदार्थवत्त्वलक्षण-योग्यता-ज्ञानस्य शाब्दहेतुत्वे शाब्दस्य अपूर्वविषकत्वभङ्गप्रसङ्ग इति वाच्यम्, एकपदार्थे अपरपदार्थवत्त्वज्ञानस्य एकपदार्थे अपरपदार्थासंसर्गग्रहा-भावतात्पर्य्यकत्वादिति निपुणाः।

तदभावप्रकारकनिश्चयाभावत्वेनेत्यादिः,—कृप्तकारणवत् प्रति-बन्धकाभावत्वेनापि कारणत्वस्य सिद्धतया तदभावनिश्चयत्वेन प्रति-बन्धकत्वे तदभावनिश्चयाभावत्वेन प्रकृतकारणत्वम् इति।

न प्रामाणान्तरमिति,—अस्य यथाश्रुतार्थस्तु प्रत्यक्षानुमानभिन्न-प्रमाणत्वाभाववान् शब्द इति, स च सिद्धसिद्धिभ्यां व्याहत इति प्रत्यक्षानुमानभिन्नत्वं न शब्दप्रमाणवृत्ति इति, शब्दप्रमाणत्वं न प्रत्यक्षानुमानप्रमाणभिन्नवृत्तीत्यादितात्पर्य्यं कल्पनीयम्। अस्मन्मते शाब्दत्वस्येत्यादिः, अस्मन्मते वैशेषिकमते।

—००—

[ शब्दस्य शक्ति-प्रकरणम् ]

ननु वृत्तिर्द्विविधा शक्तिर्लक्षणा चेति प्रागुक्तम्। तत्र का शक्तिः? न च अभिधा नाम पदार्थान्तरं मानाभावात्। उच्यते,—ईश्वरसङ्केतः शक्तिः; सङ्केतश्च अस्माच्छब्दादयमर्थो बोद्धव्य इत्येतादृशेच्छा-विषयत्वम्। न चैवम् ईश्वरमविदुषां पामरादीनां शाब्दबोधो न स्यात् शक्तिग्रहाभावात्, न स्याच्च मीमांसकानां शाब्दबोधः, मन्त्रमयदेवतानुवादिनाम् (१) ईश्वरे ज्ञानेच्छाकृतीनामनङ्गीकारादिति वाच्यम्(२); ईश्वरसङ्केतस्य हि ईश्वरसङ्केतत्वेन ग्रहो न कारणम्, अपि तु सङ्केतत्वेन ग्रहः, तच्च पामरादीनामप्यस्ति। न च आधुनिकसङ्केतितानां चैत्रादिपदानां का गतिः, चैत्रादौ ईश्वरसङ्केताभावादिति वाच्यम्, ईदृशेऽस्मिन् पिता नाम कुर्य्यादिति सामान्यतश्चैत्रादिपदानामपि ईश्वर-सङ्केतितत्वात्।

ननु शक्तिः कुतो ग्राह्या? न च उपमानतस्तथेति वाच्यम्, गोसदृशो गवयपदवाच्य इत्यादौ अति-

---

(१) 'देवतात्मवादिनाम्' इति ग—पुस्तकपाठः।

(२) 'ईश्वरेच्छाकृतीनामनङ्गीकारा'दिति ग—पुस्तकपाठः।

देशवाक्यार्थज्ञानरूपस्य उपमानस्यापि शक्तिग्रहमूलकत्वात्। उच्यते,—प्रथमतः शक्तिग्रहो व्यवहारात्;—तथाहि घटमानय इति केनचिदुक्तः कश्चन तदर्थं प्रतीत्य घटमानयति, तच्च उपलभमानो बालः तया क्रियया तस्य प्रयत्नमनुमिनोति, तेन प्रयत्नेन तस्य घटानयनगोचरं ज्ञानमनुमिनोति (३) तद्गोचरप्रवृत्तिं प्रति तद्गोचरज्ञानस्य हेतुत्वात्। ततः अस्य ज्ञानस्य को हेतुरित्याकाङ्क्षायाम् उपस्थितत्वात् शब्दस्यैव तादृशज्ञानहेतुत्वं कल्पयति, तदनन्तरं घटादिपदानां प्रत्येकमावापोद्वापेन शक्तिग्रहः। आवापोद्वापश्च अन्वयव्यतिरेकः। तदनन्तरं क्वचिदुपमानात्, क्वचिद् व्याकरणात्, क्वचिद् आप्तवाक्यात्, क्वचिद् वाक्यशेषात्, क्वचिद् विवरणात् शक्तिग्रह इति (४)।

ननु ययोः व्यवहारं पश्यतः शक्तिग्रहः, तयोरेव कथं शक्तिग्रहः, न चानयोर्व्यवहारादिति वाच्यम्, अनवस्थानात्। न च बीजाङ्कुरवत् अनाद्यनवस्था न दोषायेति वाच्यम्, सर्गादौ तदसम्भवात्। न च

(३) 'मिनोमि' इति क—पुस्तकपाठः।

(४) 'शक्तिग्रह इति' इति पाठः क—पुस्तके नास्ति।

सर्गादिरेव नास्ति प्रलये मानाभावादिति वाच्यम्, कार्य्यद्रव्यानधिकरण-कार्य्याधिकरणकालस्य(५) खण्ड-प्रलयत्वेन वेदसिद्धत्वादिति (६) चेत्; उच्यते,(७)— सर्गादौ भगवान् ईश्वर एव (८) शरीरद्वयं परिगृह्य व्यवहरति, अतस्तद्व्यवहाराद् बालः पूर्ववत् शक्तिं गृह्णातीति न किञ्चिदनुपपन्नम्।

ननु ईश्वर एव किं मानमिति चेत्, सर्गान्यथानुपपत्तिरेव। ननु(नच) पूर्वसर्गोत्पन्नमन्वादय एव सर्गादौ व्यवहारहेतवः सन्तु इति वाच्यम्, एवमपि पूर्व्वसर्गादौ व्यवहारानुपपत्तेः। न च तत्रापि तत्पूर्व्वोत्पन्ना अन्ये कल्पान्तामिति (९) वाच्यम्, बहूनां कल्पनामपेक्ष्य एकस्य ईश्वरस्यैव कल्पनाया औचित्यात्। ननु एव एक सर्व्वत्र व्यवहारमूलमस्तु इति चेत्, स एवास्माकमीश्वर इति दिक्।

अथ शब्दस्य शक्तिं निरूपयितुमाकाङ्क्षामुत्थापयति नन्वित्यादिना। पदार्थान्तरमिति क्लृप्तपदार्थव्यतिरिक्त इत्यर्थः। मानाभावादिति

---

(५) 'कार्य्याधिकरण' इति पाठः ग—पुस्तके नास्ति।

(६) 'तदसिद्धत्वादिति' इति क—पुस्तके भ्रान्तपाठः।

(७) 'चेत् उच्यते' इति पाठः क—पुस्तके नास्ति।

(८) 'ईश्वर एव' इति पाठः क—पुस्तके नास्ति।

(९) अन्येन कल्पान्तामिति भ्रान्तपाठः क—पुस्तके।

पदार्थान्तरस्य कल्पकाभावादित्यर्थः। अस्माच्छब्दादित्यादिः, अत्र विशिष्य विशिष्य घटपदात् घटरूपार्थो बोद्धव्यः पटपदात् पटरूपार्थो बोद्धव्य इत्यादिरूपेश्वरेच्छाः प्रतिपत्तव्याः।

द्वादशेऽङ्कौत्यादिः,—तथाहि निरुक्तविधिवाक्ये नामत्वेन रूपेण चैत्रादयः सर्वे शब्दाः परिप्राप्ताः तेषाञ्च तथारूपेण सङ्केत ईश्वरस्यापीति न क्षतिः।

व्यवहारादिति, प्रयोज्य-प्रयोजकद्वयव्यवहारज्ञानादित्यर्थः। तमेव व्यवहारं ग्राहयति तथाहीत्यादिना। अन्वयव्यतिरेक इति,—तथाहि आदौ केनचित् 'गामानय' इति प्रयुक्ते कश्चित् ज्ञाततदर्थं वानयनप्रवृत्तमुपलभ्य बालः अस्य वाक्यस्य सास्नादिमत्पिण्डानयनमर्थ इति प्रथमं प्रतिपद्यते, अथापरस्मिन् काले 'गां बधान अश्वमानय' इति प्रयुक्ते गोबन्धनप्रवृत्तम् अश्वानयनप्रवृत्तञ्च तमेव विदित्वा पूर्वानुभूतगोशब्दसत्तया सास्नादिमत्पिण्डरूपार्थसत्त्वं तदसत्तया तदसत्त्वञ्च समुपलभ्य बालः स एव गोपदस्य गोरूपमर्थं आनयपदस्य चाहरणरूपक्रियाविशेषमर्थं प्रतिपद्यत इत्येवमेव आवापोद्वापेन व्यवहारतः शब्दशक्तिग्रह इति ध्येयम्।

कार्य्यद्रव्याधिकरणेत्यादिः,—महाप्रलय-स्वीकर्तृमते महाप्रलयस्य कार्य्याभावानधिकरणकालरूपतया तत्रातिव्याप्तिवारणाय कार्य्याधिकरणत्वमपि कालविशेषणम्। तथा च महाप्रलये कार्य्यभूतादृष्टादीनामप्यभावेन न कार्य्याधिकरणकालत्वमिति भावः।

भगवानिति सर्वैश्वर्य्यशालीत्यर्थः, एतेनास्य शरीरद्वयधारणशक्तिराहित्यशङ्का निरस्ता। शरीरद्वयमिति प्रयोज्यशरीरं प्रयोजकद्वयशरीरञ्चेत्यर्थः। पूर्वसर्गादाविति मन्वादिसृष्टिपूर्ववर्त्तिसृष्ट्यादावित्यर्थः, तत्र मन्वादीनां व्यवहारहेतूनामभावात् इति भावः।

स एवेति सर्वव्यवहारमूलतया लाघवात् कल्पित एकः परमेश्वरा-

द्यभिधान एवेत्यर्थः। अस्माकं ईश्वरसङ्केतः शक्तिरितिवादिना-मित्यर्थः। ईश्वर इति शक्तिस्वरूपघटकेश्वरपदप्रतिपाद्य इत्यर्थः।

—००—

[ पदानां जातिशक्त्यादि-प्रकरणम् ]

ननु पदानां घटादिव्यक्तौ शक्तिः, किं वा घटत्वादि-जातौ ? अत्र मीमांसकाः,—घटादिव्यक्तीनां नाना-त्वात् लाघवात् (१) घटत्वादिजातौ शक्तिः। कथं तर्हि घटादिपदाद् घटादिव्यक्तेर्लाभ इति चेत्, तदाक्षेपात्।

ननु कोऽयमाक्षेप इति चेत्, अनुपपत्तिज्ञानमेव। गोत्वं हि स्वाश्रयव्यक्तिं विना अनुपपन्नमिति भट्टाः। तन्न विनापि अनुपपत्तिज्ञानं गौरस्तीति वाक्यात् गोत्वविशिष्टप्रतीतेः। प्राभाकरास्तु(२) गोत्वशक्तं गोपद-मिति शक्तिज्ञानजन्यस्य (३) गोत्वप्रकारकगोशाब्द-त्वस्य कार्यतावच्छेदकतया गोपदज्ञानादेव व्यक्तेर्लाभ इति वदन्ति। तत् नैयायिका न क्षमन्ते गोत्वं गोपद-शक्यमित्याकारकशक्तिज्ञानस्य शाब्दधीहेतुत्वे गोत्वांशे

---

(१) 'लाघवात्' इति पाठः ग—पुस्तके नास्ति।

(२) 'प्राभाकरास्तु' इति पाठः ग—पुस्तके नास्ति।

(३) 'शक्तिज्ञानस्य' इति क—पुस्तके दृश्यते।

गोत्वत्वनिवेशोऽवश्यं कार्य्य इति गौरवात्। न च तदेव कथं करणीयमिति वाच्यम्, तर्हि गोत्वं गोपदशक्यमिति ज्ञानं हि निर्धर्मितावच्छेदकं वाच्यम्, तथा सति निर्धर्मितावच्छेदकज्ञानस्य अप्रतिबध्यतया गोत्वं न गोपदशक्यमिति बाधनिश्चयसत्त्वेऽपि गोत्वं गोपदशक्यमिति निर्धर्मितावच्छेदक-बोधोत्पत्तौ बाधकाभावात् गोत्वं न गोपदशक्यमिति बाधनिश्चयसत्त्वेऽपि गोशाब्दोत्पादापत्तेरित्यलमधिकेन।

प्राभाकराश्च,—शक्तिर्द्विविधा, स्मारिका अनुभाविका च। तत्र स्मारिका शक्तिर्जातौ, अनुभाविका च कार्य्यत्वान्विते। तथाहि प्रयोजक-वाक्यश्रवणानन्तरं प्रयोज्यस्य प्रवृत्तिमुपलभमानो बालः प्रवृत्तिजनकतया कार्य्यत्वविशिष्टज्ञानमनुमिनोति। स्वप्रवृत्तिस्थले बालेन कार्य्यत्वविशिष्टज्ञानस्य हेतुत्वावधारणात्। कार्य्यत्वं कृतिसाध्यत्वं, ततः तज्ज्ञेत्वाकाङ्क्षायामुपस्थितत्वात् शब्दमेव तथा अवधारयति। अतस्तन्निर्वाहाय शब्दत्वावच्छेदकेन शक्तिं कल्पयति, तदनन्तरम् आवापोद्वापाभ्यां घटादिपदे शक्तिं गृह्णन् प्रथमकल्पनानुरोधात् कार्य्यत्वान्वितघटादौ शक्तिं गृह्णाति, न तु केवलघटादौ, आद्यव्युत्पत्ति-

विरोधापत्तेः। इत्यत्र यत्र कार्य्यतावोधकपद-समभिव्याहारो नास्ति, तद्वाक्यमर्थवादरूपं शाब्दज्ञानं न जनयत्येव(४)। नन्वेवं ततः प्रवृत्तिः कथं स्यादिति चेत्, असंसर्गाग्रहादेवेति वदन्ति।

तन्न, आवापोद्वापाभ्यां लाघवाद् घटादिमात्र एव शक्तिग्रहात्, न तु कार्य्यत्वान्वयेऽपि, कार्य्यत्वस्य विधिलभ्यत्वात्; अनन्यलभ्यो हि शब्दार्थ इति। न चैवम् आद्यव्युत्पत्तिग्रहस्य भ्रमत्वं स्यादिति वाच्यम्, इष्टत्वात्। न च बाधकं विना प्रतीतेर्भ्रमत्वायोग इति वाच्यं, गौरवस्यैव बाधकत्वात्। भवन्मते हि घटपदज्ञानस्य कार्य्यतावच्छेदकं कार्य्यत्वान्वित-घटशाब्दत्वम्, अस्मन्मते केवलं घटशाब्दत्वमेवेति। एवं पटादिस्थलेऽपीति, इतरथा विध्यसमभिव्याहृतानां पुराणादीनाम् अप्रामाण्यं स्यात्; तथा च सुष्ठु उपहसितं मिश्रैः 'प्रसिद्ध एव लोकेऽस्मिन् बुद्धबन्धुः प्रभाकर' इति (५)।

जातिशक्तिवादिनां मीमांसकानां मतमधिचेक्तुमादौ तन्मतोपन्यासमुपक्रमते नन्वित्यादिना। पदानामिति घटादिपदानामित्यर्थः।

---

(४) 'जनयतीत्यर्थः' इति क—पुस्तके पाठः।

(५) 'बुद्धबन्धुरित्यत्र' 'क्रुद्धबुद्ध' इति पाठः क—पुस्तके।

नानात्वादिति अनन्तत्वादित्यर्थः। एतेन व्यक्तौ शक्तिकल्पने अनन्तासु व्यक्तिषु अनन्तैव शक्तिः कल्पनीयेति गौरवदोषः संसूचितः, अतो लाघवानुगृहीततर्केण एकैकस्य शब्दस्य एकैकस्यां जातावेकैव शक्तिरिति। इदञ्चोपलक्षणम् प्रयोज्यप्रयोजकव्यवहारेण शक्तिज्ञाने एकस्यामेव व्यक्तौ शक्तिग्रहेण कालान्तरे तज्जातीय-वस्तुप्रतिपादक-शब्दश्रवणतः व्यक्त्यन्तरग्रहस्य सम्भवतो व्यभिचारसम्यादकत्वमपि ज्ञेयम्। अत एव 'आनन्त्यव्यभिचारदोषापाता'दिति ग्रन्थान्तरे व्यक्तिशक्तौ दोषः समुल्लिखितो दृश्यते।

अथ भाट्टमतं निरस्य कार्य्यत्वान्विते शक्तिवादिनां प्राभाकराणां मतं निरसितुं तन्मतमुपन्यस्यति प्राभाकरास्त्वेत्यादिना। स्मारिका स्मृतिजनिका, अनुभाविका अनुभवजनिका च। आवापोद्वापाभ्याम् अन्वयव्यतिरेकाभ्याम्।

ननु अपदार्थस्य शाब्दे भानासम्भवेन यत्र कार्य्यताबोधकपदसमभिव्याहारस्तत्र तथा कार्य्यान्विते शक्तिग्रहसम्भवेऽपि तदसमभिव्याहारस्थले शाब्दानुपपत्तिरित्याकाङ्क्षायां तत्र शाब्दानुत्पादमङ्गीकृत्य समाधत्ते इत्यञ्च इत्यादिना। विध्यसमभिव्याहृतानामिति इदञ्च हेतुगर्भविशेषणम्।

---

[ लक्षणा-प्रकरणम् ]

ननु का लक्षणा? न च शक्यादशक्योपस्थितिर्लक्षणा, अस्ति च गङ्गायां घोष इत्यादौ शक्यात् शक्यग्रहात् प्रवाहज्ञानात् अशक्यस्य तीरादेरुप-

स्थितिरिति गङ्गापदे लक्षणेति वाच्यम्;—शक्या-दशक्योपस्थितिर्हि लक्षणाजन्या, न तु सैव लक्षणेति।

उच्यते,—शक्यसम्बन्धो हि लक्षणा। अस्ति गङ्गायां घोष इत्यादौ गङ्गापदशक्यस्य प्रवाहस्य संयोगरूपसम्बन्धस्तीर इति तत्र लक्षणा।

सा च लक्षणा द्विविधा; गौणी शुद्धा च। तत्र सादृश्यात्मक-शक्यसम्बन्धो लक्षणा गौणी; यथा चन्द्रे तिलकमित्यादौ चन्द्रे मुखचन्द्रे मुखे चन्द्र-सादृश्यस्य सत्त्वात्(१)। तदन्या शुद्धा; यथा गङ्गायां घोष इत्यादौ तीरे संयोगरूप-गङ्गापदशक्यप्रवाह-सम्बन्ध इति संक्षेपः।

इति श्रीकणाद-तर्कवागीश-भट्टाचार्य्यविरचितं

भाषारत्नं समाप्तम्।

अथ शक्तिं मुख्यवृत्तिं निरूप्य गौणवृत्तिं लक्षणां निरूपयितु-माकाङ्क्षामुत्थापयति नन्वित्यादिना। लक्षणाया अशक्यार्थोपस्थिति-रूपतां निरस्यति न चेत्यादिना। शक्यग्रहादिति, शक्यादित्यस्य विष्कारः, प्रकृतमभिप्रेत्य प्राह प्रवाहस्येति, भगीरथरथखाता-वच्छिन्नजलप्रवाहस्येत्यर्थः। लक्षणाजन्येति लक्षणाज्ञानजन्येत्यर्थः तत्र लक्षणां विना वृत्त्यन्तरेण अशक्योपस्थितेरसम्भवात् लक्षणैव तादृशार्थोपस्थितिजनिकेति भावः।

---

(१) 'चन्द्रे मुखचन्द्रे' इति पाठः, क—पुस्तके नास्ति।

प्रवाहस्येति—प्रवाहसामान्यस्य गङ्गापदशक्यत्वाभावाद् भगीरथरथ-खातावच्छिन्नजलप्रवाहस्येत्यर्थः।

संयोगरूपसम्बन्ध इति—ननु जलप्रवाहप्रतियोगिकसंयोगः खात एव, न तु तीरे, परम्परया सत्यपि तीरे तत्संयोगे असन्निहितप्रदेशस्यापि व्यावृत्त्य-सम्भवाद् बहुदूरतात्पर्येणापि गङ्गायां घोष इत्यादिप्रयोगः प्रामाणिकः स्याद् इति चेत् न, अत्रत्यं संयोगपदं सामीप्यपरं, अथवा संयोग इति प्रथमा-काङ्क्षायामुक्तं, वस्तुतस्तु जलप्रवाहस्य सामीप्यसम्बन्ध एव प्रकृते लक्षणा वाच्या, तेन न कोऽपि दोषः। एतदेव समुपपादितमन्यत्राप्यन्यैः।

गौणीति—एषा गौणी वृत्त्यन्तरमिति मीमांसकाः। नैयायिकादयस्तु गुणयोगादेषा गौणी लक्षणेति व्याचक्षाणा वृत्त्यन्तरत्वमस्याः प्रतिक्षिपन्ति। आलङ्कारिकाणामप्ययमेव सिद्धान्तः। —तदुक्तं दर्पणकारैः,—

'साहश्येतरसम्बन्धाः शुद्धास्ताः सकला अपि।
सादृश्यात्तु मता गौण्यः'। इति।

सविस्तरमन्यत्रानुसन्धेयम्।

इति श्रीकालीपदतर्काचार्यकृता 'रत्नलक्ष्मी'नाम्नी भाषारत्नटीका समाप्ता।

सन्तः सन्तोषिताः सन्तु मन्तुरन्तं प्रपद्यताम्।
उपकाराय केषाञ्चिदेषा टीका प्रजायताम्।

---

# शुद्धिपत्रम्

२०० संख्याङ्किते पत्रे मूले
'सेको न वह्निकरणक' इत्यत्र 'सेको न वह्निकरणक इति निश्चयदशायां सेको वह्निकरणक' इति पठनीयम्।

—०:०:०—

# ARTS LIBRARY

(DELHI UNIVERSITY LIBRARY SYSTEM)

Cl. No R625 x J25 : 1 15610

Ac No. 32426 Date of release for laon

This book should be returned on or before the date last stamped below An overdue charge of Rupee One will be charged for each day the book is kept overtime.

(Authority : EC Res 200 dated 27th August 1996)